अस्य श्रीअन्नपूर्णेश्वरीमहा(स्तोत्र)मन्त्रस्य महाचमसकहोल ऋषिः अनुष्टुप् त्रिष्टुप् छन्दः

* * * *

अकारममृतं नित्यं मृष्टान्नं घृतसंप्लुतम् ।
आयुरारोग्यसिद्ध्यर्थमाकाराय नमोऽस्तु ते ॥

**End:**

इत्यावहन्तीस्तवमन्त्रराजवर्णस्तुतिं शान्तिकरं प्रशस्तम् ।
स्वाहान्तमन्त्रं स्वरमादिदीर्घमोङ्कारमाद्यन्तविधिप्रयोगम् ॥
आवहन्तीमहामन्त्रवर्णस्तोत्रं शिवोदितम् ।
भक्त्या युक्तः पठेद्यस्तु अष्टैश्वर्यं प्रयच्छति ।

---

## No. 10706. आभरणदेवतास्तुतिः.
## ĀBHARAṆADĒVATĀSTUTIḤ.

Pages, 8. Lines, 16 on a page.

Begins on fol. 22*a* of the MS. described under No. 424.

Complete.

A eulogy on the goddess Śakti, conceived as being decked with ornaments all over the body.

**Beginning:**

पञ्चब्रह्ममहापञ्चतिरस्करणकारिणीम् ।
पञ्चकृत्यप्रपञ्चैकसम्राज्ञीं संविदं नुमः ॥
ब्राह्मे मुहूर्ते शयनादुत्थितोऽहं विचिन्तये ।
आमूलमाब्रह्मबिलं ज्वलन्तीं वरसंविदम् ॥

**End:**

कुवलयसदृगक्षी कुङ्कुमक्षोदताम्रा धृतगुणसृणिपाणिर्दीप्तपश्वेषुचापा।
परचितिमयपश्चप्रेतमश्चाधिरूढा भवतु परमसंविद्भावना भाग्यभाजाम् ॥
इति षष्ठरत्नाय नमः ॥

---

## No. 10707. आम्नायस्तवः.
## ĀMNĀYASTAVAḤ.

**Page, 1.** Lines, 10 on a page.

Begins on fol. 228*a* of the MS. described under No. 124.

Complete.

A eulogy on the goddesses Śuddhavidyā, Bālā, Dvādaśārdhā, Mataṅginī, etc., who are all considered to be different manifestations of Śakti.

**Beginning:**

श्रीनाथादिगुरु (. . .) मण्डलम् ॥
शुद्धविद्या च बाला च द्वादशार्धा मतङ्गिनी ।
एताः कामगिरीन्द्रस्थाः पूर्वाम्नायस्थदेवताः ॥

**End:**

यस्त्रिसन्ध्यं पठेद्विद्वानाम्नायस्तोत्रमुत्तमम् ।
सर्वपापविशुद्धात्मा सर्वैश्वर्यमतन्द्रितम् ॥
भुक्त्वा भोगान्यथाकामान् सर्वप्रियहिते रतः ॥
सुन्दरीलोकमाप्नोति वेदवाक्यानुसारतः ॥

**Colophon:**

आम्नायस्तवः संपूर्णः ॥

---

## No. 10708. आम्नायस्तवः.
## ĀMNĀYASTAVAḤ.

**Pages, 3.** Lines, 7 on a page.

Begins on fol. 82*b* of the MS. described under No. 3472.

Complete.

Same work as the above, but with the addition of one stanza in the beginning as given below :—

वन्दे गुरुपदद्वन्द्वमवाङ्मनसगोचरम् ।
रक्तशुक्लप्रभामिश्रमतर्क्यं त्रैपुरं महः ॥

---

## No. 10709. आम्नायस्तवः.
## ĀMNĀYASTAVAḤ.

Pages, 4. Lines, 16 on a page.

Begins on fol. 192*a* of the MS. described under No. 424.

Complete.

Same work as the above, but without the introductory stanzas and with a different end as given below :—

स्फुरति यत्तव रूपमनुत्तरं स्फुरति यं च जगन्मयमम्बिके ।
ममयदेवततनुस्मतां (मम तथैव च तत् स्फुरतां) सदा अभयदे वरदे परदेवते ॥

**Colophon:**

इति समाप्तः ॥

---

## No. 10710. आम्नायस्तवः.
## ĀMNĀYASTAVAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 32*a* of the MS. described under No. 9571.

Incomplete.

Same work as the above.

---

## No. 10711. आम्नायस्तवः.
## ĀMNĀYASTAVAḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 25*b* of the MS. described under No. 6274.

Complete.

Same work as the above, but without colophon.

## No. 10712. आम्नायस्तवः.
## ĀMNĀYASTAVAḤ.

Pages, 4. Lines, 20 on a page.

Begins on fol. 16*a* of the MS. described under No. 7973.

Complete.

Same work as the above, but with the addition of the following three lines at the end :—

स भार्यापुत्रसौभाग्यसहितः पशुमान् भवेत् ॥
एकवारं जपेदेनं कोटियज्ञफलं लभेत् ।
एतद्विज्ञानमात्रेण सर्वेषां देशिको भवेत् ॥

---

## No. 10713. इन्द्राक्षीस्तोत्रम्.
## INDRĀKṢĪSTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 48*a* of the MS. described under No. 5661.

Complete.

In praise of the goddess Indrākṣī, who is considered to be a manifestation of Pārvatī. A repetition of this hymn is held to dispel the fears arising from thieves, wild animals, etc.

**Beginning:**

अस्य श्रीइन्द्राक्षिस्तोत्रमन्त्रस्य शचीपुरंदर ऋषिः, अनुष्टुप् छन्दः, इन्द्राक्षी (देवता) ।

* * * *

इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्रद्वयान्विताम् ।
वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ॥

**End:**

त्रिसन्ध्यं यः पठेन्नित्यं सर्वसिद्धिकरं भवेत् ।
राजचोरभयं सर्वं व्याघ्रसिंहादिकं तथा ॥

नश्यन्ति क्षणमात्रेण सर्वं चैव कथं(भयं) तथा ॥

* * * *

योगिनीचक्रमाप्नोति भुक्तिमुक्तिफलप्रदम् ॥

---

No. **10714.** इन्द्राक्षीस्तोत्रम्.

INDRĀKṢĪSTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 30*a* of the MS. described under No. 5422.

Complete.

Same work as the above, but with a different end as given below :—

आवर्तयेत्सहस्रं तु लभते वाञ्छितं फलम् ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते ॥
ओं ह्रां श्रीं क्लीं इन्द्रमुखी स्वाहा ॥

---

No. **10715.** इन्द्राक्षीस्तोत्रम्.

INDRĀKṢĪSTŌTRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 7261.

Complete.

Same work as the above.

---

No. **10716.** इन्द्राक्षीस्तोत्रम्.

INDRĀKṢĪSTŌTRAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 38*a* of the MS. described under No. 764.

Complete.

Same work as the above.

## No. 10717. इन्द्राक्षीस्तोत्रम्.
## INDRĀKṢĪSTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 181*a* of the MS. described under Nos. 537 and 7247.

Incomplete.

Same work as the above.

---

## No. 10718. इन्द्राक्षीस्तोत्रम्.
## INDRĀKṢĪSTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 183*a* of the MS. described under Nos. 537 and 7247.

Complete.

Same work as the above.

---

## No. 10719. इन्द्राक्षीस्तोत्रम्.
## INDRĀKṢĪSTŌTRAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 3*a* of the MS. described under No. 434.

Complete.

Same work as the above.

---

## No. 10720. इन्द्राक्षीस्तोत्रम्.
## INDRĀKṢĪSTŌTRAM.

Pages, 3. Lines, 12 on a page.

Begins on fol. 38*a* of the MS. described under No. 4756.

Complete.

Same work as the above, but with the addition of a few stanzas at the end as given below :—

त्रिपाद्भस्मप्रहरणस्त्रिशिरा रक्तलोचनः ।

* * * *

निःशेषीकृतरक्तबीजदनुजे नुत्ये निशुम्भापहे
शुम्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेऽम्बिके ॥

## No. 10721. इन्द्राक्षीस्तोत्रम्.
## INDRĀKṢĪSTŌTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 57*b* of the MS. described under No. 4613.

Complete.

Same work as the above, but with a different end as given below :—

यन्त्रं संपूज्य विधिवज्जपेदिन्द्रदृशीमनुम् ।
शतावृत्या रोगशान्तिरिष्टलाभः सहस्रशः ॥

---

## No. 10722. इन्द्राक्षीस्तोत्रम्.
## INDRĀKṢĪSTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 146*a* of the MS. described under No. 9147.

Complete.

Same work as the above, but with a different end as given below :—

आयुरारोग्यमैश्वर्यं ज्ञानं वित्तं तथा बलम् ।
शतमावर्तयेद्यस्तु मुच्यते व्याधिबन्धनात् ॥

---

## No. 10723. इन्द्राक्षीस्तोत्रम्.
## INDRĀKṢĪSTŌTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 2*a* of the MS. described under No. 2641.

Complete.

Same work as the above.

---

## No. 10724. इन्द्राक्षीस्तोत्रम्.
## INDRĀKṢĪSTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 9*a* of the MS. described under No. 9022.

The efficacy of a repetition of this hymn is here said to be the cure of diseases, especially fevers of various kinds.

Wants beginning; otherwise complete.

Same work as the above, but with a different end as given below:—

ज्वरं च ज्वरसारं च ज्वरातीसारमेव च ।
संनिपातज्वरं चैव शीतोष्णविगतज्वरः ॥

**Colophon:**

इन्द्राक्षीस्तोत्रं संपूर्णम् ॥

---

No. **10725.** **इन्द्राक्षीस्तोत्रम्.**
INDRĀKṢĪSTŌTRAM.

Pages, 3. Lines, 4 on a page.

Begins on fol. 27*a* of the MS. described under No. 115.

Complete.

Same work as the above, but without the **Ṛṣi, Chandas and Dēvatā.**

---

No. **10726.** **इन्द्राक्षीस्तोत्रम्.**
INDRĀKṢĪSTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 11*a* of the MS. described under No. 10358.

Complete.

Same work as the above, but with a different end as given below:—

इन्द्रास्तोत्रमिदं पुण्यं जपेदायुष्यवर्धनम् ।
ज्वरादिसर्वरोगाणामपमृत्युहराय च ॥
अच्युतानन्तगोविन्दनामोच्चारणभेषजात् ।
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥

---

No. **10727.** **इन्द्राक्षिस्तोत्रम्.**
INDRĀKṢĪSTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 190*a* of the MS. described under No. 5417.

Incomplete.

Same work as the above

## No. 10728. इन्द्राक्षीस्तोत्रम्.
## INDRĀKṢĪSTŌTRAM.

**Pages, 4. Lines, 5 on a page.**

Begins on fol. 28*a* of the MS. described under No. 4032.

Incomplete.

Same work as the above.

---

## No. 10729. इन्द्राक्षीस्तोत्रम्.
## INDRĀKṢĪSTŌTRAM.

**Pages, 7. Lines, 5 on a page.**

Begins on fol. 19*a* of the MS. described under No. 5737.

Complete.

Similar to the above.

**Beginning:**

अधुना संप्रवक्ष्यामि इन्द्राक्ष्याश्च विधिं क्रमात् ।
साङ्गोपाङ्गविधानेन श्रृणुष्व परमेश्वरि ॥

* * * *

अथ ध्यायेन्महादेवीं भक्तानामिष्टदायिनीम् ।
रुद्राणीमिन्द्रवरदां देवतैः समुपासिताम् ॥
दाडिमीपुष्पसंकाशां त्रिनेत्रमकुटोज्ज्वलाम् ।
चतुर्भुजां प्रसन्नास्यां सदारातिगतायुधाम् ॥

**End:**

द्विभिस्त्रिभिश्चतुर्भिर्वा पञ्चभिर्वाथवाष्टभिः ।
पूजनीया प्रयत्नेन इन्द्राक्षी प्रतिवासरम् ॥
ताम्बूलं दक्षिणायुक्तं फलं देयं गुडोदकम् ।
एवं क्रमेण कुर्वीत सिद्धिर्भवति नान्यथा ॥

**Colophon:**

इति ब्रह्मतान्त्रिके इन्द्राक्षीस्तोत्रविधियोगो नाम त्रयोदशोऽध्यायः ॥

## No. 10730. इन्द्राक्षीस्तोत्रम्.
## INDRĀKṢĪSTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 189*b* of the MS. described under No. 119.

Complete.

Same work as the above, but with a different end as given below:—

यन्नामस्मरणाद्भीता भूतवेतालराक्षसाः ।
रोगादयः प्रणश्यन्ति भेषजं तं नमाम्यहम् ॥

---

## No. 10731. इन्द्राक्षीस्तोत्रम्.
## INDRĀKṢĪSTŌTRAM.

Pages, 15. Lines, 6 on a page.

Begins on fol. 51*b* of the MS. described under No. 5822.
Incomplete.
Similar to the above.

**Beginning:**

अस्य श्रीइन्द्राक्षीस्तोत्रमहामन्त्रस्य शचीपुरन्दर ऋषिः, इन्द्राक्षी देवता

* * * *

प्रसन्नवदनाम्भोजामप्सरोगणसेविताम्

किंशुकादलसमानलोचनां किश्चनागरुसुवल्यवासिनीम् ।
अङ्गचम्पकसमानवार्णिनीं शङ्करप्रियसखीं नमाम्यहम् ॥

**End:**

कोल्लापुरी च लक्ष्मी च अलम्बुरी च योगिनी ।
इत्यष्टादशनामानि योगपीठाः प्रकीर्तिताः ॥

## No. 10732. कल्याणस्तवः.

## KALYĀṆASTAVAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 60*b* of the MS. described under No. 2886.

Complete.

A eulogy on the goddess Śakti, the repetition of which is considered to be efficacious in bestowing prosperity, etc.

**Beginning:**

कल्याणवृद्धिभिरिवामृतपूरिताभिर्लक्ष्मीस्वयंवरणमङ्गलदीपिकाभिः ।
सेवाभिरम्ब तव पादसरोजमूले नाकादिकं किमसि भक्तिमतां जनानाम् ॥
एतावदेव जननि स्पृहणीयमास्ते त(त्व)द्वन्दनेषु सविधस्थगितेऽपि नेत्रे ।
सांनिध्यमुद्यदरुणायुतसोदरस्य त्वद्विग्रहस्य परया सुधयावृतस्य ॥

**End:**

ह्रींकारत्रयसंपुटेन महता मन्त्रेण संदीपितं
स्तोत्रं यः प्रतिवासरं तव पुरो मातर्जपेन्मन्त्रवत् ।
तस्य क्षोणिभुजो भवन्ति वशगा लक्ष्मीः स्थिरस्थायिनी
वाणी निर्मलसूक्तिभारभरिता जागर्ति दीर्घं यशः ॥

**Colophon:**

इति कल्याणस्तवः संपूर्णः ॥

---

## No. 10733. कल्याणस्तवः.

## KALYĀṆASTAVAḤ.

Pages, 4. Lines, 16 on a page.

Begins on fol. 52*b* of the MS. described under No. 424, wherein this work has been mentioned as Paryāyamantrasampuṭastuti in the list of other works given therein.

Complete.

Same work as the above.

## No. 10734. कल्याणस्तवः.
## KALYĀṆASTAVAḤ.

Substance, paper. Size, 8½ × 6⅛ inches. Pages, 3. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 8*b*. The other work herein is Śivānandalaharī 1*a*.

Complete.

Same work as the above, but with a different colophon and with the addition of one stanza as given below :—

इक्षुकोदण्डपुष्पेषुपाशाङ्कुशचतुर्भुजाम् ।
उद्यत्सूर्यनिभां वन्दे देवीं त्रिपुरसुन्दरीम् ॥

**Colophon:**

इति आचार्यविरचिते कनकधारास्तुतिः संपूर्णा ॥

## No. 10735. कल्याणस्तवः.
## KALYĀṆASTAVAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 31*a* of the MS. described under No. 5445.

Complete.

Same work as the above.

## No. 10736. कल्याणस्तवः.
## KALYĀṆASTAVAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 124*b* of the MS. described under No. 119, wherein this work has been mentioned as Pañcadaśākṣarīstōtra in the list of other works given therein.

Almost complete.

Same work as the above.

## No. 10737. कालिकास्तोत्रम्.
## KĀLIKĀSTŌTRAM.

Page, 1. Lines, 19 on a page.

Begins on fol 49*b* of the MS. described under No. 2886.

Complete.

A eulogy on the goddess Kālikā, *i.e.*, Kālī.

**Beginning:**

भ(ब)द्ध्वा खट्वाङ्गकोटीकलितमुरुजटामण्डलं पद्मयोनेः
कृत्वा दैत्योत्तमाङ्गैः स्रजमुरसि शिरः खेचरं तार्क्ष्यपक्षैः।
पूर्णां रक्तैः सुराणां यममहिषमहाशृङ्गमादाय पाणौ
पायाद्वो वन्द्यमानः प्रवयमुदितया भैरवः कालराज्याः ॥

**End:**

चर्वन्ती ग्रन्थिखण्डं प्रकटकटकटाशब्दसङ्घातरौद्री
कुर्वाणा प्रेतमध्ये ककहकहहहाहासमुग्रं कृशाङ्गी।
नित्यं नित्येष्वशक्ता डमरुडिमिडिमाडिण्डिमास्फालयन्ती
पायान्नश्चण्डिकेयं भुभुमभुमभुमाभुम्पमाना भ्रमन्ती ॥

**Colophon:**

इति कालिकास्तोत्रं सम्पूर्णम् ॥

---

## No. 10738. कालिकास्तवराजः.
## KĀLIKĀSTAVARĀJAḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 6*b* of the MS. described under No. 5868.

Complete.

Similar to the above: it is taken from Kulācāracandrōdaya.

**Beginning:**

सुखस्थितं जगन्नाथं कैलासे गिरिजैकदा।
आलिङ्ग्याह कथं वासन् पत्यार्धाङ्गे च पद्मके ॥

* * * *

लक्ष्मणे शरसंभिन्ने विलय(प)न्तं रघूत्तमम् ।
चतुर्भुजात्मिका काली प्रादुर्भूताञ्जनप्रभा ॥
शैलेन्द्रस्वर्णशृङ्गे त्रिदशपरिवृता सिंहपृष्ठाम्बुजस्था
मेघश्यामा त्रिनेत्रा शवहृदि शशभृद्रक्तभूषाङ्गरागा ।
दोर्भिः शङ्खारवर्णीमाणिचषकमपि स्कन्धदेशे वहन्ती
पाशं चर्मासिघण्टामणिमयरसे कालिका कामदास्तु ॥

**End:**

विपुलपुलक(जाल)एव मन्त्री यदि भवति सदा महार्थसिद्धिः ।
स भवति नि(न)रदेव एकवन्द्यः सकलसुखमवाप्य मोक्षमेति ॥

**Colophon:**

इति श्रीकुलाचारचन्द्रोदये परमसिद्धागमे कालिकास्तवराजं(जः) सपूर्णः ॥

---

## No. 10739. कालिकास्तोत्रम्.

## KĀLIKĀSTŌTRAM.

Substance, palm-leaf. Size, $7\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 6. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 9*a*. The other work herein is Bālāstōtra 1*a*, 7*b*.

Complete.

Similar to the above.

**Beginning:**

श्रीकरे सुभक्तहृद्यशीकरे दयाकरे
लोकनाथपाकभेदनैकदेवसेविते ।
राजराजमौनिराजपूजिताङ्घ्रिनीरजे
कालिके कचच्छठाजितालिके नमोऽस्तु ते ॥

**End:**

सारसारसारभारमारुचिप्रभासिते
नन्दितस्वभासनन्दनन्दनन्दनाग्रजे।

मल्लिकामतल्लिकासुवल्लिका[मतल्लिकार]ङ्गमञ्जुले
कालिके कचच्छटाजितालिके नमोऽस्तु ते ॥
द्राक्षाशर्करमाक्षिकेक्षुरसाक्षालावविन्यासिनीं
साक्षाद्दक्षविपक्षदक्षिणकरोल्लालित्यवक्षोरुहाम् ।
अक्षीणक्षणदायिकूटपरशिक्षोद्दक्षकौक्षेयकां
प्रालेयाचलबालिकां शशिमुखीं बालां भजेऽहं सदा ॥

---

## No. 10740. किङ्किणीस्तवः.
## KIṄKIṆĪSTAVAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 106*a* of the MS. described under No. 365.

Complete.

This eulogy on the goddess Pārvatī is so called because it begins with the expression किं किंकिणी.

**Beginning:**

किं किङ्किण्यादिभिः स्तुत्वा परांशिकां जपेत्(?) ।

* * * *

चिच्चन्द्रमण्डलान्तःस्थे नमस्ते हरवल्लभे ।
जगदाह्लादनोद्योगयोगभोगवियोगिनि ॥

**End:**

यन्मयोक्तमिहाज्ञानात्तन्मम स्वप्नमेव च ।
एतत्सर्वं जगद्धात्रि क्षमस्व परमेश्वरि ॥

**Colophon:**

इति किङ्किणीस्तवः सपूर्णः ॥

---

## No. 10741. किरातवाराहीस्तोत्रम्.
## KIRĀTAVĀRĀHĪSTÔTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 10*a* of the MS. described under No. 5639.

Complete.

A eulogy on the goddess Kirātavārāhī, terrible in appearance and intent upon the destruction of her enemies.

**Beginning:**

अस्य श्रीकिरातवाराहीस्तोत्रमन्त्रस्य दूर्वास ऋषिः, अनुष्टुप् छन्दः, किरातवाराही देवता । हुं बीजम् । रं शक्तिः, क्रों कीलकम्, मम सर्वशत्रुक्षयार्थे विनियोगः ।

उग्ररूपां महादेवीं शत्रुनाशनतत्पराम् ।
क्रूरां किरातवाराहीं वन्देऽहं कार्यसिद्धये ॥

**End:**

एतत् किरातवाराह्याः स्तोत्रमापन्निवारणम् ॥
मारकं सर्वशत्रूणां भक्ताभीष्टफलप्रदम् ।
त्रिसन्ध्यं यत्पठेद्यस्तु तत्रोक्तफलमश्नुते ॥

**Colophon:**

इति किरातवाराहीस्तोत्रं संपूर्णम् ॥

---

No. **10742.** किरातवाराहीस्तोत्रम्.

KIRĀTAVĀRĀHĪSTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 45*a* of the MS. described under No. 5661.

Complete.

Same work as the above, but with the addition of a few stanzas at the end as given below.

**End:**

मुसलेनाथ शत्रूणां मारयन्ति स्मरन्ति ये ।

* * * *

एवं ध्यायेज्जपेद्देवीं जनवश्यमवाप्नुयात् ॥
दंष्ट्रोद्धतभुजां नित्यं प्राणवायुं प्रयच्छति ।
दूर्वासं संस्मरेद्देवीं भूलाभं याति बुद्धिमान् ॥

## No. 10743. कुमारीस्तोत्रम्.
## KUMĀRĪSTŌTRAM.

Pages, 6. Lines, 7 on a page.

Begins on fol. 96*a* of the MS. described under No. 5683.

Complete.

A hymn of praise and prayer addressed to the goddess Durgā, the repetition of which is held to be efficacious in removing diseases, in the destruction of evil spirits, etc.

**Beginning:**

पाहि त्वं ब्राह्मि मां नित्यं मत्तवारणगामिनि ।
धवलीकृतदिक्चक्रहंसपुङ्गववाहने ॥ १ ॥
करुणां कुरु माहेशि महेशकृतवैभवे ।
मदोद्धतवृषाधीशवाहने वृषकेतने ॥ २ ॥

**End:**

इत्येवं बीजमन्त्रं परममतिशुभं व्याधिनाशं नित्यं (नितान्तं)
भू(तप्रेता)दिनाशावहमखिलमिदं मन्त्रनारायणोक्तम् ।
नित्यं मन्त्राष्टकानां वदति नरवरे व्याघ्रदुर्भिक्षपीडा
ए(ये)षां दारिद्र्यदुःखं जर(नि)मरणभयं नाशयन्ती कुमारी ॥

**Colophon:**

इति कुमारीस्तोत्रं संपूर्णम् ॥

---

## No. 10744. कृत्यास्तोत्रम्.
## KṚTYĀSTŌTRAM.

Page, 1. Lines, 9 on a page.

Begins on fol. 34*a* of the MS. described under No. 4338, wherein this has been omitted to be mentioned in the list of other works given therein.

Complete.

A hymn of praise addressed to Kṛtyā, who is a manifestation of the goddess Śakti, the repetition of which is held to have the power to enable one to absolve one's self from sin

**Beginning:**

श्रीश्च कुब्जा महाकुब्जा कामुका गुह्यकालिका ।
त्रिपुरा त्वरिता नित्या त्रैलोक्यविजया जया ।

**End:**

कृत्यास्तोत्रं पठेन्नित्यं द्विजानां सन्ध्ययोः स्मृतः ॥
प्रदोषे शुक्रवारे वा यः(ये) पठन्ति द्विजोत्तमाः ।
सर्वपापविनिर्मुक्ता(क्ताः) याति(न्ति) ब्रह्म सनातनम् ॥

---

## No. 10745. क्रोडमुखीस्तोत्रम्.
## KRŌḌAMUKHĪSTŌTRAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 4*a* of the MS. described under No. 2886.

Eight stanzas in praise of the goddess Krōḍamukhī, who is a manifestation of Śakti, the repetition of which is held to enable one to destroy one's enemies.

**Beginning:**

देवि क्रोडमुखि त्वदङ्घ्रिकमलद्वन्द्वानुरक्तात्मनि(ने)
मह्यं मु(द्रु)ह्यति यो महेशि मनसा कायेन वाचा नरः ।
क(त)स्यालु(लं)त्वदयोऽङ्घ्रिनिष्ठुरहलाघातप्र(भू)तव्यथा-
पर्यस्यन्मनसो भवन्तु वपुषः प्राण(णाः)प्रयाणोद्यताः ॥ १ ॥

**End:**

श्यामां तामरसारुणत्रिणयनां सोमार्धचूडां गज-
त्राणव्यग्रहलामुदग्रमुसलामद्र(स्र)स्तमुद्रावतीम् ।
ये त्वां रक्तकपालिनीं शिववरारोहे वराहासनां
भावे सन्धय(संदध)ते न च क्षणमपि प्राणन्ति तेषां द्विषः ॥

**Colophon:**

इति निग्रहाष्टकम् ॥

No. **10746.** चतुःषाष्टिस्तवः.

CATUSSASTISTAVAH.

Pages, 20. Lines, 16 on a page.

Begins on fol. 190*a* of the MS. described under No. 5587.

Complete.

This work is in praise of the goddess Dēvī by means of 64 stanzas. In the colophon at the end of a copy of the same work described under the next nember, it is stated that Śaṅkarācārya is the author.

**Beginning:**

नत्वा श्रीगुरुपादुकां ब(च)पितरौ वाणीं च विघ्नेश्वरं
भूवागीशमुखीं परां च त्रिपुरां देवीं शुकश्यामलाम् ।
वक्ष्ये कौलिकधूर्तदाम्भिकशठादीनां कुलज्ञानिना-
माचारस्य च लक्षणानि च विलासान् कौलिकानां क्रमात् ॥ १ ॥

* * * *

गिरेर्योद्या शक्तिर्हिमवदभिधानात् समुदिता
करं दत्वा भिक्षोरकृत महदैश्वर्यमहिमा ।
प्रतीत्यै जन्तूनामपि च कुलसुन्दर्यभिनव-
स्वभक्तोन्नत्यै ते भवतु शरणं मे भगवती ॥ ३ ॥

**End:**

प्रशंसामीश्वर्याः पठति यदि सन्ध्यासु शृणुयात्
चतुःषष्टिश्लोकां वरशिखरिवृत्तैरुपहिताम् ।
य एनां स प्राज्ञः शतपवनमेधिस्मरबलि-
श्रिया राज्ञां पूज्यो भवति युवतीनामपि विभुः ॥ ६६ ॥

* * * *

यत्रादर्शमिव स्फुटानि सकलान्यङ्गानि विश्वेश्वर-
प्रेयस्याः स्मरमन्दिरं पठति यः स्तोत्रं शिवाकर्षणम् ।
लक्ष्मीस्तस्य विवर्धते स्थिरतरा वाणी च सत्संस्कृता
कीर्तिश्च प्रमदावशो नृपवशः कन्दर्पदर्पं परम् ॥ ६९ ॥

**Colophon:**

इति चतुःषष्टिस्तुतिः समाप्ता ॥

## No. 10747. चतुःषष्टिस्तवः.

## CATUSSASTISTAVAH.

Pages, 18. Lines, 16 on a page.

Begins on fol. 43*a* of the MS. described under No. 424, wherein this work has been mentioned as Tripurasundarīstōtra in the list of other works given therein.

Complete.

Same work as the above, but without the introductory stanza and with a different colophon as given below :—

इति श्रीशङ्कराचार्यविरचिते चतुःषष्ठ्याख्यं श्रीमहात्रिपुरसुन्दरीस्तोत्रं संपूर्णम् ॥

---

## No. 10748. चित्कलाष्टकम्.

## CITKALĀSTAKAM.

Pages, 2. Lines, 22 on a page.

Begins on fol. 5*b* of the MS. described under No. 1021.

Complete.

Eight stanzas in praise of Dēvī, conceived as intelligence personified.

**Beginning:**

श्रीविद्यामृतपूर्णसिन्धुलहरीं श्रीचक्रराजेश्वरीं
मूलाधारचतुर्दलाब्जनिलयां वासान्तवर्णाश्रयाम् ।
स्वाहावल्लभमण्डलान्तरगतां तत्त्वस्वरूपां शिवां
देवीं तां त्रिदशार्चिताङ्घ्रियुगलां ध्यायेत्सदा चित्कलाम् ॥

**End:**

तुर्यं श्रीपरदेवताष्टकमिदं भोगादिसौख्यप्रदं
सन्ध्यासु त्रिषु यः पठेच्च सततं भक्त्यादिनिष्ठान्वितः ।
तस्मै काङ्क्षितभोगभाग्यमतुलं पौरन्दरं वैभवं
देवी सा प्रददाति तुष्टमनसा सायुज्यमन्ते ध्रुवम् ॥

**Colophon:**

चित्कलाष्टकं संपूर्णम् ॥

## No. 10749. त्रिपुरसुन्दरीप्रातःस्मरणीयस्तोत्रम्.
## TRIPURASUNDARĪPRĀTASSMARAṆĪYASTŌTRAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 28*a* of the MS. described under No. 5445, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Five stanzas in praise of the goddess Tripurasundarī, which are intended to be repeated in the early morning.

**Beginning:**

प्रातर्नमामि जगतां जनन्याश्चरणाम्बुजम् ।
श्रीमत्त्रिपुरसुन्दर्या नमिताया हरादिभिः ॥

**End:**

यः श्लोकपञ्चकमिदं प्रातर्नित्यं पठेन्नरः ।
तस्मै दद्यादात्मपदं श्रीमत्त्रिपुरसुन्दरी ॥

---

## No. 10750. त्रिपुरसुन्दरीषोडशिकास्तवः.
## TRIPURASUNDARĪṢŌḌAŚIKĀSTAVAḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 62*a* of the MS. described under No. 2886.

Complete.

Twenty-nine stanzas in praise of Tripurasundarī, a manifestation of the goddess Śakti. Each of the letters of the sixteen-syllabled Mantra relating to Tripurasundarī is placed in the beginning of a stanza.

**Beginning:**

श्रीमातः परमेशतल्पनिलये वन्दारुवृन्दानते
सिन्दूरद्रवकुम्भमोदकजपापुष्पप्रभे मङ्गले ।
श्रीबीजेन समन्वितं तव मनुं भक्त्या पिबन्तं सदा
भक्तं मामवलोकयाशु कृपया लक्ष्म्या सहैवाम्बिके ॥

**End:**

इति विरचितमेतत्स्तोत्रमत्यन्तगोप्यं
मनुवरशुभवर्णश्लोकरत्नं सुगम्यम् ।
प्रतिदिनमुदितेऽर्के विश्ववन्द्यां विभाव्य
स्मरति सकलसिद्ध्यै यः पुमान् स त्वमेव ॥

**Colophon:**

इति षोडशाक्षरीस्तवराजः समाप्तः ॥

---

No. **10751.** त्रिपुरसुन्दरीस्तवराजः.

TRIPURASUNDARĪSTAVARĀJAḤ.

Pages, 9. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 7833.

Complete.

A very important eulogy in praise of the goddess Tripurasundarī, who is a manifestation of Śakti. This is also called Pañcamīstavarāja.

**Beginning:**

नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् ।
शिरसा योगपीठस्थं मुक्तिकाम्यार्थसिद्धये ॥
या नित्या परमा शक्ति(र्जगच्चैतन्यरूपिणी) ।
तां नमामि महादेवीं पञ्चमीमातृरूपिणीम् ।
यस्यां सर्वं समुत्पन्नं यस्यां तत्प्रतितिष्ठति ।

* * * *

**End:**

देव्याः स्तोत्रं पठित्वा च ध्रुवं मुच्येत बन्धनात् ।

* * * *

इति त्रिपुरसुन्दर्याः स्तवराजं मनोहरम् ।
रक्षामन्त्रं च शुभदं शिवेन परिकीर्तितम् ॥

**Colophon:**

इति स्तवराजः संपूर्णः ॥

## No. 10752. त्रिपुरसुन्दरीस्तवराजः.
## TRIPURASUNDARĪSTAVARĀJAḤ.

**Pages, 12. Lines, 6 on a page.**

Begins on fol. 33*a* of the MS. described under No. 5445.

Complete.

Same work as the above.

---

## No. 10753. त्रिपुरसुन्दरीस्तवराजः.
## TRIPURASUNDARĪSTAVARĀJAḤ.

**Pages, 11. Lines, 6 on a page.**

Begins on fol. 32*a* of the MS. described under No. 673.

Complete.

Same work as the above.

---

## No. 10754. त्रिपुरसुन्दरीस्तवराजः.
## TRIPURASUNDARĪSTAVARĀJAḤ.

**Pages, 16. Lines, 16 on a page.**

Begins on fol. 17*b* of the MS. described under No. 5560.

Incomplete.

Same work as the above.

---

## No 10755. त्रिपुरसुन्दरीस्तवराजः.
## TRIPURASUNDARĪSTAVARĀJAḤ

**Pages, 16. Lines, 18 on a page.**

Begins on fol. 117*a* of the MS. described under No. 5593.

Complete.

Same work as the above, but with a different end as given below :—

इदं त्रिपुरसुन्दर्या रक्षामन्त्रं च कामदम् ।
पूजाक्रमेण कथितं साधकानां सुखावहम् ॥

* * * *

गुह्याद्गुह्यतरं प्रोक्तं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादाद्धृदि स्थितः (ते) ॥

---

No. 10756. त्रिपुरसुन्दरीस्तवराजः.
TRIPURASUNDARĪSTAVARĀJAḤ.

Pages, 20. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No. 745.

Complete ; as found in the Rudrayāmala.

Same work as the above, but with the addition of Ṛṣi, Chandas and Dēvatā and with full colophon as given below :—

इति श्रीरुद्रयामले महागुप्तसारे पश्चमीस्तवराजः संपूर्णः ॥

---

No. 10757. त्रिपुरसुन्दरीस्तोत्रम्.
TIRUPURASUNDARĪSTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 19*a* of the MS. described under No. 775.

Incomplete.

Stanzas of praise and prayer addressed to the goddess Tripurasundarī for the sake of securing her protection.

**Beginning :**

अम्बे देवि मनोन्मनी भगवती आनन्दपूर्णालके
वेदान्तादिसमस्तवेदनिलये चिन्मात्रनिष्ठार्थदे ।
अग्न्यर्कादिमहात्मके परशिवे भाग्याब्धिचन्द्रोदये
भक्तेष्टार्थवरप्रदे भगवति ब्रह्मेश्वरी पा(हि) माम् ॥
अम्बा सुन्दरि मन्त्रराजभुवने अत्युन्नते चश्चले
सर्वेशी कमलासने शशिधरे भीमाट्टहासोज्ज्वले ।
भक्ताभीष्टवरप्रदाननिलये ब्रह्माण्डमध्यस्थिते
सर्वेशी करुणानिधे भगवति ब्रह्मेश्वरी पाहि माम् ॥

**End:**

मोक्षद्वारकवाटभेदनकरी तत्त्वार्थनिष्ठाकरी
पूर्णानन्दप्र(सु)बोध (साध)नकरी आम्नायनिष्ठाकरी ॥
तद्वर्ती श्रुतिमार्गरक्षणकरी सर्वेश्वरी ईश्वरी
केदाराचलमन्त्रपूतनगरी स्वर्णाम्बराउ(त्यु)ज्ज्वली ।
मक्ति . . . . . . .

---

No. 10758. त्रिपुरसुन्दरीस्तोत्रम्.
TIRUPURASUNDARĪSTOTRAM.

Pages, 21. Lines, 8 on a page.

Begins on fol. 76*a* of the MS. described under No. 2549, wherein this work has been mentioned as Tripurāmbikāstōtra in the list of other works given therein

Complete.

Similar to the above. This work is said to have been composed by the sage Durvāsas.

**Beginning:**

. . . . . . परापरतरे देवि त्रिलोकीमहा-
सौन्दर्यार्णवमन्थनोद्भवसुधाप्राचुर्यवर्णोज्ज्वलम् ।
. . . नूतनजपापुष्पप्रभं ते वपुः
स्वान्ते मे स्फुरतु त्रिलोकनिलयं ज्योतिर्मयं वाङ्मयम् ॥

* * * *

त्रैलोक्यस्फुटमन्त्रतन्त्रमहिमा स्वात्मोक्तिरूपं विना
यद् बीजं व्यवहारजालमखिलं नास्त्येव मातस्तथा ।
तज्ज्योतिस्फुरणप्रयुक्तसुमतिः सर्वज्ञतां प्राप्य कः
शब्दब्रह्मनिवासभूतवदनो नेन्द्रादिभिः स्पर्धते ॥

**End:**

दुर्वाससा महितदिव्यमुनीश्वरेण
विद्याकरायुवतिमन्मथमूर्तिनैव ।

स्तोत्रं विधाय रुचिरं त्रिपुराम्बिकायाः
वेदागमोक्तपटलैर्विदितैकमूर्तिः ॥

* * * *

देवीं वीक्ष्य मुदा तदाह्वनगिरा देवि प्रसीदेति तां
कैलासाचलमार्गपालिसरणिं शम्भोः कृपां केवलम् ॥

---

No. 10759. त्रिपुरसुन्दरीस्तोत्रम्.

TRIPURASUNDARĪSTŌTRAM.

Pages, 2. Lines, 16 on a page.

Begins on fol. 54*b* of the MS. described under No. 424, wherein this work has been mentioned as Mantrasampuṭastuti in the list of other works given therein.

Complete.

Similar to the above.

**Beginning:**

कनत्कनकशैलाग्रे काञ्चने कमलोदरे ।
कर्णिकामध्यमध्यस्थे वसन्तीं वासनां पराम् ॥

एककालोदितानेककोटिबालार्कसंनिभाम् ।
जपाबन्धूकसिन्दूरपद्मरागमणिप्रभाम् ॥

**End:**

लग्नकस्तूरिकामोदकुङ्कुमागरुचन्दनैः ।
विरलालिप्तसर्वाङ्गीं सर्वावयवसुन्दरीम् ॥

ह्रीमिन्दुशेखराजानिं स्वेच्छारूपफलप्रदाम् ।
सर्वसंपत्समृद्ध्यर्थं तां भजे परमेश्वरीम् ॥

## No. 10760. त्रिपुरसुन्दरीस्तोत्रम्.

## TRIPURASUNDARĪSTŌTRAM.

Page, 1. Lines, 16 on a page.

Begins on fol. 55*b* of the MS. described under No. 424, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Similar to the above.

**Beginning:**

विकारशून्ये गिरिराजकन्ये धन्ये सुरूपे तरुणार्करूपे ।
अम्भोजनेत्रे शशितुल्यवक्त्रे कारुण्यमूर्ति(र्ते) सततं प्रसीद ॥

**End:**

नित्योल्लसन्निजमरीचिपरम्पराणां सौहित्यसिन्धुलहरीभिरभङ्गुराभिः ।
एकीकृतत्रिभुवनां बहिरुल्लसन्तीं मातर्नमामि मनुमूर्तिमहं सुरूपाम् ॥

---

## No. 10761. त्रिपुरसुन्दरीस्तोत्रम्.

## TRIPURASUNDARĪSTŌTRAM.

Pages, 3. Lines, 16 on a page.

Begins on fol. 55*b* of the MS. described under No. 424, wherein this work has been mentioned as Mantrasumpuṭastuti in the list of other works given therein.

Complete.

Similar to the above.

**Beginning:**

कला(रा)कलितसिन्दूरकलिकाकमलाकुला ।
कचकान्तारसंनद्धपञ्चबाणशरा किमु ॥

* * * *

ईशानमानसोल्लासकेतकीकृतकुन्तलैः ।
कमलामलसौगन्ध्यराजितालिकुला किमु ॥

**End:**

लसत्कमलमप्यङ्घ्री यस्याः कमलतामलम् ।
अनीनयच्छ्रिया गत्या मरालीं धवलच्छविम् ॥

या [रा] पादाब्जनखाग्रमङ्गनिचये केशप्रपश्चापदा-
नौपम्यप्रतियोगियोगिविभवभ्राजिष्णुताजृम्भिता ।
श्रि(सृ)ष्टाब्रप्रकृतित्वमभ्रनिकरैः स्वस्य व्यनक्तीव या
प्रालेयाचलपूर्वपुण्यविकृतिं प्रत्येमि तां देवताम् ॥

**Colophon:**

इति त्रिपुरसुन्दरीस्तोत्रं समाप्तम् ॥

---

## No. 10762. त्रिपुरसुन्दर्यष्टकम्.
## TRIPURASUNDARYAṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 11*a* of the MS. described under No. 5559. Complete.

Eight stanzas in praise of the goddess Tripurasundarī.

**Beginning:**

कदम्बवनवासिनीं मुनिकदम्बकादम्बिनीं
नितम्बजितभूधरां सुरनितम्बसुत(कदम्बसं)सेविताम् ।
नवाम्बुरुहलोचनां (सु)मलिना[वा]म्बुदश्यामलां
त्रियम्बककुटुम्बिनीं त्रिपुरसुन्दरीमाश्रये ॥ १ ॥

**End:**

सकुङ्कुमविलेपनामलिकचुम्बिकस्तूरिकां
समुद्रहसि(ते)क्षणां सशरचापपाशाङ्कुशाम् ।
अशेषजनमोहिनीमरुणमाल्यभूषाम्बरां
त्रियम्बककुटुम्बिनीं त्रिपुरसुन्दरीमाश्रये ॥ ८ ॥

## No. 10763. दक्षिणकालिकाभुजङ्गस्तोत्रम्.

## DAKṢIṆAKĀLIKĀBHUJAṄGASTÔTRAM.

Pages, 2. Lines, 19 on a page.

Begins on fol. 49*a* of the MS. described under No. 2886.

Complete.

Stanzas in praise of the goddess Dakṣiṇakālikā written in the Bhujaṅgaprayāta metre.

**Beginning:**

स्फुरद्रत्नमुद्राविविद्रावनं पावनं रूरुवतं(?) नखांशुम् ।
भजे तावकं भावकं मामकीनं परानन्दसंदोहिनं देहि मातः ॥

**End:**

नमस्ते शरण्ये भवारण्यभीतं पवित्रं परं पापपुञ्जैः पुनीहि ।
शिवे मामभद्रं सुवारिद्र(दारिद्र्य)दग्धं विमुग्धं भजे रक्ष रक्ष प्रसन्ने ॥

**Colophon:**

इति दक्षिणकालिकास्तोत्रं संपूर्णम् ॥

---

## No. 10764. देवीदिव्यमङ्गलध्यानम्.

## DĒVĪDIVYAMAṄGALADHYĀNAM.

Pages, 12. Lines, 16 on a page.

Begins on fol 78*a* of the MS. described under No. 426.

Complete; as found in the Viṣṇuyāmalatantra.

Stanzas of praise addressed to the goddess Rājarājēśvarī, the contemplation of which is considered to be efficacious in bestowing prosperity, in curing diseases, such as consumption, and in obtaining salvation.

**Beginning:**

देव्युवाच—

देवदेव महादेव सच्चिदानन्दविग्रह ।
पञ्चकृत्यपरेशान परमानन्ददायक ॥

श्रीराजराजराजेशी या श्रीत्रिपुरसुन्दरी ।
तस्या ध्यानं समाचक्ष्व यदि ते करुणा मयि ॥

ईश्वर उवाच—

* * * *

श्रीराजराजराजेश्वरीध्यानं सर्वोत्तमोत्तमम् ।
तव स्नेहात्प्रवक्ष्यामि भोगमोक्षप्रदं नृणाम् ॥
क्षयरोगादिमृत्युघ्नं सर्वसौभाग्यवर्धनम् ॥

* * * *

कोटिकन्दर्पलावण्यशिववामाङ्कवासिनीम् ।
एककालोदितानेकचन्द्रकोट्यर्ककोटिभाम् ॥

**End:**

राजराजेश्वरीरूपो राजराजाभिनन्दिताम्(तः) ।
कुलकोटिसमायुक्तो शिवलोके महीयते ॥

**Colophon:**

इति श्रीविष्णुयामले तन्त्रे श्रीराजराजेश्वरीश्रीगुरुमीनाक्षिताख्यश्री-गुरुसुन्दरेश्वरीदिव्यमङ्गलध्यानं संपूर्णम् ॥

---

No. **10765.** देवीदिव्यमङ्गलध्यानम्.

DĒVĪDIVYAMAṄGALADHYĀNAM.

Pages, 12. Lines, 16 on a page.

Begins on fol. 153*a* of the MS. described under No. 759, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Same work as the above.

---

No. **10766.** देवीदिव्यमङ्गलध्यानम्.

DĒVĪDIVYAMAṄGALADHYĀNAM.

Pages, 2. Lines, 19 on a page.

Begins on fol. 53*b* of the MS. described under No. 2886, wherein this work has been mentioned as **Rājarājēśvarīstava** in the list of other works given therein.

Complete.

Same work as the above.

No. 10767. देवीदिव्यमङ्गलध्यानम्.
DĒVĪDIVYAMAṄGALADHYĀNAM.

Pages, 5. Lines, 16 on a page.

Begins on fol. 1*b* of the MS. described under No. 6176 and not on fol. 1*a* as stated therein.

Incomplete.

Same work as the above.

---

No. 10768. देवीदिव्यमङ्गलध्यानम्.
DĒVĪDIVYAMAṄGALADHYĀNAM.

Pages, 7. Lines, 6 on a page.

Begins on fol. 89*a* of the MS. described under No. 673, wherein this work has been mentioned as Rājarājēśvarīstōtra in the list of other works given therein.

Complete.

Same work as the above, but with the addition of two stanzas in the beginning as given below :—

या देवी मधुकैटभप्रमथनी या चण्डमुण्डार्थिनी
* * * *
सा देवी मम पातु पालय परं माता सदा चण्डिका ॥
या देवी शिवकेशवादिजननी या वै जगद्रूपिणी
* * * *
सा पायात्परदेवता भगवती श्रीराजराजेश्वरी ॥

---

No. 10769. देवीपञ्चदशाक्षरीस्तोत्रम्.
DĒVĪPAÑCADAŚĀKṢARĪSTŌTRAM.

Pages, 16. Lines, 4 on a page.

Begins on fol. 28*a* of the MS. described under No. 9123.

Complete.

Stanzas in praise of the goddess Dēvī, each of which begins with the successive letters of the fifteen-syllabled Dēvī Mantra.

**Beginning:**

कल्लोलोल्लसितामृताब्धिलहरीमध्ये विराजन्मणि-
द्वीपे कल्पकवाटिकापरिवृते कादम्बवाटच्योज्ज्वले ।
रत्नस्तम्भसहस्रनिर्मितसभामध्ये विमानोत्तमे
चिन्तारत्नविनिर्मितं जननि घ(ते) सिंहासनं भावये ॥

**End:**

श्रीमन्त्राक्षरमालया गिरिसुतां यः पूजयेच्चेतसा
सन्ध्यासु प्रतिवासरं सुनियतस्तस्यामलस्याचिरात् ।
चित्ताम्भोरुहमण्डले(पे) गिरिसुता नृ(त्यं) विधत्ते सदा
वाणी वक्त्रसरोरुहे सरसिजा गेहे जगन्मङ्गला ॥

---

No. 10770. देवीपञ्चदशाक्षरीस्तोत्रम्.

DĒVĪPAÑCADAŚĀKṢARĪSTŌTRAM.

**Pages, 3. Lines, 11 on a page.**

Begins on fol. 1*a* of the MS. described under No. 2454, wherein this work has been mentioned as Dēvīmānasikapūjā in the list of other works given below.

Complete.

Same work as the above, but with the addition of one stanza at the end as given below :—

हरिपुरन्दरप्रभृतिदैवतं मकुटविस्फुरत्तरणिभासुरम् ।
नमत सन्ततं नमत सन्ततं त्रिपुरसुन्दरी चरणपङ्कजम्॥

---

No. 10771. देवीपञ्चदशाक्षरीकल्याणस्तवः.

DĒVĪPAÑCADAŚĀKṢARĪKALYĀṆASTAVAH.

**Pages, 6. Lines, 16 on a page.**

Begins on fol. 164*a* of the MS. described under No. 424, wherein this work has been mentioned as Pañcadaśīkalyāṇastava in the list of other works given therein.

Complete.

Similar to the above

**Beginning:**

कल्याणोज्ज्वलकार्मुकोद्यतकरामानन्दमन्दस्मितां
कारुण्याङ्कुशपञ्चबाणसहितां कन्दर्पदर्पोज्ज्वलाम् ।
कामाकर्षणदिव्यपाशसुभगां कान्त्योग्रकोटिप्रभां
काञ्चिच्छायतनुप्रभां त्रिनयनां ध्यायेच्छिवां शाम्भवीम् ॥
एकाकारतया प्रपञ्चभरणामेकान्तसंचारिणी-
मेको देव इति प्रसिद्धवचनां प्रख्याताचिन्मातृकाम् ।
एकाराङ्कितबैन्दवीव(सु)रसिकामेणाङ्कचूडप्रिया-
मेकीभूतचराचरात्मनिलयामेकाक्षरीमावहे ॥

**End:**

कल्याणस्तुतिमेव दैत्यमथनं ह्रीङ्कारमन्त्रात्मकं
सर्वाम्नायकरं महत्परधनालङ्कारह्रीङ्कारदम् ।
सार्वज्ञ्यादिसमस्तसिद्धकलनं ह्रीङ्कारसाम्राज्यदं
भक्त्या स्तोत्रमिदं पठिष्यति जनो ह्रीङ्कारमूर्तिः क्षणात् ॥

---

## No. 10772. देवीपञ्चरत्नमाला.

## DEVĪPAÑCARATNAMĀLĀ.

Page, 1. Lines, 6 on a page.

Begins on fol. 39*a* of the MS. described under No. 673.

Complete.

Five stanzas in praise of the goddess Dēvī; attributed to Śaṅkarācārya.

**Beginning:**

तुलाकोटीकोटीकिरणपरिपाटीदिनकरं
नखच्छायामायानवनलिनदायादविभवम् ।
पदं सेवे भाव तव पदविभावे व्यवसितं
जगन्मातः प्रातः कमलमुखि नातः परतरम् ॥

**End:**

अमव्यार्थाबाधापतिनतिसमाधानमुदिता-
मनौपम्यां रम्यां मुनिभिरभिगम्यान्तरकुलाम् ।
निजाविद्यामाद्यां नियतिमनुवेद्यां न कलये
न मातङ्गीमङ्गीकृतसरससङ्गीतरचनाम् ॥

**Colophon:**

इति श्रीमच्छङ्कराचार्यविरचिता पञ्चरत्नमाला संपूर्णा ॥

---

## No. 10773. देवीपञ्चाशद्वर्णमालिकास्तोत्रम्.
## DĒVĪPAÑCĀŚADVARṆAMĀLIKĀSTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 5559.

Complete.

The fifty syllables comprising the Bālā Mantra are introduced in the stanzas of this eulogy. The hymn, if repeated at the time of the study of the Vēdas and at the time of the discussion of the Śāstras, is believed to enable one to come off victorious in disputations held in an assembly.

**Beginning:**

वन्देऽहं वनजेक्षणां वसुमतीं वाग्देविनीं वैष्णवीं
शब्दब्रह्ममयीं शशाङ्कवदनां शातोदरीं शाङ्करीम् ।
षड्बीजां सशिवां समञ्चितपदामाधारचक्रे स्थितां
चिद्रूपां सकलेप्सितार्थवरदां बालां भजे श्यामलाम् ॥

**End:**

बालामालमनोहरं प्रतिदिनं वाञ्छन्ति वाच्यं पठेत्
वेदे शास्त्रविवादकालसमये जित्वा सभामध्यमे ।
पञ्चाशत्स्वरवर्णमालि(मूर्ति)क्रमठे जिह्वाग्रसंस्थे(मश्चे)स्थितां
धर्मार्थाखिलकामवीक्षितपदं सिध्यन्ति मोक्षप्रदाम् ॥

## No. 10774. देवीपञ्चाशद्वर्णमालिकास्तोत्रम्.
## DĒVĪPAÑCĀŚADVARṆAMĀLIKĀSTŌTRAM.

Pages, 7. Lines, 6 on a page.

Begins on fol. 53*a* of the MS. described under No. 3862, wherein this work has been mentioned as Śyāmalāstōtra in the list of other works given therein.

Complete.

Same work as the above.

---

## No. 10775. देवीपञ्चाशद्वर्णमालिकास्तोत्रम्.
## DĒVĪPAÑCĀŚADVARṆAMĀLIKĀSTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 47*a* of the MS. described under No. 235, wherein this work has been mentioned as Bāladhyāna in the list of other works given therein.

Incomplete.

Same work as the above.

---

## No. 10776. देवीस्तोत्रम्.
## DĒVĪSTŌTRAM.

Pages, 4. Lines, 8 on a page.

Begins on fol. 19*a* of the MS. described under No. 6274.

Complete.

A eulogy on the goddess Dēvī.

**Beginning :**

शुक्लाम्बरधरं ( . . . ) विघ्नोपशान्तये ॥
जगन्माता जगद्धात्री जगन्मूर्तिर्जगद्गुरुः ।
सर्वविद्याकलामूर्तिर्मन्त्रतन्त्रस्वरूपिणी ॥

**End :**

सौन्दर्यं राजसाना(सन्मा)नं पुत्रपौत्रप्रवर्धनम् ।
सदा संनिहिता लक्ष्मीर्वरदा मम देवता ॥

## No. 10777. देवीस्तोत्रम्.
## DĒVĪSTŌTRAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 9*b* of the MS. described under No. 2037.

Incomplete.

Similar to the above.

**Beginning:**

पाशाङ्कुशां (च) वरदामभयस्यदायी (प्रदात्रीं)
पीताम्बरां कनकमौक्तिकभूषिताङ्गि(ङ्गीम्) ।
आषोडशाक्षरिकलां प्रतिपन्नराशि-
मेकाक्षरीं त्रिभुवनाधिपतिं नमामि ॥ १ ॥

* * * *

श्रीबालां वकुलां वराहवदनां श्रीसौन्दरीं श्यामलां
मातङ्गीं स्थितिरूपिणीं मधुमतीं वीणावतीं भारतीम् ।
सावित्रीं सकलां हिमाचलसुतां श्रीमद्भकालीकला-
मम्बां कल्पलतां सुरासुरनुतां कामेश्वरीं कामदाम् ॥

**End:**

षट्पुण्डरीकनयनां षडर्धनयनामुमाम् ।
षट्कोणान्तःस्थितां देवी . . . . ॥

---

## No. 10778. परादेवतास्तोत्रम्.
## PARĀDĒVATĀSTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 39*a* of the MS. described under No. 9577.

Complete.

A eulogy on the goddess Parā, who is the same as Dēvī.

**Beginning:**

श्रीकैलासनिवासविराट्स्वरूपविश्वगुरुनिर्माणाधिपरंज्योतिमाग्गलयाश्रि-
तल्याकारिचतुःश्रुतिपरिक्रीडितात्यष्टबीजाक्षरि-

**End:**

त्रिपुरसुन्दरीशतकोशप्रकाशयम[नियम]नियमासनप्राणायामप्रत्याहार-ध्यानधारणशमाद्यष्टाङ्गयोग . . . . . . . . . . . .
पञ्चाक्षरी भास्वत्पञ्चदशीपञ्चाननभगवति नमामि ॥

**Colophon:**

परदेवताप्रसन्नं संपूर्णम् ॥

---

No. **10779.** पुष्पवीराञ्जलिस्तोत्रम्.

PUṢPAVĪRĀÑJALISTŌTRAM.

**Pages, 7.** Lines, 4 on a page.

Begins on fol. 7*a* of the MS. described under No. 5559, wherein this work has been mentioned as Mahiṣāsuramardinīstōtra in the list of other works given therein.

Complete.

Stanzas in praise of Dēvī followed by worship of the goddess with flower offerings: by Śaṅkarācārya.

**Beginning:**

अयि गिरिनन्दिनि नन्दितमोदिनि विश्वविनोदिनि नन्दिनुते
गिरिवरविन्ध्यशिरोऽधिनिवासिनि विष्णुविलासिनि जिष्णुनुते ।
भगवति हे शितिकण्ठकुटुम्बिनि भूरिकुटुम्बिनि भूरिकृते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

**End:**

स्तुतिमिति स्तिमितस्तु समाधिना नियमतो[नि]यमतोऽनुदिनं पठेत् ।
परमया रमया स निषेव्यते परिजनोऽरिजनोऽपि च तं व्रजेत् ॥

* * * *

**Colophon:**

इति श्रीमच्छङ्कराचार्यविरचितस्तवनम् ॥

---

No. **10780.** पुष्पवीराञ्जलिस्तोत्रम्

PUṢPAVĪRĀÑJALISTŌTRAM.

Pages, 6. Lines, 7 on a page.

Begins on fol. 45*a* of the MS described under No. 2040.

Almost complete.



23615

Same work as the above, but with a different colophon as given below:—

इति श्रीपरमहंसपरिव्राजकाचार्यविरचितं पुष्पवीराञ्जलिस्तोत्रं संपूर्णम् ॥

---

No. 10781. प्रतिक्रियाशूलिनीविश्वरूपस्तोत्रम्.

PRATIKRIYĀŚŪLINĪVIŚVARŪPASTŌTRAM.

Pages, 2. Lines, 19 on a page.

Begins on fol. 15*a* of the MS. described under No. 2886.

Complete; as found in the eighth Upadēśa of the Ākāśabhairavakalpa.

In propitiation of the goddess Durgā, who is called Pratikriyāśūlinī because the due repetition of the hymn addressed to her is believed to counteract the effects of hostile Mantras and Tantras.

**Beginning:**

अस्य श्रीप्रतिक्रियाशूलिनीदुर्गास्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, प्रतिक्रियाशूलिनीदुर्गा देवता, दुं बीजम्, स्वाहा शक्तिः, प्रतिक्रियाशूलिनीदुर्गाप्रीत्यर्थे परप्रयुक्तमन्त्रतन्त्रक्षुद्रादिशान्त्यर्थे जपे विनियोगः ।

* * * *

देव्युवाच—

सर्वसिद्धिप्रदायिन्याः शूलिन्याः सर्वबोधकाः ।
विश्वरूपस्तुतिं श्रोतुमिच्छाम्यहमिहादरात् ॥

* * * *

श्रीमये जगदाधारे जगदैश्वर्यसिद्धिदे ॥
वरदे शूलिनि दुर्गे महाभैरवि पाहि माम् ।
अमृते अमृतोद्भूते अमृताप्लाविताखिले ॥

**End:**

इति परमरहस्यस्तोत्रमेतत्परायण(त्पुराणं)
प्रथितमुषसि भक्त्या ध्यानपूर्वं जपेद्यः ।
जगति निखिलभाग्यं दीर्घमायुः सुपुत्रान्
विपुलविमलकीर्तिं प्राप्य मुक्तो भवेत्सः ॥

**Colophon:**

इत्याकाशभैरवकल्पे विश्वरूपस्तुतिर्नामाष्टमोपदेशः ॥

---

No. **10782.** प्रतिक्रियाशूलिनीस्तोत्रम्.

PRATIKRIYĀŚŪLINĪSTŌTRAM.

Pages, 7. Lines, 5 on a page.

Begins on fol. 75*a* of the MS. described under Nos. 537 and 7247.

Complete.

Similar to the above.

**Beginning:**

अस्य श्रीशूलिनीदुर्गापरमेश्वरी(स्तोत्र)महामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीशूलिनीदुर्गापरमेश्वरी देवता ।

* * * *

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यमनुत्तमम् ।
प्रतिक्रियाशूलिनीयं स्तोत्रं यन्त्रमभीष्टदम् ॥

* * * *

जगद्धिते जगन्मातर्जगन्नेत्रे जगन्मये ।
जगद्दुरितजालेभ्यो रक्ष मामहितान् हर ॥

**End:**

प्रतिक्रियास्तोत्रमिदं रहस्यं जपेद् द्विसन्ध्यं प्रतिवासरं यः ।
अवाप्य कामानखिलान्मनीषी (वि)भाव्यते मुक्तिमुपैति नित्यम् ॥

* * * *

**Colophon:**

इति महाभैरवतन्त्रेऽतिरहस्ये प्रत्यक्षसिद्धिप्रदे आकाशभैरवकल्पे उमामहेश्वरसंवादे प्रतिक्रियास्तोत्रं नाम द्वाविंशोपदेशः ॥

---

No. **10783.** प्रतिक्रियाशूलिनीस्तोत्रम्.

PRATIKRIYĀŚŪLINĪSTŌTRAM.

Pages, 16. Lines, 6 on a page.

Begins on fol. 14*b* of the MS. described under No. 6025.

Complete.

Same work as the above.

---

No. **10784.** प्रतिक्रियाशूलिनीस्तोत्रम्.

PRATIKRIYĀŚŪLINĪSTŌTRAM.

Pages, 8. Lines, 14 on a page.

Begins on fol. 154*b* of the MS. described under No. 5673, wherein this work has been mentioned as Śūlinīpratikriyā in the list in other works given therein.

Complete.

Same work as the above, but with the addition of one stanza in the beginning as given below :—

श्रीदेव्युवाच—

श्रीमत्सकलसूक्ष्मैकबोधकेश जगत्पते ।
प्रतिक्रियास्तोत्रमन्त्रं प्रब्रुवस्व दयानिधे ॥

---

No. **10785.** प्रत्याङ्गिरास्तोत्रम्.

PRATYAṄGIRĀSTŌTRAM.

Pages, 4. Lines, 10 on a page.

Begins on fol. 33*a* of the MS. described under No. 4338.

Complete.

Stanzas of praise and prayer addressed to the goddess Pratyaṅgirā, a manifestation of Śakti, the repetition of which is said to enable one to cause the destruction of one's enemies.

**Beginning:**

अस्य श्रीप्रत्याङ्गिरास्तोत्रमन्त्रस्य अङ्गिरा ऋषिः, अनुष्टुप् छन्दः, प्रत्यङ्गिरा देवता,

* * * *

कृष्णवर्णां बृहद्रूपां रक्तकुञ्चितमूर्धजाम् ।
शिरः कपालमालां च विकेशीघूर्णिताननाम् ॥

**End:**

किमत्र बहुनोक्तेन रहस्यं न हि तादृन(शम्) ।
सहस्रं प्रजपेद्विद्वान् शत्रून् संहरते ध्रुवम् ॥

**Colophon:**

प्रत्यङ्गिरास्तोत्रं संपूर्णम् ॥

---

No. **10786.** प्रत्यङ्गिरास्तोत्रम्.
PRATYAṄGIRĀSTŌTRAM.

Pages, 4. Lines, 10 on a page.
Begins on fol. 18*a* of the MS. described under No. 4338.
Complete.
Same work as the above, but with a different end as given below:—

काली करालविक्रान्ते काशिके पापहारिणि ।
विकरालमुखे देवि ज्वालामुखि नमोऽस्तु ते ॥

---

No. **10787.** प्रत्यङ्गिरास्तोत्रम्.
PRATYAṄGIRĀSTŌTRAM.

Pages, 2. Lines, 10 on a page.
Begins on fol. 83*a* of the MS. described under No. 4338.
Complete.
Same work as the above, but with a different end as given below:—

काली करालवदने कपर्दिकृतमालिके ।
गाढान्धकारसंकाशे मम शत्रून्निबर्हय ॥

## No. 10788. प्रत्यङ्गिरास्तोत्रम्.
## PRATYAṄGIRĀSTŌTRAM.

Pages, 2. Lines, 12 on a page.

Begins on fol 35*a* of the MS. described under No. 4538 and not on fol. 36*a* as stated therein.

Incomplete.

A eulogy on the goddess Pratyaṅgirā, a manifestation of Śakti, thedue repetition of which is considered to be efficacious in the accomplishment of one's desires.

**Beginning:**

अस्य श्रीप्रत्यङ्गिरासम्मेलनस्तोत्रमहामन्त्रस्य महादेव ऋषिः, अनुष्टुप् छन्दः, प्रत्यङ्गिरा देवता । इष्टकाम्यार्थे जपे विनियोगः ।

मन्दरस्थं सुखासीनं भगवन्त महेश्वरम् ।
समुपागम्य चरणौ भवानी पर्यपृच्छत ॥
श्रीदेवी दारुणा विद्या प्रत्यङ्गिरमहोदया ।
नरनारीहितार्थायाचलानां रक्षणाय च ॥

राज्ञां मण्डलितानां च दीनानां च महेश्वरि ।
विदुषां च द्विजातीनां विशेषेणार्थसिद्धिनी ॥

महाभयेषु घोरेषु विद्युदग्निभयेषु च ।
व्याघ्रदंष्ट्राखना(नखा)घाते नदीनदसमुद्रके ॥

अभिचारेषु सर्वेषु युद्धे भज भयेषु च ।
सौभाग्यजननी नित्यं नृणां वधकरी तथा ॥

तां विद्यां भो सुराधीश कथयस्व महाप्रभो ।
साधु साधु महाभागे जनानां हितकारिणि ॥

तां विद्यां भूसुराध्यक्षे कथयामि समन्ततः ।
देवि प्रत्यङ्गिरे विद्या सर्वग्रहनिपातिनी ॥
स्त्रीबालप्रभृतीनाञ्च जन्तूनां हितकारिणि ॥

**End:**

विलयं यान्ति रिपवः प्रत्याङ्गिरविधारणात् ।
यद्यत् स्पृशति हस्तेन यद्यत् खादति जिह्वया ॥
अमृतत्वं भजेत् सर्वं नापमृत्युः कदाचन ।
कर्मणा यो .

---

No. 10789. बगलामुखीध्यानम्.
BAGALĀMUKHĪDHYĀNAM.

Pages, 2. Lines, 19 on a page.

Begins on fol. 106*a* of the MS. described under No. 524.

Complete.

Similar to the work described under R.No. 538 of the Triennial Catalogue of MSS., Vol. I, Part I-B.

**Beginning:**

पीताम्बरपरीधानां पीनोन्नतपयोधराम् ।
जटामकुटशोभाढ्यां पीतभूमिमुदावहाम् ॥

**End:**

वन्दे वारिजलोचनां वसुकरां पीताम्बराडम्बरां
पीताम्भोरुहसंस्थितां त्रिनयनां पीताङ्गरागोज्ज्वलाम् ।
शब्दब्रह्ममयीं महेशविजयीं त्रैलोक्यसंमोहनीं
विद्युत्कोटिनिभां प्रसन्नबगलां प्रत्यर्थिवाक्स्तम्भिनीम् ॥

---

No. 10790. बगलामुखीस्तोत्रम्.
BAGALĀMUKHĪSTŌTRAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 103*a* of the MS. described under Nos. 537 and 7247

Complete.

Similar to the above.

**Beginning:**

अस्य श्रीबगलामुखी(स्तोत्र)महामन्त्रस्य भगवान् नारद ऋषिः, अतिजगती छन्दः, श्रीबगलामुखी देवता ।

* * * *

पीताम्बरां त्रिनेत्रां च द्विभुजां दाहिकोज्ज्वलाम् ।
शिलापर्वतहस्तां च रिपुकम्पां महोत्कराम् ॥

**End:**

नित्यं यस्तु मनोहरं स्तवमिमं दिव्यं पठेत्सादरं
धृत्वा यन्त्रमिदं तदैव समरे बाह्वोः करे वा गले ।
राजानो वरयोषितोऽथ करिणः सर्वे मृगेन्द्राः खगाः
ते वै यान्ति विमोहिता रिपुगणा लक्ष्मीः स्थिरा सिद्धयः ॥

* * * *

विद्या लक्ष्मीम(: संपदा)रोग्यता च पुत्राः सम्यग्राज्यमिष्टार्थसिद्धिः ।
मानः श्रेयो वश्यमारोग्यता च प्राप्तं सर्वं भूतले साधकेन ॥

**Colophon:**

इति श्रीबगलामुखीस्तोत्रं संपूर्णम् ॥

---

No. **10791.** बन्दीस्तोत्रम्.

BANDĪSTŌTRAM.

Pages, 10. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 5819.

Complete.

A eulogy on the goddess Bandī, a manifestation of Śakti, the repetition of which is believed to have the power to free one from enchained bondage.

**Beginning:**

इन्द्र उवाच—

प्रसादं कुरु देवेशि देहि मे स्तवमुत्तमम् ।
बन्दीप्रसादजननं रहस्यं बन्धमोचनम् ॥

नारदः—

आदिशक्त्यै नमस्कृत्य योगनिद्रां गता यया ।
बन्दीस्तोत्रं प्रवक्ष्यामि स्वयमुक्तं स्वयंभुवा ॥

* * * *

श्वेतपद्मवनासीना मौक्तिकाभरणा तथा ।
नीलोत्पलदलश्यामा विनिद्राम्बुजलोचना ॥

**End:**

भक्त्याख्यमङ्गला पूर्णा निजपादाम्बुजद्वयम् ।
वन्दे बन्दीं कृपामूर्तिं भक्तबन्धविमोचनीम् ॥

**Colophon:**

इति बन्दीस्तोत्रं समाप्तम् ॥

---

No. **10792.** बालाष्टकम्.

BĀLĀṢṬAKAM.

**Pages**, 2. Lines, 5 on a page.

Begins on fol. 10*a* of the MS. described under No. 10358.

Complete.

Eight stanzas in praise of Bālā, who is also a manifestation of Śakti.

**Beginning:**

वरदाभयपुस्तकाक्षमालाविलसत्पाणिसरोजभासमानाम् ।
शरदिन्दुसहस्रकोटिसाम्यां परमानन्दमयीं प्रणौमि बालाम् ॥

**End:**

इति शङ्करमानिनीकटाक्षादपि बालाष्टकमीरितं मृडान्याः ।
पठितं पुरतोऽर्चनावसाने सुकुमार्याः सह संपदा समेति ॥

---

No. **10793.** बालाष्टकम्.

BĀLĀṢṬAKAM.

**Pages**, 5. Lines, 5 on a page.

Begins on fol. 86*a* of the MS. described under No. 4384.

Incomplete.

Same work as the above.

## No. 10794. बालास्तवः.
## BĀLĀSTAVAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 277*b* of the MS. described under Nos. 537 and 7247, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

A eulogy on the goddess Bālā, who is a manifestation of Śakti.

**Beginning** and **End**:

बालां बालेन्दुमौलिं भवतिमिरहरीं ब्रह्मविद्याविनोदीं
विश्वं विश्वोपकारीं विदितशतमुखीं विश्वरूपीं प्रतापीम् ।
शङ्काटंकारदूरीं सकलवशकरीं शाङ्करीं कुङ्कुमाङ्गी-
मम्बां बिम्बाधरोष्ठीमखिलवशकरीमादिबालां नमामि ॥
अरिशङ्खकृपाणखेटबाणान् सधनुश्शूलकपालमालिकां दधाना ।
भजतां महिषोत्तमाङ्गसंस्था नवदूर्वासदृशी श्रियेऽस्तु दुर्गा ॥

---

## No 10795. बालास्तवः.
## BĀLĀSTAVAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 22*a* of the MS. described under No. 17.

Complete.

Same work as the above.

---

## No. 10796. बालास्तवः.
## BĀLĀSTAVAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 22*a* of the MS. described under No. 5559, wherein this work has been mentioned as Tryakṣarastōtra in the list of other works given therein.

Complete.

Similar to the above.

**Beginning:**

या माया मधुकैटभप्रमथनी या माहिषोन्मूलनी
या धूम्रेक्षणि चण्डमुण्डमथनी या रक्तबीजासनी ।
या शुम्भाद्यनिशुम्भदर्पदमनी या सिद्धलक्ष्मी(:) परा
सा देवी नवकोटिशक्तिसहिता मां पातु विश्वेश्वरी ॥

**End:**

ऐंक्लींसौर्बीजमुख्यां हिमकर(घर)हृज्ज्योतिरूपप्रभावां
हृद्यांक्षां मन्त्रशक्तिं प्रणवसुसहितं बिन्दुनादान्तमौलिम् ।
* * * *
क्रांक्लींक्लोंशत्रुनाशं सकलभयहरीं कारिणीं श्रीं नमस्ते ॥

---

## No. 10797. बालास्तवः.
## BĀLĀSTAVAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 277*a* of the MS. described under Nos. 537 and 7247, wherein this work has been mentioned as Dēvīstava in the list of other works given therein.

Complete.

Same work as the above.

---

## No. 10798. बालास्तवः.
## BĀLĀSTAVAḤ.

Substance, palm-leaf. Size, 7⅛ × 1⅜ inches. Pages, 14. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Bālāstava 7*b*, Kālikāstōtra 9*a*.

Complete.

Similar to the above.

**Beginning:**

श्रीकण्ठप्रियभामिनीं करलसन्माणिक्यसद्वल्लकीं
कस्तूरीतिलकप्रभासिनिटिलां कल्याणचेलोज्वलाम् ।
कारुण्यायतवीक्षणां कलिभयध्वस्तां कलाशोभिनीं
प्रालेयाचलबालिकां शशिमुखीं बालां भजेऽहं सदा ॥

**End:**

हालापानमदालसां हरिहरब्रह्मादिसंशोभितां
हल्लीखेलनहर्षणीं हलधरस्तुत्यां हलोग्रासुराम् ।
हर्यक्षस्फुटवाहनां हरिणनेत्रां हारसंशोभितां
प्रालेयाचलबालिकां शशिमुखीं बालां भजेऽहं सदा ॥

---

No. 10799. बालास्तवः.

BĀLĀSTAVAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 69*a* of the MS described under No. 5660

Incmplete.

Same work as the above.

---

No. 10800. बालास्तवः.

BĀLĀSTAVAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 7*b* of the MS described under No. 10798.

Complete.

Similar to the above.

**Beginning:**

श्रीमन्मातङ्गतनयां श्रीदुर्गाशारदात्मिकाम् ।
श्रीचक्रसंस्थितां वन्दे श्रीबालापरमेश्वरीम् ॥

**End:**

नवपल्लवतुल्याङ्गीं नवमाणिक्यभूषिताम् ।
नवब्रह्ममयीं वन्दे श्रीबालापरमेश्वरीम् ॥

## No. 10801. बालास्तवः.
## BĀLĀSTAVAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 14*a* of the MS. described under No. 2037.

Wants beginning and end.

Similar to the above.

**Beginning:**

. . . . मोचयतु मां मुक्काताटङ्कमुग्धहसितं ते ॥
श्यामलिमसौकुमार्यौ सौन्दर्यानन्दसंपदोन्मेषाम् ।
तरुणीं करुणापूरां मदजलकल्लोललोचनां वन्दे ॥

**End:**

माया कुण्डलिनी क्रिया मधुमती काली कला मालिनी
मातङ्गी विजया जया भगवती देवी शिवा शाम्भवी ।
शक्तिः शंकरवल्लभ(भा) त्रिनयना वाग्वादिनी भैरवी
ओंकारी त्रिपुरा परापरमयी माता कुमारीत्यशी(श्वरी) ॥

---

## No. 10802. बालास्तवराजः.
## BĀLĀSTAVARĀJAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 248*b* of the MS. described under Nos. 537 and 7247.

Complete; as found in the Bhairavayāmala.

Similar to the above.

**Beginning:**

सुधासागरमध्ये तु कल्पवृक्षवनान्तरे ।
मणिद्वीपे महासौख्ये चिन्तामणिगृहान्तरे ॥

* * * *

बिन्दुमध्ये महादेवी कौमारी च सुखप्रदा ।

सर्वलक्षणसंपन्नां तेजोरूपवराङ्गनाम् ।
सुप्रसन्नां भजेद्बालां वरदाभयपुस्तकाम् ॥

**End:**

एव क्रमेण पूजां च देवि पूजां च सर्वदा ।
नित्यं यः पूजयेद्भक्त्या स विद्वान्नात्र संशयः ॥

**Colophon:**

इति श्रीभैरवयामले बालास्तवराजः संपूर्णः ॥

---

No 10803. बालास्तवराजः.
BĀLĀSTAVARĀJAḤ.

Pages, 3. Lines, 14 on a page.

Begins on fol. 263*b* of the MS. described under No. 424.

Complete.

Same work as the above.

---

No. 10804. बालास्तवराजः.
BĀLĀSTAVARĀJAḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 75*b* of the MS. described under No. 4384 and not on fol. 72*a* as stated therein.

Complete.

Same work as the above.

---

No. 10805. बालास्तवराजः.
BĀLĀSTAVARĀJAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 16*b* of the MS. described under No. 6192.

Complete.

Same work as the above.

## No. 10806. भुवनेश्वरीस्तोत्रम्.
## BHUVANĒŚVARĪSTŌTRAM.

Pages, 3. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 5559.

Complete.

A eulogy on the goddess Bhuvanēśvarī, who is a manifestation of Śakti and who is here praised as the over-lord of the world.

**Beginning:**

सहस्रदलपङ्कजे सह शिवेन राजत्कलां
शिरीषसुमकोमलां समदघूर्णनेत्राञ्चलाम् ।
महार्घमणिकुण्डलां महिमसंनुताखण्डलां
जयाय भुवनेश्वरीं जगदधीश्वरीमाश्रये ॥
पुलोमतनयार्चितां प्रथितरत्नसत्पादुकां
मनोज्ञमणिचित्रितामितसुवर्णसद्वेदिकाम् ।
नमस्कृतसुराङ्गनां सकलसम्पदामोदिकां
जयाय भुवनेश्वरीं जगदधीश्वरीमाश्रये ॥

**End:**

समस्तमहिमान्विते सकललोकसंमानिते
प्रसिद्धगिरिकन्दरे सकलमौनिसन्मन्दिरे ।
श्रिया युतनगोत्तमे स्थितबुधोत्तमे संस्थितां
जयाय भुवनेश्वरीं जगदधीश्वरीमाश्रये ॥

---

## No. 10807. मकरन्दस्तवः.
## MAKARANDASTAVAḤ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 48*a* of the MS. described under No. 2040.

Complete.

Sweet-sounding stanzas of prayer and of praise addressed to the goddess Śakti.

**Beginning:**

श्रीबीजे नादबिन्दुद्वितयशशिकलाकाररूपस्वरूपे
मातर्मे देहि बुद्धिं जहि जहि दुरितं पाहि मां दीननाथे ।
अज्ञानध्वान्तराशिक्षयरुचिरुचिरे प्रोल्लसत्पादपद्मे
ब्रह्मेशाद्यैः सुरेन्द्रैः सुरगणनमितैः संस्तुतां त्वां स्मरामि ॥

**End:**

श्रीबीजे श्रीस्वरूपे मधुरिपुमनसो मध्यमध्यासिता त्वं
मातस्त्वदृष्टिलेशादमरपतिरसौ प्राप्तवान् बु(बृ)द्धिरे(मे)षः ।
इत्येवं षोडशार्णं पठति मनुदिनं(वरं) स्वर्गमोक्षैकहेतुं
सिद्धीरष्टौ लभन्ते इ(त्वि)ह मनुवरदं श्रेष्ठमेते लभन्ते ॥

**Colophon:**

मकरन्दस्तवः कालिदासप्रोक्तः ॥

---

No. 10808. महात्रिपुरसुन्दरीनवरत्नमाला.

MAHĀTRIPURASUNDARĪNAVARATNAMĀLĀ.

Page, 1. Lines, 10 on a page.

Begins on fol. 200*b* of the MS. described under No. 124, wherein this work is called Lalitānavaratnamālikā in the list of other works.

Complete.

Nine excellent stanzas in praise of the goddess Mahātripurasundarī, who is a manifestation of the goddess Śakti: by Annabhōja.

**Beginning:**

श्रीलक्ष्मीशसहोदरीमगसुतां शृङ्गारपाथोनिधिं
भक्ताभीष्टफलप्रदां स्मितमुखीं बन्धूकपुष्पप्रियाम् ।
नानाभूषणभूषिताङ्गलतिकां नागेन्द्रकुम्भस्तनीं
वन्दे श्रीत्रिपुराम्बिकां शिवसतीं देवीं जगन्मातृकाम् ॥

**End:**

जननि विरचिताभूत्संस्तुतिर्वै मयेयं
समधुरवचनं ते रत्नमालाभिधाना ।

सकलसुकविमित्रेणान्नभोजाह्वयेन
प्रणवमयि फलस्य प्राप्तये वाञ्छितार्थम् ॥

**Colophon:**

इति श्रीमहात्रिपुराम्बानवरत्नमालास्तुतिः समाप्ता ॥

---

No. **10809.** महात्रिपुरसुन्दरीवेदपादस्तवः.

MAHĀTRIPURASUNDARĪVĒDAPĀDASTAVAḤ.

Substance, paper. Size, 8 × 6⅜ inches. Pages, 22. Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

A eulogy on Dēvī by Śaṅkarācārya. The fourth Pāda of each stanza in this work is a quotation from the Vēdas.

**Beginning:**

शङ्करः शङ्कराचार्यो भूत्वा त्रिपुरसुन्दरीम् ।
स्तोत्रेण वेदपादेन तुष्टाव जगदम्बिकाम् ॥
वेदपादस्तवं वक्ष्ये देव्याः प्रियचिकीर्षया ।
यथामति मतिं देवस्तन्नो दन्तिः प्रचोदयात् ॥

* * * *

अकारादिक्षकारान्तवर्णावयवशालिनी ।
वीणापुस्तकहस्ताव्यात्प्र णो देवी सरस्वती ॥

**End:**

त्वामेवाहं स्तौमि नित्यं प्रणौमि श्रीविद्येशां वच्मि संचिन्तयामि ।
अध्यास्ते या विश्वमाता विराजो हृत्पुण्डरीकं विरजं विशुद्धम् ॥
शङ्करेण रचितं स्तवोत्तमं यः पठेज्जगति भक्तिमान्नरः ।
तस्य सिद्धिरतुला भवेद्ध्रुवा सुन्दरी च सततं प्रसीदति ॥
यत्रैव यत्रैव मनो मदीयं तत्रैव तत्रैव तव स्वरूपम् ।
यत्रैव यत्रैव शिरो मदीयं तत्रैव तत्रैव पदद्वयं ते ॥

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्य-श्रीमच्छङ्करभगवत्पादाचार्यकृतं श्रीमहात्रिपुरसुन्दरीवेदपादस्तोत्रं संपूर्णम् ॥

---

No. **10810.** मातङ्गीपुष्पाञ्जलिः.

MĀTAṄGĪPUṢPĀÑJALIḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 189*b* of the MS. described under No. **5673.**

Complete.

Stanzas in praise of the goddess Mātaṅgī, a manifestation of Śakti, followed by flower offerings. She is said to have been born as the daughter of a sage named Mataṅga.

**Beginning:**

जय देवि विशालाक्षि जय सर्वेश्वरी जय ।
जयाञ्जनागिरिप्रख्ये महादेवि प्रियंकरि ॥
महाविश्वेशदयिते जय ब्रह्मादिपूजिते ।
पुष्पाञ्जलिं प्रदास्यामि गृहाण कुलनायिके ॥

**End:**

महामातङ्गि पादाब्जं तव नित्यं नमाम्यहम् ।
एतदुक्तं महादेव्या मातङ्ग्याः स्तोत्रमुत्तमम् ॥
सर्वकामप्रदं नित्यं यः पठेन्मानवोत्तमः ।
* * * *
अन्ते शिवत्वमाप्नोति नात्र कार्या विचारणा ॥

---

No **10811.** मातङ्गीस्तोत्रपुष्पाञ्जलिः.

MĀTAṄGĪSTŌTRAPUṢPĀÑJALIḤ.

Pages, 5. Lines, 16 on a page.

Begins on fol. 25*b* of the MS. described under No. **424.**

Complete.

Similar to the above.

**Beginning:**

अस्तु नानाविधं शस्तु(स्तं) वस्तुना वैणिकेन वः ।
अमृताम्बुनिधेर्मध्ये माणिक्यद्वीपमाश्रये ॥

* * * *

तस्य मध्ये कृतावासामसाधारणवैभवाम् ।
इन्दुरेखावतीमेणीलोचनां वेणिशालिनीम् ॥

**End:**

संविन्मकरन्दद्रवसन्तोषितसाधकेन्द्रबृन्दकुलः ।
क्रमपुष्पाञ्जलिरेष (क)मतां मातङ्गकन्यकादयया ॥

---

No. **10812.** रजस्वलास्तोत्रम्.

RAJASVALĀSTŌTRAM.

**Pages, 2.** Lines, 5 on a page.

Begins on fol. 210*a* of the MS. described under No. 5661.

Complete.

A eulogy on the goddess Rajasvalā, a manifestation of Śakti.

**Beginning:**

रजस्वल(ला)मुखं दृष्ट्वा सर्वपापैः प्रमुच्यते ।
समासने कृते राज्यं सोमयागफलं लभेत् ॥

**End:**

कालिकायाः स्तवं पुण्यं यः स्मरेत्सोऽपि दुर्लभः ।
रजस्वलासमीपे च पठते सर्वसिद्धिदा ॥

* * * *

तस्मात्सर्वप्रयत्नेन देवीं गोप्यं पठेन्नरः ॥

**Colophon:**

इति श्रीकालिकाप्रस्तावे ईश्वरगिरिजासंवादे रजस्वलास्तोत्रं संपूर्णम् ॥

---

No. **10813.** रजस्वलास्तोत्रम्.

RAJASVALĀSTŌTRAM.

**Pages, 3.** Lines, 5 on a page.

Begins on fol. 2*b* of the MS. described under No. 5686.

Complete.

Same work as the above.

### No. 10814. रजस्वलास्तोत्रम्.
### RAJASVALĀSTŌTRAM.

Pages, 5. Lines, 23 on a page.

Begins on fol. 45*a* of the MS. described under No. 2961.

Complete.

Similar to the above. The first stanza given in the extract shows how the goddess Rajasvalā should be conceived by the supplicant for meditation purposes.

**Beginning:**

अस्य श्रीरजस्वलास्तोत्रमहामन्त्रस्य, ईश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीरजस्वला देवता ।

* * * *

बालार्ककोटिवर्णाभां फा(बा)लचन्द्रनिभाननाम् ।
अनन्तबाणसहितां ध्याये देवीं रजस्वलाम् ॥

**End:**

अप्रकाश्यं स्वपुत्राय गोप्याद्गोप्यं कृते शुभे ।
प्रमादेन प्रकाशयन्ते सद्यो मृत्युर्न संशयः ॥

**Colophon:**

इति कालिकाप्रस्तावे रुद्रयामले ईश्वरपार्वतीसंवादे परमरहस्ये रजस्वलास्तोत्रे अष्टाविंशः पटलः ॥

---

### No. 10815. रजस्वलास्तोत्रम्.
### RAJASVALĀSTŌTRAM.

Pages, 5. Lines, 7 on a page.

Begins on fol. 55*a* of the MS. described under No. 2040, wherein it is given as Rajasvalāmantra in the list of other works.

Complete.

Same work as the above, but with a different end as given below:—

दद्याच्छिष्याय शान्ताय तत्तन्मन्त्रयुतानि च ।
गुरुभक्ताय दातव्यमायुर्भाग्यं च विन्दति ॥

No. **10816.** रजस्वलास्तोत्रम्.

RAJASVALĀSTŌTRAM.

**Pages, 5.** Lines, 16 on a page.

Begins on fol. 275*b* of the MS. described under No. 424.

Complete.

Same work as the above.

---

No. **10817.** रश्मिमालास्तोत्रम्.

RAŚMIMĀLĀSTŌTRAM.

**Pages, 7.** Lines, 14 on a page.

Begins on fol. 19*a* of the MS. described under No. 424.

Complete.

A eulogy on the goddess Raśmimālā (a manifestation of Śakti) probably so called on account of her brilliant appearance. She is also identified with the goddess Gāyatrī or Sāvitrī.

**Beginning:**

असङ्ख्यातमहःपुञ्जपिञ्जरीकृतदिङ्मुखाम् ।
रश्मिमालामयीं वन्दे महात्रिपुरनायिकाम् ॥
अक्षस्रक्कुण्डिकाहस्तां शुद्धस्फटिकसंनिभाम् ।
सर्वविद्यामयीं वन्दे गायत्रीं वेदमातरम् ॥

**End:**

यो रश्मिमालास्तुतिमित्युदग्रां तल्पात्समुत्थाय जपेत् प्रभाते ।
सर्वस्य सिद्धिस्पृहणीयमूर्तिर्विपत्तिमुक्तो विजयी च जीयात् ॥

**Colophon:**

इति राश्मिमालास्तोत्रं संपूर्णम् ॥

---

No. **10818.** रश्मिमालास्तोत्रम्.

RAŚMIMĀLĀSTŌTRAM.

**Pages, 3.** Lines, 10 on a page.

Begins on fol. 169*a* of the MS. described under No. 124.

Complete.

Same work as the above.

No. **10819.** रश्मिमालास्तोत्रम्.
RAŚMIMĀLĀSTŌTRAM.

**Pages, 2.** Lines, 6 on a page.

Begins on fol. 62*a* of the MS. described under No. 3472.

Complete.

Similar to the above.

**Beginning:**

ब्रह्मर्षे सर्वसर्वज्ञ शृणुष्वावहितो भवान् ।
चिदङ्गभूतां वक्ष्यामि नामतो रश्मिमालिकाम् ॥
माता समस्तवेदानामाद्या गायत्र्युदीरिता ।
अभयङ्करविद्याथ सावित्री देवता परा ॥

**End:**

अनेन सम्यगासीनः संस्मरेद्रश्मिमालिकाम् ।
साक्षाद्ब्रह्ममयो भूत्वा जीवन्मुक्तस्सुखी भवेत् ॥
* * * *
स भुक्त्वा सकलान् कामान् याति ब्रह्म सनातनम् ॥

---

No. **10820.** राजराजेश्वरीस्तोत्रम्.
RĀJARĀJĒŚVARĪSTŌTRAM.

**Pages, 8.** Lines, 5 on a page.

Begins on fol. 39*a* of the MS. described under No. 8827, wherein this work has been omitted to be included in the list of other works given therein.

Complete.

Stanzas of prayer and praise addressed to Rājarājēśvarī (a manifestation of Śakti) for securing her protection. The second stanza in the beginning describes the form in which she has to be conceived.

**Beginning:**

या देवी शिवकेशवादिजननी या वै जगन्मोहिनी
या ब्रह्मादिपिपीलिकादि(न्त)जगदानन्दैकसन्दायिनी

या चञ्चत्प्रणवाद्विरेफनलिनी या मालिनी चित्कला
सा पायात् परदेवता भगवती श्रीराजराजेश्वरी ॥
चतुर्भुजान्त्रिनयनां कमलासनसंस्थिताम् ।
त्रिशूलं पानपात्रञ्च गदां जिह्वाञ्च बिभ्रतीम् ॥

**End:**

हरार्धभागनिलयामम्बामम्बुजलोचनाम् ।
श्रियं हरिप्रियां वन्दे देवीन्त्रिपुरसुन्दरीम् ॥

---

No. **10821.** राजराजेश्वरीस्तोत्रम्.
RĀJARĀJEŚVARĪSTŌTRAM.

**Pages, 9. Lines, 6 on a page.**

Begins on fol. 69*a* of the MS. described under No. 5987.
Complete.
Similar to the above. By Śaṅkarācārya.

**Beginning:**

कल्याणायुतपूर्णबिम्बवदनां पूर्णेश्वरानन्दिनीं
पूर्णापूर्णपरम्परेषु(राशु) महिषीं पूर्णामृतास्वादिनीम् ।
संपूर्णा परमोत्तमामृतकरां विद्यावतीं भारतीं
श्रीचक्रप्रियबिन्दुतर्पणवहां श्रीराजराजेश्वरीम् ॥

**End:**

ह्रींकूटत्रयरूपिणीं समयिनीं संसारिणीं हासिनीं
वामाचारपरायणीं सुकुलजां बीजावतीमद्रिजाम् ।
कामाक्षीं करुणार्द्रचित्तसरितं श्रींश्रींत्रिमूर्त्यम्बिकां
श्रीचक्रप्रियबिन्दुतर्पणवहां श्रीराजराजेश्वरीम् ॥
या देवी शिवकेशवादिजननी या वै जगन्मोहिनी
या ब्रह्मादिपिपीलिकान्तजगदानन्दैकसंदायिनी ।

या पञ्चप्रणवद्विरेफनलिनी या चित्कला मालिनी
सा पायात्परदेवता भगवती श्रीराजराजेश्वरी ॥

**Colophon :**

इति श्रीशंकराचार्यविरचितं श्रीराजराजेश्वरीस्तोत्रं संपूर्णम् ॥

---

No. **10822.** राजराजेश्वरीस्तोत्रम्.

RĀJARĀJEŚVARĪSTŌTRAM.

**Pages**, 5. Lines, 16 on a page.

Begins on fol. 168*a* of the MS. described under No. 424.

Complete.

Same work as the above, but with a different stanza at the end as given below :—

राजराजेश्वरीं राजीवलोचनां बिन्दुमध्यालयां बन्धूकराजितां भीमाट्टहासिनीं शत्रुसंहारिणीं शाम्भवीमाश्रये ॥

**Colophon :**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितं पञ्चदशी-(राजराजेश्वरी)स्तोत्रं संपूर्णम् ॥

---

No. **10823.** राजराजेश्वर्यष्टकम्.

RĀJARĀJĒŚVARYAṢṬAKAM.

**Pages**, 3. Lines, 4 on a page.

Begins on fol. 5*a* of the MS. described under No. 5559.

Complete in eight stanzas.

Similar to the above.

**Beginning :**

या देवी शिवकेशवादिजननी या वै जगन्मोहिनी
या ब्रह्मादिपिपीलिकादि(न्त)जगदानन्दैकसंदायिनी ।
या पञ्चप्रणवद्विरेफम(न)लिनी या चित्कला मालिनी
सा पायात्परदेवता भगवती श्रीराजराजेश्वरी ॥

अम्बा श्यामलचन्द्रमौलिरबलापर्णा उ(ह्यु)मा पार्वती
काली हैमवती शिवा त्रिनयनी कात्यायनी भैरवी ।
सावित्री नवयौवना शुभकरी साम्राज्यलक्ष्मीप्रदा
चिद्रूपा परदेवता भगवती श्रीराजराजेश्वरी ॥

**End :**

अम्बालोलकटाक्षवीक्षणल(व)ताऐ(मै)श्वर्यमव्याहता(म्)
अम्बा पावनमन्त्रराजपठनादन्ते च मोक्षप्रदा ।
अम्बा पालितभक्तराजसततं(जिरिह)यो ह्यम्बाष्टकं संपठेत्
चिद्रूपा परदेवता भगवती श्रीराजराजेश्वरी ॥

---

No. 10824. राजराजेश्वर्यष्टकम्.
RĀJARĀJĒŚVARYAṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 20*a* of the MS. described under No. 5559.

Complete in eight stanzas.

Similar to the above.

**Beginning:**

अम्बा शाम्भवि चन्द्रमौलिरखिलाआ(चा)र्या भवानीश्वरी
वामाक्षी महिषासुरप्रशमनी वाणी रमासेविता ।
मल्लाद्यासुरसूदया(ना)न्त्यलहरी माहेश्वरी अ(चा)म्बिका
चिद्रूपा परदेवता भगवती श्रीराजराजेश्वरी ॥

**End :**

अम्बा हेलितभद्रराजगमना अ(चा)म्बाष्टकं यः पठेत्
अम्बालोलकटाक्षवीक्षणवतामैश्वर्यमव्याहतम् ।

. . . . . . . . . .

चिद्रूपा परदेवता भगवती श्रीराजराजेश्वरी ॥

## No. 10825. राज्यलक्ष्मीस्तोत्रम्.
## RĀJYALAKṢMĪSTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 112*a* of the MS. described under Nos. 537 and 7247.

Complete; as found in the Skandapurāṇa.

In praise of the goddess Lakṣmī conceived as a manifestation of Śakti. A repetition of this eulogy for a month is considered to bestow on the supplicant the kingship of a country.

**Beginning:**

अस्य श्रीराज्यलक्ष्मीस्तोत्रमन्त्रस्य पुरंदर ऋषिः, अनुष्टुप् छन्दः, श्रीराज्यलक्ष्मीर्देवता । ( . . . . . ) मम निरतिशयशुभफलप्राप्तिद्वारा राज्यप्राप्त्यर्थे जपे विनियोगः ।

* * * *

यासापद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गम्भीरावर्तनाभिः स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैः स्नापिता हेमकुम्भै-
र्नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥

* * * *

लक्ष्मीः श्रीः कमला विद्या माता विष्णुप्रिया सती ।
पद्मालया पद्महस्ता पद्माक्षी लोकपावनी ॥

**End:**

मासमेकं जपेत्स्तोत्रं नरेन्द्रत्वं हि जायते ।

* * * *

मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

**Colophon:**

इति श्रीस्कन्दपुराणे नारदागस्त्यसंवादे राज्यलक्ष्मीस्तोत्रं संपूर्णम् ॥

## No. 10826. राज्यलक्ष्मीस्तोत्रम्.
## RĀJYALAKṢMĪSTŌTRAM.

**Page, 1.** Lines, 4 on a page.

Begins on fol. 74*a* of the MS. described under No. 5661.

Wants beginning; otherwise complete.

Similar to the above.

**Beginning:**

. . . . . . . अङ्गुल्यग्रे च मालिनी ॥
उरःस्थले महालक्ष्मीः कक्षद्वन्द्वेऽघनाशिनी ।
नाभिमध्ये च ब्रह्माण्डी कटिमध्ये च यक्षिणी ॥

**End:**

सर्वसिद्धी राज्यलक्ष्मीः सर्वकार्याणि सर्वदा ।
आयुः सर्वं राजसंमानं पुत्रपौत्राभिवर्धनम् ॥

* * * *

नित्यं संनिहितोऽमृत्युर्वरदा सामि(स्याच्च) सर्वदा ॥

**Colophon:**

इति ब्रह्माण्डपुराणे ब्रह्मविश्वामित्रसंवादे विश्वामित्रप्रोक्तं राज्यलक्ष्मीस्तोत्रं संपूर्णम् ॥

---

## No. 10827. ललितास्तवरत्नम्.
## LALITĀSTAVARATNAM.

**Pages, 24.** Lines, 19 on a page.

Begins on fol. 62*a* of the MS. described under No. 5593.

Complete.

A hymn in praise of Lalitā, a manifestation of Dēvī, who is considered to be the primeval cause of the universe.

**Beginning:**

वन्दे गजेन्द्रवदनं वामाङ्कारूढवल्लभाश्लिष्टम् ।
कुङ्कुमपरागशोणं कुवलयिनीजारकोरकापीडम् ॥

स जयति सुवर्णशैलः सकलजगच्चक्रसंघटितमूर्तिः ।
काञ्चननिकुञ्जवाटीकन्दलदमरीप्रपञ्चसङ्गीतः ॥

**End:**

मधुरस्मितां मदारुणनयनां मातङ्गकुम्भवक्षोजाम् ।
चन्द्रावतंसिनीं त्वां सविधे पश्यन्ति सुकृतिनः केचित् ॥
ललितायास्स्तवरत्नं ललितपदाभिः प्रणीतमार्याभिः ।
अनुदिनमवनौ पठतां फलानि भवन्ति सुसमृद्धानि ॥

---

## No. 10828. ललितास्तवरत्नम्.
## LALITĀSTAVARATNAM.

Pages, 24. Lines, 8 on a page.

Begins on fol. 34*a* of the MS. described under No. 3890, wherein this work has been mentioned as Āryādviśatī 39*a* in the list of other works given therein.

Complete.

Same work as the above, but with the addition of one stanza, according to which Śaṅkarācārya is the author of the work.

A colophon also is added at the end as given below:—

ललितायास्तत्त्वविदां प्रवरैः स्तव एष शङ्कराचार्यैः ।
अस्माभिरस्तु रचितः साधकसंसिद्धिदापनधुरीणः ॥

**Colophon:**

ललितास्तवरत्नं संपूर्णम् ॥

---

## No. 10829. वाराहीस्तोत्रम्.
## VĀRĀHĪSTŌTRAM.

Pages, 6. Lines, 9 on a page.

Begins on fol. 27*b* of the MS. described under No. 424.

Complete.

In praise of Vārāhi, a manifestation of Śakti. By Rāmānandanātha.

**Beginning:**

वन्दामहे महेशानमहासौभाग्यसंपदम् ।
कालानलमघानां किं कालानलमहं महः ॥
अभ्रंवहमहाभोगमन्दक्रोडानने तव ।
दीप्ताकारं मणिगणैः प्राकारं हृदि भावये ॥

* * * *

अथाष्टपत्रे वार्ताळिं वाराहीं वर्तुलस्तनीम् ॥

**End:**

कुचकलशनताङ्गयष्टिकूलंकषमदरूषितपिङ्गनेत्रनेत्रम् ।
हलधरमवधूतमेघवर्णं मुसलकरं मुहुरानतोऽस्मि रूपम् ॥
इत्थं रामानन्दनाथ(प्र)क्लृप्तः पूजास्तु(तु)त्यः केवलं जापमात्रात् ।
भिन्ध्यादन्तर्भीमशङ्कान्धकारं त्वद्भक्तानां त्वत्क्रमस्तोत्रदीपः ॥

---

## No. 10830. वाराहीस्तोत्रम्.
## VĀRĀHĪSTŌTRAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 4*b* of the MS. described under No. 2886.

Complete.

Similar to the above. The first stanza gives a description of the goddess herein eulogised.

**Beginning:**

कुवलयनिभा कालेयोर्ध्वारुणमकुटोज्ज्वला
हलमुसलिनी सद्भक्तेभ्यो वराभयदायिनी ।
कपिलनयना मध्ये क्षामा कठोरघनस्तनी
जयति जगतां मातस्सा ते वराहमुखी तनुः ॥

**End:**

गर्जत्पर्जन्यघोषां घटघटितघनां घोरदंष्ट्रां करालां
हाहाहाहासयुक्तां प्रबलरिपुशिरोमालिकाप्रोतवक्त्राम् ।

नृत्यन्तीं शत्रुवक्षःस्थलगलितमहारक्तधारां पिबन्तीं
खादन्तीं मांसखण्डं हलमुसलधरां पञ्चमीं भावयामि ॥

---

## No. 10831. शक्तिनवरत्नस्तोत्रम्.

## ŚAKTINAVARATNASTŌTRAM.

**Pages, 14. Lines, 16 on a page.**

Begins on fol. 30*b* of the MS. described under No. 424, wherein this work has been mentioned as Dēvīsahasranāmastutimantra in the list of other works given therein.

Complete.

One thousand and eight attributes in praise of Śakti, who is considered to be the Supreme Being and from whom all manifested things are said to have evolved.

**Beginning:**

चतुर्भुजायै गिरिसंभवायै कुचोन्नतायै तनुमध्यमायै ।
नमोऽम्बिकायै सृणिपाशबाणधनुर्धरायै शिववल्लभायै ॥

आदिक्षान्ताक्षरश्रेणीमाणिक्याकल्पधारिणी ।
(मेदिनी) धरराजन्यकन्ये धन्ये नमो नमः ॥

जय जय जगन्मयि जम्भिनि जलदविडम्बिनि कुम्भिनि कुवलयाक्षि कुञ्जराननजननि खट्वाङ्गिनि कात्यायनि ।

**End:**

महाशक्ते महामहागुप्ते महामहाक्लृप्ते महामहानन्दे महामहास्पन्दे महामहाशये महाश्रीचक्रनगरसम्राज्ञि नमस्ते नमस्ते स्वाहा ॥

* * * *

इत्थमष्टाधिका(के)नाम्न सहस्रेण सुनामभिः ।
यः स्तौति तव पादाब्जं तमानन्दमयं कुरु ॥

परमेश्वरि पञ्चकृत्यलीले परसंविन्मयि पार्वति प्रसीद ।
पतितं पशुपाशमुर्मरे मां शिशुमाश्वासय शीतलैरपाङ्गैः ॥

**Colophon :**

इति नवरत्नस्तोत्रं संपूर्णम् ॥

---

No. **10832.** शक्तिस्तोत्रम्.
ŚAKTĪSTŌTRAM.

**Pages,** 5. Lines, 5 on a page.

Begins on fol. 36*b* of the MS. described under No. 8827, wherein it is mentioned as Tripurasundarīstōtra in the list of other works.

Complete.

In praise of Śakti conceived in the form of Lakṣmī.

**Beginning :**

वन्दे लक्ष्मीं परशिवमयीं शुद्धजाम्बूनदाभां
तेजोरूपां कनकवसनां सर्वभूषोज्ज्वलाङ्गीम् ।
बीजापूरं कनककलशं हेमपद्मं दधाना-
माद्यां शक्तिं सकलजननीं विष्णुवामाङ्कसंस्थाम् ॥

**End :**

यासापद्मासनस्था विपुलकुचतटा(टी) पद्मपत्रायताक्षी
गम्भीरावर्तनाभिः स्तनभरनमिता शुभ्रमन्त्रोत्तरीया ।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैस्स्नापिता हेमकुम्भैः
नित्यं सा पद्मयुक्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥

---

No. **10833.** शूलिनीविश्वरूपस्तोत्रम्.
ŚŪLINĪVIŚVARŪPASTŌTRAM.

**Pages,** 10. Lines, 14 on a page.

Begins on fol. 158*a* of the MS. described under No. 5673.

Complete.

A hymn containing stanzas in praise of the all-pervading form of Śūlinī, who is a manifestation of Śakti. This is said to have been taught by Śiva to Dēvī.

**Beginning:**

श्रीदेव्युवाच—

सर्वसिद्धिप्रदायिन्या(:)शूलिन्यास्सर्वबोधक ।
विश्वरूपस्तुतिं श्रोतुमिच्छाम्यहमिहादरात् ॥

श्रीशिवः—

साधु कल्याणि तत्सर्वं यद्यदुक्तं त्वयाऽधुना ।
अतिगुह्यतमं श्रेष्ठं स्मरणात्सर्वसिद्धिदम् ॥

* * * *

श्रीमये जगदाधारे जगदैश्वर्यसिद्धये ।
वरदे शूलिनी दुर्गे महाभैरवि पाहि माम् ॥

**End:**

य इदं शूलिनीदुर्गादेव्यास्स्तोत्रमनुत्तमम् ।
स्मरेद्वा प्रजपेद्ध्यानपूर्वकं विजितेन्द्रियम् ॥

* * * *

इति परमरहस्यस्तोत्रमेतत्पराया(:)
प्रथितमुषसि भक्त्या ध्यानपूर्वं जपेद्यः ।
जगति निखिलभाग्यं दीर्घमायुः सुपुत्रान्
विपुलविमलकीर्तिं प्राप्य मुक्तो भवेत्सः ॥

**Colophon:**

श्री(विश्वरूपस्तोत्रं) नामाष्टमोपदेशः ॥

---

## No. 10834. शूलिनीसुमुखीकरणस्तोत्रम्.

## ŚŪLINĪSUMUKHĪKARAṆASTŌTRAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 15*b* of the MS. described under No. 2886, wherein it is stated as Pratikriyāśūlinīsumukhīkaraṇastōtra in the list of other works.

Complete.

Similar to the above. A repetition of this eulogy on Sundays is considered to enable one to attain to the highest bliss.

**Beginning:**

श्रीशिवः—

अथ ते शूलिनीदेव्याः सुमुखीकरणस्तुतिम् ।
प्रवक्ष्यामि समासेन सर्वकर्मार्थसिद्धये ॥
ऋषिन्यासं षडङ्गञ्च मूलवद्ध्यानमुच्यते ।

* * * *

ओङ्कारमन्त्रपीठस्थे ओषधीशामृतोज्ज्वले ।
ऐश्वर्यमायुरारोग्यमिष्टसिद्धिञ्च देहि मे ॥
श्रीपूर्णे श्रीपरे श्रीशे श्रीमये श्रीविवर्धने ।
कामेयकामरसिके कान्तितार्थवरप्रदे ॥

**End:**

सर्वलोके सर्वदेशे सर्वकाले सदाम्बिके ।
ऐश्वर्यमायुरारोग्यामिष्टासिद्धिश्च देहि मे ॥

* * * *

इति परमशिवायाः शूलिनीदेवतायाः
स्तुतिमतिशयसौख्यप्राप्तये सौन(र)वारौ(रे) ।
स्मरति जपति भक्त्या संवृताशेषलोकैः
निखिलसुखमवाप्य श्रीशिवाकारमेति ॥

**Colophon:**

इत्याकाशभैरवकल्पे सुमुखीकरणस्तुतिर्नाम नवमोपदेशः ॥

---

No. **10835.** शूलिनीसुमुखीकरणस्तोत्रम्.

ŚŪLINĪSUMUKHĪKARAṆASTŌTRAM.

Pages, 7. Lines, 14 on a page.

Begins on fol. 162*a* of the MS. described under No. 5673.

Complete.

Same work as the above, but with a different colophon as given below :—

**Colophon :**

इति श्रीमहाशैवतन्त्रे क्रियाभेदविधाने सुमुखीकरणस्तुतिर्नाम नवमोपदेशः ॥

---

No. **10836.** शूलिनीस्तवः.

ŚŪLINĪSTAVAḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 19*a* of the MS. described under No. 775, wherein this work has been mentioned as Tripurasundarīstōtra in the list of other works given therein.

Incomplete.

A number of alliterative stanzas in praise of Śūlinī.

**Beginning :**

शिवगिरितोषणि तोषणतोषिणि तोषणि तोषनुते
भवभयनाशिनि पाशविमोचनि पापविदारिणि वह्निनुते ।
तिशिरवासिनि वासववन्दिनि वामरूपिणि वामनुते
कामविनाशिनि कमलजवन्दिनि काव्यविनोदिनि कालिनुते ॥

**End :**

तारकमन्त्रिणि तामसनाशिनि तत्पदरूपिणि तन्त्रनुते
त्वंपदसाक्षिणि असिपदकारिणि अम्बरवासिनि अर्कसुते ।
जय जय हे शङ्करकारिणि शम्भुविलासिनि दक्षसुते
मोक्षद्वारकवाट . . . . . . . . . . . . . . ॥

---

No. **10837.** श्यामलादण्डकः.

ŚYĀMALĀDAṆḌAKAḤ.

Pages, 8. Lines, 9 on a page.

Begins on fol. 13*a* of the MS. described under No. 6548.

Complete.

A hymn in praise of Śyāmalā, a manifestation of Śaktī, in the Daṇḍaka metre. The authorship of this work is attributed to Kālidāsa.

**Beginning:**

माणिक्यवीणामुपलालयन्तीं मदालसां मञ्जुलवाग्विलासाम् ।
माहेन्द्रनीलोत्पलकोमलाङ्गीं मातङ्गकन्यां म(न)सा स्मरामि ॥
जय मातङ्गतनये जय नीलोत्पलद्युते ।
जय सङ्गीतरसिके जय लीलाशुकप्रिये ॥

जय जननि सुधासमुद्रान्तरुद्यन्मणिद्वीपसंरूढबिल्वावलीबद्धकल्पद्रुमाकल्पकादम्बकान्तारवासप्रिये कृत्तिवासप्रिये ।

**End:**

वपुः श्यामलं कोमलं चारुचन्द्रावचूडान्वितं तावकं ध्यायतस्तस्य लीलासरो वारिधिस्तस्य केलीवनं नन्दनं तस्य भद्रासनं भूतलं तस्य गीर्देवता किङ्करी तस्य चाज्ञाकरी श्रीः स्वयं सर्वमन्त्रात्मिके सर्वयन्त्रात्मिके सर्वतन्त्रात्मिके सर्वशक्त्यात्मिके सर्वविद्यात्मिके सर्वपीठात्मिके सर्वयोगात्मिके सर्वगे सर्वरूपजगन्मातृके पाहि मां पाहि मां पाहि देवि तुभ्यं नमो देवि तुभ्यं नमो देवि तुभ्यं नमो देवि तुभ्यं नमः ॥

**Colophon:**

श्यामलादण्डकः संपूर्णः ॥

---

No. **10838.** श्यामलादण्डकः.

ŚYĀMALĀDAṆḌAKAḤ.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{3}$ inches. Pages, 3. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Śrīnivāsacūrṇikā 2*a*.

Complete.

Same work as the above, but without the introductory stanza in the beginning and with the addition of one stanza at the end as given below:—

अमरीकबरीभारभ्रमरीमुखरीकृतम् ।
दूरीकरोतु दुरितं गौरीचरणपङ्कजम् ॥

## No. 10839. श्यामलादण्डकः.
## ŚYĀMALĀDAṆḌAKAḤ.

Pages, 8. Lines, 4 on a page.

Begins on fol. 2*a* of the MS. described under No. 2279.

Wants beginning ; otherwise complete.

Same work as the above, but the introductory stanza is given at the end.

---

## No. 10840. श्यामलादण्डकः.
## ŚYĀMALĀDAṆḌAKAḤ.

Pages, 9. Lines, 5 on a page.

Begins on fol. 50*a* of the MS. described under No. 2524

Complete.

Same work as the above.

---

## No. 10841. श्यामलादण्डकः.
## ŚYĀMALĀDAṆḌAKAḤ.

Pages, 12. Lines, 5 on a page.

Begins on fol. 31*a* of the MS. described under No. 8708.

Complete.

Same work as the above, but with the addition of one stanza both in the beginning and in the end as given below and with the following colophon.

**Beginning:**

माता मरकतश्यामा मातङ्गी मधुशालिनी ।
कटाक्षयति कल्याणी कदम्बवनवासिनी ॥

**Colophon:**

इति कालिदासविरचितं श्यामलादण्डकं संपूर्णम् ॥

**End:**

नीलांशुकाबद्धनितम्बबिम्बां तालीदलेनार्पितकर्णभूषाम् ।
कराग्रवीणां कलयामि देवीं मातङ्गिनीं मन्मथवैरिपत्नीम् ॥

## No. 10842. श्यामलादण्डकः.
## ŚYĀMALĀDAṆḌAKAḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 3*a* of the MS. described under No. 10279.

Same work as the above, but with the addition of one stanza both in the beginning and in the end as given below. A daily repetition of this hymn is stated to be efficacious in making one a great poet.

**Beginning:**

नीलांशुकाबद्धनितम्बाबिम्बां (. .) मन्मथवैरिपत्नीम् ।

**End:**

अम्बाप्रत्यक्षकाले प्रविमलकरुणालब्धविद्याविशेषां
प्रौढेनाहूतकीर्तिप्रथितमतिमता कालिदासेन चित्रम् ।
पात्रं सम्यग्जनानां रचितमिदमहा(हो)दण्डकं श्यामलायां(याः)
ये बा नित्यं पठन्ति प्रतिदिनमतुलं ते तु धन्याः कवीन्द्राः ॥

---

## No. 10843. श्यामलादण्डकः.
## ŚYĀMALĀDAṆḌAKAḤ.

Pages, 15. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 2037.

Complete.

Same work as the above, but with the addition of a stanza at the end as given below :—

माता मरकतश्यामा मातङ्गी मदशालिनी ।
कटाक्षयतु कल्याणी कदम्बवनवासिनी ॥

---

## No. 10844. श्यामलादण्डकः.
## ŚYĀMALĀDAṆḌAKAḤ.

Substance, palm-leaf. Size, 13¼ × 1⅜ inches. Pages, 12. Lines, 5 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Complete.

Same work as the above, but without the additional stanza at the end.

---

No. **10845.** **श्यामलादण्डकः.**

ŚYĀMALĀDAṆḌAKAḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 46*a* of the MS. described under **No. 781.**

Complete.

Same work as the above, but with the following colophon:—

इति कालिदासस्य कृतौ श्यामलादण्डकः संपूर्णः ॥

---

No. **10846.** **श्यामलास्तोत्रम्.**

ŚYĀMALĀSTŌTRAM.

Pages, 2. Lines, 10 on a page.

Begins on fol. 170*b* of the MS. described under No. 124.

Complete.

Stanzas in praise of Śyāmalā.

**Beginning:**

जय मातर्विशालाक्षि जय सङ्गीतमातृके
जय मातङ्गि चण्डालि गृहीतमधुपात्रिके ॥
नमस्तेऽस्तु महादेवि नमो भगवतीश्वरि ।
नमस्तेऽस्तु जगन्मातर्जय शङ्करवल्लभे ॥
जय त्वं श्यामले देवि शुकश्यामे नमोऽस्तु ते ।

**End:**

मातङ्गेश्वरि वन्दे त्वां प्रसीद मम सर्वदा ॥
इत्येतच्छ्यामलास्तोत्रं सर्वकामसमृद्धिदम् ।
शुद्धात्मा प्रजपेद्यस्तु नित्यमेकाग्रमानसः ॥
* * * *
जातस्मरत्वमाप्नोति ब्रह्मज्ञानमनुत्तमम् ।
सदाशिवत्वमाप्नोति सोऽन्ते नात्र विचारणा ॥

## No. 10847. श्रीचक्रस्तवराजः.

## ŚRĪCAKRASTAVARĀJAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 30*b* of the MS. described under No. 673.

Complete.

A hymn in praise of Dēvī conceived as presiding over the mystic diagram called Śrīcakra described in the second stanza below; by Śaṅkārācārya.

**Beginning:**

रुद्राणीममृताम्बुधौ मणिमयद्वीपे कदम्बावृते
मन्दारादिसमाकुले नवमणिप्राकारसंशोभिते ।
श्रीमद्द्वारचतुष्टये मणिमयस्तम्भोज्ज्वले मण्डपे
धर्मार्थाङ्घ्रियुगां सदाशिवसतीं सिंहासने भावयेत् ॥
सर्वारैर्धरणीपुरैस्त्रिपुरिहावृत्तैस्त्रिभिष्षोडशैः
पत्रैरष्टभिरन्वितैर्मम दशद्वावष्टकोणैर्युतैः ।
मध्ये त्र्यश्रमनोजबिन्दुसहिते ब्राह्मादिमूर्त्याम्बिकां
देवीं तेजसि भावये निवसितां श्रीचक्रराजे सदा ॥

**End:**

यामाराध्य बभूव विश्वसृडजो विष्णुर्जगन्नायकः
संहारादिविभुः शिवोऽपि सविता विश्वप्रकाशात्मकः ।
दिक्पालस्त्वमलापुरीन्द्रहुतभुग्धर्माद्यनन्तादयो
योगीन्द्रास्त्वजरामरत्वमनिशं संप्राप्नुवन् सुन्दरीम् ॥

**Colophon:**

इति श्रीमच्छङ्कराचार्यविरचितं(तः)चक्रराजस्तवराजः संपूर्णः ॥
सर्वेषु जन्तुषु सशैलवनार्णवेषु सर्वेषु सर्वभुवनेष्वपि सर्वकालम् ।
त्वामेव पुष्पशरचापवतीमजस्रं वाचा वदामि मनसाहमनुस्मरामि ॥

## No. 10848. सर्वशान्तिस्तवः.
## SARVAŚĀNTISTAVAḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 16*a* of the MS. described under No. 2886.

Complete.

A hymn in praise of Śakti, a repetition of which is considered to remove all sins and evils.

**Beginning:**

सर्वशान्तिं प्रवक्ष्यामि दुरितात्सकलात्मनाम् ।
यस्य स्मरणमात्रेण शान्तिमाप्नोत्यघौघतः ॥

* * * *

यन्त्रमालिख्य देवेशीं सर्वानुग्रहकारिणीम् ।
आवाह्य विधिवत्पूज्य सर्वशान्तिस्तवं जपेत् ॥
श्रीमत्सकललोकैकजनके करुणामये ।
त्राहि मां सकलापायात् शरणागतवत्सले ॥

**End:**

इति विरचितमेतत्सर्वशान्तिस्तवं यः
पठति जपति भक्त्या सर्वदा यस्त्रिसन्ध्यम् ।
विपुलकरणसौख्यं ब्रह्मवीर्यानुभूतिं
प्रथितपदमवाप्य श्रीशिवाकारमेति ॥

---

## No. 10849. सुभगोदयः.
## SUBHAGŌDAYAḤ.

Pages, 11. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 7973.

Complete.

This hymn is in praise of Subhagā, a manifestation of Śakti, and is said to have been composed by Gauḍapādācārya.

**Beginning :**

भवानि त्वां वन्दे भवमहिषि सच्चित्सुखवपुः
पराकाशं देवीममृतलहरीं बैन्दवकलाम् ।
महाकालातीतां कलितसरणिं कल्पिततनुः
सुधासिन्धोरन्तर्वसतिमनिशं वासरमयीम् ॥

**End :**

अतस्ते संसिद्धाः सुभगसुभगाख्या गुरुकृपा-
कटाक्षव्यासङ्गात् स्रवदमृतनिष्यन्दसुभगाः ।
तया विद्धो योगी विचरति निशायामपि दिवा
दिवा भानू रात्रौ विधुरिव कृतार्थीकृतमतिः ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमडि(ड्रौड) पादाचार्यविरचितः सुभगोदयः संपूर्णः ॥

---

## No. 10850. सौन्दर्यलहरी.
## SAUNDARYALAHARĪ.

Substance, palm-leaf. Size, $17\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 29. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 13*a*. The other work herein is Śivānandalaharī 1*a*.

Complete.

Same work as that described under No. 48 of the Report on the Search for Sanskrit and Tamil MSS., No. 2. For extracts see page 255 *ibid.*, wherein the end is not given.

**End :**

प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः
सुधासूतेश्चन्द्रोपलजललवैरर्घ्यरचना ।

स्वकीयैरम्भोभिः सलिलनिधिसौहित्यकरणं
त्वदीयाभिर्वाग्भिस्तव जननि वाचां स्तुतिरियम ॥

**Colophon:**

श्रीसौन्दर्यलहरीस्तोत्रं संपूर्णम् ॥

---

No. **10851.** सौन्दर्यलहरी.

SAUNDARYALAHARĪ.

**Pages, 31.** Lines, 5 on a page.

Begins on fol. 21*a* of the MS. described under No. 2417.

Breaks off in the eighty-fifth stanza.

According to this MS. the work is divided into two parts as Ānandalaharī (stanzas 1—40) and Saundaryalaharī (41—100), the first stanza of which begins as तवाधारे.

Same work as the above.

The MS. is stated to have been copied from the MS. belonging to one Kandukūri Nandirāja.

---

No. **10852.** सौन्दर्यलहरी.

SAUNDARYALAHARĪ.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 19. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Śivānandalaharī 11*a*.

Complete.

Same work as the above.

---

No. **10853.** सौन्दर्यलहरी.

SAUNDARYALAHARI.

**Pages, 34.** Lines, 5 on a page.

Begins on fol. 9*a* of the MS. described under No. 3869.

Complete.

Same work as the above.

## No. 10854. सौन्दर्यलहरी.
## SAUNDARYALAHARĪ.

Pages, 25. Lines, 10 on a page.

Begins on fol. 17*a* of the MS. described under No. 6548.

Complete.

Same work as the above.

---

## No. 10855. सौन्दर्यलहरी.
## SAUNDARYALAHARĪ.

Substance, paper. Size, 8 × 6⅝ inches. Pages, 22. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 10*b*. The other works herein are Śivānandalaharī 1*a*, Sūryasaptāryāstōtra 21*a*.

Complete.

Same work as the above.

---

## No. 10856. सौन्दर्यलहरी.
## SAUNDARYALAHARĪ.

Pages, 48. Lines, 4 on a page.

Begins on fol. 13*a* of the MS. described under No. 6414.

Complete.

Same work as the above, but without colophon.

---

## No. 10857. सौन्दर्यलहरी.
## SAUNDARYALAHARĪ.

Pages, 15. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 10326.

Complete.

Same work as the above, but with the addition of two stanzas at the end as given below.

निध्रौ नित्ये स्मेरे निरवधिगुणे नीतिनिपुणे
निराबाधज्ञाने नियमपरचिन्तैकनिलये ।
नियत्या निर्मुक्ते निखिलनिगमान्तस्तुतिपथे
निरातङ्के नित्ये निगमय ममापि स्तुतिमि(माम्) ॥

अव्याधिगात्रमनुकूलतरं कलत्रं वेश्म प्रशस्तविभवं निशिता च विद्या ।
श्लाघ्यं कुलं चरमकालगतिः समर्था मातः कटाक्षपरमाणुविभूतयस्ते ॥

No. 10858. सौन्दर्यलहरी.

SAUNDARYALAHARĪ.

Pages, 30. Lines, 5 on a page.

Begins on fol. 239*b* of the MS. described under No. 119.

Complete.

Same work as the above, but with the addition of one stanza at the end as given below :—

उदयगिरिसमुद्यद्भानुबिम्बान्तरस्थामरिकरकरपद्मां सिंहवाहां त्रिनेत्राम् ।
प्रबलमहिषवक्षोलक्ष्यशूलं दधानां शशिशकलकिरीटां भावदुर्गां नमामि ॥

No. 10859. सौन्दर्यलहरी.

SAUNDARYALAHARĪ.

Pages, 30. Lines, 5 on a page.

Begins on fol. 129*a* of the MS. described under No. 6685

Complete.

Same work as the above, but without colophon.

No. 10860. सौन्दर्यलहरी.

SAUNDARYALAHARĪ.

Pages, 36. Lines, 12 on a page.

Begins on fol. 119*a* of the MS. described under No. 675.

Complete.

Same work as the above.

## No. 10861. सौन्दर्यलहरी.

SAUNDARYALAHARĪ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 19*a* of the MS. described under No. 3?6.

Breaks off in the sixteenth stanza.

Same work as the above, but with the addition in the beginning of the stanza given below .—

अमरीकबरीभार ( . . . ) गौरीचरणपङ्कजम् ॥

---

## No. 10862. सौन्दर्यलहरी.

SAUNDARYALAHARĪ.

Pages, 9. Lines, 10 on a page.

Begins on fol. 195*a* of the MS. described under No. 124.

Complete.

Same work as the above, but with the addition of Ṛsi, Chandas, etc., in the beginning as given below :—

अस्य श्रीआनन्दलहरीसौन्दर्यलहरीस्तोत्रमन्त्रस्य सदाशिव ऋषिः, अनुष्टुप छन्दः, श्रीमहासुन्दरी परमानन्दरूपिणी प्राणशक्तिर्देवता ।

* * * *

जपापुष्पप्रतीकाशां रक्तोत्पलसमप्रभाम् ।
बालार्ककिरणाभासां वन्दे त्रिपुरसुन्दरीम् ॥

---

## No. 10863. सौन्दर्यलहरी.

SAUNDARYALAHARĪ.

Substance, palm-leaf. Size, $11\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 30. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the above.

## No. 10864. सौन्दर्यलहरी.
## SAUNDARYALAHARĪ.

Pages, 4. Lines, 19 on a page.

Begins on fol. 51*b* of the MS. described under No. 2886.

Complete.

Same work as the above.

---

## No. 10865. सौन्दर्यलहरी.
## SAUNDARYALAHARĪ.

Pages, 23. Lines, 19 on a page.

Begins on fol. 92*b* of the MS. described under No. 5593.

Complete.

Same work as the above.

---

## No. 10866. सौन्दर्यलहरी—लक्ष्मीधरव्याख्यासहिता.
## SAUNDARYALAHARĪ WITH THE COMMENTARY LAKṢMĪDHARA.

Substance, paper. Size, 12 × 7½ inches. Pages, 231. Lines, 20 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 75*a*. The other works herein are Saundaryalaharī (with Ānandalaharībhāṣyālōcana) 1*a*, Saubhāgyahṛdayavayākhyā (with Mantra and Mālāmantra) 65*a*.

Incomplete.

The commentary is that of Lakṣmīdhara, and it has been printed in the Mysore Government Oriental Library Series. The author in a long colophon at the end of the work gives the names of his ancestors for six generations and also their literary productions and titles as well as the names of his own other works.

**Beginning:**

वन्देमहि महीयांसमंसलम्बिजटाधरम् ।
यत्कङ्कणझणात्काररवः शब्दानुशासनम् ॥

शेषाशेषोक्तिभूषाः कणभ(च)रणच(चर)णग्रन्थसौगन्ध्यजिघ्र-
द्भट्टोक्तिप्रौढलीलागुरुतर(सु)गवीर्गु(गु)म्भशुम्भद्विजृम्भाः ।
निःशङ्काः शङ्करोक्तौ पशुपतिमतनिर्वाहकाः सांख्यसंख्या
यस्य श्रीलोल्ललक्ष्मीधरविबुधमणेर्भान्ति वाचां निगुम्भाः ॥
सोऽयं लक्ष्मीधरः प्राह टीकां लक्ष्मीधराभिधाम् ।
एनां समाहितस्वान्ताः सेवन्तां सततं बुधाः ॥
स्यादेव मेऽलसतया मतिमान्द्यतो वा
दोषः क्वचित् क्वचिदथापि न कापि शङ्का ।
नैसर्गिकी खलु गुणीकरणप्रवीणा
शक्तिः सदा विजयते खलु सज्जनानाम् ॥

इह खलु शङ्करभगवत्पूज्यपादाः समग्रमततत्त्ववेदिनः समयाख्यां चन्द्र-कलां श्लोकशतेन प्रस्तुवन्ति—

शंकरार्यप्रशिष्येण भट्टार्यशिष्येण लोल्ललक्ष्मीधरनाम्रा विबुधेन लक्ष्मी-धराभिधेयं व्याख्या ।

शिवः शक्त्या युक्तो ( . . ) कथमकृतपुण्यः प्रभवति ॥

शिवः सर्वमङ्गलोपेतः सदाशिवतत्त्वम् । वश कान्तावित्यस्माद्धातोः शिवशब्दो निष्पन्नः । यथोक्तं काशिकायाम्—

हिंसिधातोः सिंहशब्दो वशकान्तौ शिवः स्मृतः ।
वर्णव्यत्ययतः सिद्धौ पश्यकः कश्यपो यथा ॥

End:

यदा इयं स्तुतिरिति स्वरूपमात्रमेव परामृशति, तदा भिन्नवाक्यत्वेन बिम्बप्रतिबिम्बाक्षेपात् दृष्टान्तालङ्कारः । एवं प्रतिवस्तूपमादृष्टान्तालङ्कारयो-रन्वयभेदेन प्रतीयमानत्वात् वाक्यद्वयश्रवणात् संसृष्टिरेवेति ध्येयम् ।

अस्मिन् सौन्दर्यलहरीशतके समानीतः पद्भ्यामिति, समुद्भ्रान्त-स्थूलस्तनमिति, निधि(धौ)नित्ये चेनि श्लोकत्रयं वर्तते। तत्तु भगवत्पादकृतं न भवति केनचित्प्रक्षिप्तमिति न व्याख्यातमिति ॥

**Colophon:**

इति श्रीलोल्लकुलसम्प्रदायप्रवर्तकभ्रमराम्बिकावरप्रसादसमुल्लसितमहासारस्वतभट्टलोल्लटादिग्रन्थविवरणकर्तृश्रीमहोपाध्यायाचार्यसप्तमेन, साहित्यपारिजातस्मृतिकल्पतरुप्रबन्धप्रबन्द्धृलक्ष्मीधरार्यषष्ठेन, भरतार्णवपाठाख्यसाहित्यमीमांसाग्रन्थद्वयप्रकटितविरिञ्चिमिश्रपञ्चमेन, मीमांसाद्वयादि(जी)वातुनिर्मातृपुरुषोत्तममहोपाध्यायनप्त्रा, प्रभाकरामृतवाहिनीप्रभावखण्डनखण्डनाद्यनेकप्रबन्धसन्दर्भप्रवर्तकनिरुपममहोपाध्यायलक्ष्मणार्यपौत्रेण, नयविवेकदीपिकाप्रबन्धसंनिधातृमहोपाध्यायविद्वत्सार्वभौमनूतनन्यासाद्यनेकबिरुदाङ्कितश्रीविश्वनाथभट्टारकतनयेन, पार्वतीगर्भशुक्तिमुक्तारत्नेन बहूकृतसुधीरत्नेन मन्त्रात्माविशेषेण निखिलयामळतन्त्रार्णवावगाहरुद्रेण आश्रयीकृतगजपतिवीररुद्रेण नीलगिरिसुन्दरचरणारविन्दचञ्चरीकेण वाणीसहचरीकेण वाचस्पतिविलासाद्यनेकस्मृतिनिबन्धनलक्ष्मीधराद्यनेकसाहित्यनिबन्धननयविवेकभूषणाद्यनेकगुरुमतनिबन्धनयोगदीपिकाद्यनेकपातञ्जलनिबन्धनमानवधर्मशास्त्रदीपिकाकर्णावतंसाद्यनेककाव्यकल्पकेन आश्रितजनकल्पकेन निग्रहानुग्रहकौशिकेन श्रीमहोपाध्यायलक्ष्मीधरदेशिकेन कृतेयं लक्ष्मीधराख्या सौन्दर्यलहरीस्तुतिव्याख्या संपूर्णा ॥

* * * *

सायं संफुल्लमल्लीनवसुरभिसुधामाधुरीसाधुरीति-
प्रेङ्खत्पुङ्खानुपुङ्खस्फुरणकरुणया कीर्तिमन्तौ सुधीयः(?)।
लोल्लश्रीलक्ष्मणार्यो गुणमणिजलधिर्भासते भूसुराळी-
(केळीनाळीकपाळी)दशशतकिरणो विद्वदग्रेसरोऽसौ ॥

सौन्दर्यलहरीव्याख्या समाप्ता ॥

---

No. 10867. सौन्दर्यलहरी—लक्ष्मीधरव्याख्यासहिता.

SAUNDARYALAHARĪ WITH THE COMMENTARY LAKṢMĪDHARA.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 200. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Lalitārcanamañjarī 101*a*.

Complete.

Same work as the above, but without colophon.

The MS. is dated: Friday, the 12th day of the dark fortnight of Śrāvaṇa in the year Sarvadhāri.

---

## No. 10868. सौन्दर्यलहरी—लक्ष्मीधरव्याख्यासहिता.

## SAUNDARYALAHARĪ WITH THE COMMENTARY LAKṢMĪDHARA.

Pages, 58. Lines, 7 on a page.

Begins on fol. 7*a* of the MS. described under No. 957?.

Breaks off in the sixty-second stanza.

Same work as the above.

---

## No. 10869. सौन्दर्यलहरी—लक्ष्मीधरव्याख्यासहिता.

## SAUNDARYALAHARĪ WITH THE COMMENTARY LAKṢMĪDHARA.

Pages, 135. Lines, 22 on a page.

Begins on fol. 197*a* of the MS. described under No. 5507, wherein it is simply given as Saundaryalaharīvyākhyā.

Almost complete.

Same work as the above.

---

## No. 10870. सौन्दर्यलहरी—लक्ष्मीधरव्याख्यासहिता.

## SAUNDARYALAHARĪ WITH THE COMMENTARY LAKṢMĪDHARA.

Pages, 21. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. ?59?.

Breaks off in the sixth stanza.

Same work as the above.

## No. 10871. सौन्दर्यलहरी—लक्ष्मीधरव्याख्यासहिता.

## SAUNDARYALAHARĪ WITH THE COMMENTARY LAKṢMĪDHARA.

Substance, palm-leaf. Size, $18\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 31. Lines, 10 on a page. Character, Telugu. Condition, fair. Appearance, old.

Breaks off in the eighteenth stanza.

Same work as the above.

---

## No. 10872. सौन्दर्यलहरी—लक्ष्मीधरव्याख्यासहिता.

## SAUNDARYALAHARĪ WITH THE COMMENTARY LAKṢMĪDHARA.

Substance, palm-leaf. Size, $15 \times 1\frac{1}{8}$ inches. Pages, 104. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 21*a*. The other work herein is Saundaryalaharī with commentary *la*.

From stanza forty-one to the end.

Same work as the above.

---

## No. 10873. सौन्दर्यलहरी—विद्वन्मनोरमाव्याख्यासहिता.

## SAUNDARYALAHARĪ WITH THE COMMENTARY VIDVANMANŌRAMĀ.

Substance, palm-leaf. Size, $16 \times 1\frac{1}{8}$ inches. Pages, 113 Lines, 6 on a page. Character, Nandināgarī. Condition, fair. Appearance, old.

Almost complete.

Similar to the above. The commentator's name is not given.

**Beginning:**

नमामि परमं शान्तं सत्यमद्वयमव्ययम् ।
उमां च यत्कटाक्षेण देवी(वीं) सृष्ट्यादिकर्तृ यत् ॥
वामाङ्गीकृतवामाङ्गी कुण्डलीकृतकुण्डली ।
आविरस्तु पुरा वस्तु भूतीभूताम्बराम्बरम् ॥

स शङ्करकृतां पुण्यां सौन्दर्यलहरीस्तुतिम् ।
प्रातः प्रत्यक्षरं कुर्वे व्याख्यां विद्वन्मनोरमाम ॥

ननु कथं परमहंसपरिव्राजकाचार्यस्य परित्यक्तसकलविषयसुखस्य ब्रह्मविदः श्रीशंकरभगवतो भवान्याः सौन्दर्यवर्णने प्रवृत्तिः, अनौचि-ती(त्यादि)ति चेत् भवान्या ब्रह्मस्वरूपत्वेन भवानीसौन्दर्यवर्णने नानौ-चित्यमिति वदामः ।

* * * *

शिवः शक्त्या युक्तो ( . . . . ) पुण्यः प्रभवति ॥

शिवः अविकृतचैतन्यं शक्तिर्माया शक्त्या युक्तो यदि शिवो भवति तर्हि प्रभवितुमीशितुं नियन्तुमित्यर्थः ।

**End:**

रम्येण मनोहरेण वपुषा रतेः पातिव्रत्यं शिथिलयति । चिरं बहु-कालं जीवन्नेव •क्षपितः नाशितः पशुपाशव्यतिकरः संसारपाशसंबन्धः येन स तथोक्तः सन् परब्रह्माभिख्यं ब्रह्मानन्दाभिधानं रसं रसयति आस्वादयति अनुभवति ॥

---

No. **10874.** सौन्दर्यलहरी—आनन्दलहरीभाष्यालोचनसहिता.
SAUNDARYALAHARĪ WITH ĀNANDALAHARĪ-BHĀṢYĀLŌCANA.

Pages, 128. Lines, 24 on a page.

Begins on fol. 1*a* of the MS. described under No. 10866.

Incomplete.

The commentary herein is designated Lōcana and is by Ḍiṇḍimarāma, son of Aravindalōcanācārya.

**Beginning:**

कपालनिष्यन्दमदाम्बुधारासंतर्पितालिव्रजझङ्कृताङ्गैः ।
उद्गीयमानं गिरिराजपुत्र्याः पुत्रं गणेशं हृदि चिन्तयामः ॥

समस्तवेदशास्त्रौघसारभूतार्थसंग्रहम् ।
आनन्दलहरीस्तोत्रं व्याकरोमि यथामति ॥
स्तोत्रमेतद्वदन्त्येके शिवेन परिभाषितम् ।
तस्यैवांशावतारेण शङ्करेणेति केचन ।
केचिद्वदन्त्यादिशक्तेर्ललिताया महौजसः ॥
दशनेभ्यः समुद्भूतमिति नानाविधश्रुतिः ।
अत्र स्तोत्रे गुरुमुखादवगम्यागमामृतम् ।
कामेश्वर्याः प्रसादेन भुक्तिमुक्ती भजेन्नरः ॥

शिवः शक्त्या युक्त इत्यादि। अत्र श्लोके भगवत्याः संबुद्धिपदं नास्ति। अतोऽध्याहर्तव्यमिति ये केचिदाहुः ते भ्रान्ताः। हरीति पदस्य संबुद्धिरूपेण वर्तमानत्वात् हरिर्ना कपिले त्रिष्विति वचनात् कपिलवाचिनो हरिशब्दस्य मेद्यलिङ्गत्वात्। ततश्च कृदिकारादक्तिनो वा ङीष्वक्तव्य इति ङीषि कृते हरी इति दीर्घान्तो गौरीशब्दसमानार्थ आगमे प्रसिद्धः ।

* * * *

**Colophon:**

इति श्रीपदवाक्यप्रमाणज्ञश्रीमहाभाष्यभट्टारविन्दलोचनाचार्यपुत्रस्य महामहोपाध्यायस्य वात्स्यडिण्डिमरामकवेः कृतौ आनन्दलहरीभाष्यालोचने प्रथममुन्मीलनम् ॥

**End:**

इति देवीसूक्तेषु सर्वत्र भगवत्या(:) सर्वदेवमयत्वं सर्वविश्वकर्तृत्वं सर्ववाणीस्वरूपत्वं स्वतन्त्रत्वमनिष्टब्रह्मद्वेषिमारकत्वं द्यावापृथिव्योर्व्यतिक्रान्तरूपत्वं सर्वमेव भगवत्याः स्वकीयवदनारविन्दानिर्गलितैरेव सूक्तामृतैः प्रत्यपादि ।

* * * *

सर्वं भोक्तुर्महादेवस्य सदृशी सधर्मिणीति मन्तव्यम् ॥

## No. 10875. सौन्दर्यलहरी—सव्याख्या.

## SAUNDARYALAHARĪ WITH COMMENTARY.

*Pages, 39. Lines, 8 on a page.*

Begins on fol. 1*a* of the MS. described under No. 10872.

Contains the first forty stanzas.

By Narasiṁha. The commentator refers to Lakṣmīdhara, another commentator on the work.

**Beginning:**

विघ्नध्वान्तनिवारणैकतरणिर्विघ्नाटवीहव्यवा-
ड्विघ्नव्यालकुलस्य मत्तगरुडो विघ्नेभपञ्चाननः ।
विघ्नोत्तुङ्ग(गिरीन्द्र)भेदनपविर्विघ्नाब्धिकुम्भोद्भवो
विघ्नौघौघघनप्रचण्डपवनो विघ्नेश्वरः पातु नः ॥

* * * *

नरसिंहो नमस्कृत्य तथा गुरुपदाम्बुजम् ।
सौन्दर्यलहरीव्याख्यां यथामति करोम्यहम् ॥

[इह खलु]ननु सौन्दर्यलहरीस्तोत्रज्ञानसंपादयितारो लक्ष्मीधरकृते लक्ष्मीधराख्ये व्याख्याने(यथा प्रवर्तन्ते तथा) न कोऽपि त्वत्कृते व्याख्याने प्रवर्तते । (ततः त्वदीय)व्याख्यानं व्यर्थमिति चेन्न, संग्रहरूपत्वादनतिविस्तरत्वादन्वयमुखत्वाच्च मत्कृतव्याख्यानेऽपि तेषां प्रवृत्त्युपपत्तेर्न वैयर्थ्यमित्यनुसन्धेयम् । इह खलु षड्गुणैश्वर्यसंपन्नाः कुमार्गमार्गप्रवर्तिनः ब्राह्मणादीन् सन्मार्गे प्रवर्तयितारः श्रीशंकरभगवत्पादाः शिवपत्नीमुमां स्वाभिमतपरदेवतारूपेण सकलसौन्दर्याकरत्वेन सकलगुणाधारत्वेन सकृच्छ्रवणमात्रेण निखिलपुरुषार्थप्रदायकेन श्लोकशतेन प्रस्तुवन्ति—

शिवः शक्त्या युक्तो ( . . . . ) पुण्यः प्रभवति ॥

शिवेति । हे भवति शिवः सर्वमङ्गलो(पे)तः । दीव्यतीति देवः सद्ब्रशिवः ।

**End:**

दयया करुणया जगतः उदयविधिमुत्पत्तिश्रियमुद्दिश्य सनाथाभ्यां मिलिताभ्यामुभाभ्यामेताभ्यां देवीशिवाभ्यामिदं परिदृश्यमानं जगत् भुवनं जनकजननीमत् सत् मातापितृमत् सत् जज्ञे उत्पन्नम् ॥

---

No. 10876. सौन्दर्यलहरी—सुधाविद्योतिनीव्याख्यासहिता.

SAUNDARYALAHARĪ WITH THE COMMENTARY SUDHĀVIDYŌTINĪ.

Substance, paper. Size, 11 × 8¾ inches. Pages, 248. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Breaks off in the thirty-third stanza.

Same work as the above, but with the same commentary as that described under No. 45*b* on page 132 of the Report on a Search for Sanskrit and Tamil MSS., 1896–97, No. 1.

According to this commentary the author of the text is Pravarasēna, the son of a Dravida king.

---

No. 10877. सौन्दर्यलहरी—सौभाग्यवर्धनीव्याख्यासहिता.

SAUNDARYALAHARĪ WITH THE COMMENTARY SAUBHĀGYAVARDHANĪ.

Pages, 114. Lines, 21 on a page.

Begins on fol. 1*a* of the MS. described under No. 446.

Complete.

Similar to the above. By Kaivalyāśrama, a disciple of Gōvindāśrama.

**Beginning:**

शब्दायमानतिमिरावलिसेव्यमानं निष्यन्दमानतिमिरोर्ध्वगसान्द्यरागम्।
विघ्नान्धकारतरणिं तरुणार्कशोणं वन्देऽर्धनागनरयोगनियोगयोगम् ॥

* * * *

(श्री)शङ्कराचार्यकृते स्तवेऽस्मिन् टीकां चिकीर्षोर्मम मन्दबुद्धेः ।
विदूषकस्येव वचोऽस्तु युष्मद्धासाय सन्तोऽस्मि तथापि धन्यः ॥

भगवान् परमकारुणिकः शङ्करावतारः शङ्कराचार्यः शिवशक्त्योरभेदं ज्ञापयितुं सकलप्रपञ्चसाक्षिण्या(:) ब्रह्माविनाभूतचिच्छक्तेः स्तुतिद्वारा मातृकादिमन्त्रानुद्धरति—

शिवः शक्त्या युक्तो(. . . .) मकृतपुण्यः प्रभवति ॥

शिव इति । जन्ममरणाद्यनेकक्लेशसंचयैरुपचीयमानतापत्रयरूपामङ्गलाभावाच्छिवः सदा मङ्गलरूपः चिद्विलाससमुल्लसितपरमानन्दनिर्भरः । एतादृशः शक्त्या कर्तुमकर्तुमन्यथाकर्तुं प्रभवन्त्या सामर्थ्यविशेषस्फूर्त्या यदि युक्तो भवति तदा प्रभवितुं प्रभुर्भवितुं शक्तो भवति ।

**End:**

तथा स्वकीयाभिर्वाग्भिः मातृकास्वरूपा त्वमेव तवैव मातृकाक्षरैस्तवैवेयं स्तुतिः परापश्यन्तीमध्यमारूपया त्वयैवोल्लसितवैखरीसमुज्जृम्भितत्वन्मयमातृकाकारैस्तवैव स्तुतिरिति मम स्तुतौ कर्तृत्वमेव नास्ति, सामर्थ्यं नास्ति, त्वमेव सर्वत्र अनुस्यूता चेतनारूपा प्रतिभासस इति भावः॥

एषा सौन्दर्यलहर्याष्टीका सौभाग्यवर्धनीनाम्नी ।
कैवल्याश्रमरचिता विलसत्परदेवताप्रमोदकरी ॥
अत्राबद्धं कृतधियः सम्यगालोच्य तत्त्वतः ।
शोधयन्तु विशेषेण चेद्धसन्तोऽयमञ्जलिः ॥
किं विज्ञापनयानया यदि भवेदस्मत्कृतेरक्षरं
ग्रन्थेऽत्र स्वयमेव साधुपुरुषा दूरीकरिष्यन्ति तत् ।
सन्मार्गे पतितानि कण्टककुलान्यालोक्य किं साधवो
दूरीकृत्य न यान्ति तानि पथिकाः कर्तुं परेषां हितम् ॥
प्रकाशमानां प्रथमे प्रयाणे प्रतिप्रयाणेऽप्यमृतायमानाम् ।
अन्तः सधन्यामनुसंचरन्तीमानन्दमुद्रामवलोकयामः ॥

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीगोविन्दाश्रमपादपूज्यशिष्यकैवल्याश्रमविरचिता सौन्दर्यलहरीटीका सौभाग्यवर्धननाम्नी संपूर्णा ॥

---

No. 10878. सौन्दर्यलहरी—सौभाग्यवर्धनीव्याख्यासहिता.

SAUNDARYALAHARĪ WITH THE COMMENTARY SAUBHĀGYAVARDHANĪ.

Substance, palm-leaf. Size, 17⅜ × 1⅝ inches. Pages, 10. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Complete.

Same work as the above, but with the addition of one stanza both in the beginning and in the end as given below :—

**Beginning:**

श्रीगुरुं गणपतिं दुर्गां यमं शङ्करमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वद विभूतये ॥

**End:**

अनुत्तरमहासंवित्स्रोतःस्वच्छन्दचारिणी ।
श्रीनृसिंहस(दा)नन्दनाथश्रीगुरुपादुकाम् ॥
पूजयामि नमामि तर्पयामि ध्यायामि आवाहयामि नमः ॥

The MS. is dated: the 5th day of the dark fortnight of the month of Kārttika in the year Vibhava. The scribe adds—

शनगवरान्ववायकलशाम्बुधिनिशाकरेण श्रीनृसिंहगुरुपादारविन्दमिलिन्देन गुर्वभट्टगर्भसंजातेन नरसंभट्टविदुषा आनन्दलहरीटीका यथाविधि लिखिता ॥

## No. 10879. सौन्दर्यलहरीव्याख्या —सौभाग्यवर्धनी.

### SAUNDARYALAHARĪVYĀKHYĀ : SAUBHĀGYAVARDHANĪ.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 75. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in the thirty-ninth stanza.

Same commentary as the above.

---

## No 10880. सौन्दर्यलहरीव्याख्या.

### SAUNDARYALAHARĪVYĀKHYĀ.

Pages, 86. Lines, 19 on a page.

Begins on fol. 12*a* of the MS. described under No. 5507.

Breaks off in the forty-first stanza.

Similar to the above. By Sadāśiva

**Beginning :**

श्रीविघ्नेशं गिरं गौरीं जननीं जनकं शिवम् ।
गुरूंश्च शिरसा सोऽहं प्रणमामीष्टसिद्धये ॥
श्रीमदानन्दलहरीरहस्यार्थप्रकाशिका ।
मया सदाशिवेनाद्य क्रियते तत्त्वसंम्मता ॥

अथ तत्रभवान् शङ्कराचार्यपरमकारुणिकः कलितसकलवेदशास्त्राणा-मप्यनधिगतागमरहस्यार्थानामैहिकामुष्मि . . . . . . माणानां नानातन्त्राभ्यासायालसानां पुरुषाणां लघूपायेन सकलमन्त्रपरिज्ञानाय प्रति-जानीते—शिवः शक्त्या इति। शिवः अकारः, अकारो ब्रह्मविष्ण्वीशेत्यभि-धानात्, शक्त्या एकारेण ।

**End :**

मन्त्राभ्युदयसिद्ध्यर्थमिदं जगत् अस्यात्मानम्, दक्षरक्षेति मन्त्रभाग-जालं जनकजननीमत् पितृमातृतुल्यं जज्ञे जातम्। इदं षट्सु श्लोकेषु आज्ञाचक्रादिहादिनित्याद्धि ।

## No. 10881. सौन्दर्यलहरीव्याख्या.
## SAUNDARYALAHARĪVYĀKHYĀ.

Pages, 82. Lines, 11 on a page.

Begins on fol. 58*a* of the MS. described under No. 5647.

Breaks off in the forty-first stanza.

Same work as the above.

---

## (24) ŚĀKTA.

---

## No. 10882. गुरुपादुकास्तोत्रम्.
## GURUPĀDUKĀSTOTRAM.

Pages, 2. Lines, 16 on a page.

Begins on fol. 12*a* of the MS. described under No. 421, wherein it is mentioned as Pādukāstōtram in the list of other works.

Complete.

Five stanzas in praise of the sandals of the spiritual teacher.

**Beginning:**

निषक्तमणिपादुकं नियमितेषुकोलाहलं
स्फुरत्किसलयारुणं नखसमुल्लसच्चन्द्रिकम् ।
परामृतसरोवरोदितसरोजरोचिष्णु तत्
भजामि शिरसि स्थितं गुरुपदारविन्दद्वयम् ॥

**End:**

पादुकापञ्चकस्तोत्रं पञ्चवक्त्रमुखोद्गतम् ।
पञ्चवाहक्रमप्राप्तं प्रपञ्चे दुर्लभं स्मृतम् ॥

---

## No. 10883. गुरुपादुकास्तोत्रम्.
## GURUPĀDUKĀSTŌTRAM.

Page, i. Lines, 9 on a page.

Begins on fol. 169*a* of the MS. described under No. 124, wherein it is given as Pādukāpañcakastōtra in the list of other works.

Complete.

Same work as the above, but without the last stanza and with colophon as given below :—

पादुकापञ्चकस्तोत्रं (संपूर्णम्) ॥

No. **10884.** गुरुपादुकास्तोत्रम्.
GURUPĀDUKĀSTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 173*a* of the MS. described under No. 5661, wherein it is given as Pādukāstōtra in the list of other works.

Complete.

Same work as the above, but the stanzas here are arranged in a different order.

No. **10885.** गुरुपादुकास्तोत्रम्.
GURUPĀDUKĀSTŌTRAM.

Pages, 5. Lines, 16 on a page.

Begins on fol. 190*a* of the MS. described under No. 424, wherein this work has been mentioned as Gurustōtra in the list of other works given therein.

Complete.

Similar to the above.

**Beginning:**

जगज्जनिस्थेमलयालयाभ्यामगण्यपुण्योदयभाविताभ्याम् ।
## No. 11092. मल्हणस्तवः.
## MALHAṆASTAVAḤ.

Pages, 9. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 2431.

Complete.

Same work as the above, but with a stanza in the beginning which belongs to the commentary and which is given below:—

ऊरेदेचमहामन्त्री मल्हणस्तुतिपञ्चिकाम् ।
लक्ष्मीधरकटाक्षेण कुरुते गुरुतेसदा(जसा) ॥

---

## No. 11093. मल्हणस्तवः—सव्याख्यः.
## MALHAṆASTAVAḤ WITH COMMENTARY.

Pages, 31. Lines, 8 on a page.

Begins on fol. 25*a* of the MS. described under No. 10912

Complete.

Same work as the above, but together with a commentary by Dēcayāmātya.

**Beginning:**

ऊरेदेचमहामन्त्री मल्हणस्तुतिपञ्चिकाम् ।
लक्ष्मीधरकटाक्षेण कुरुते गुरुतेजसा ॥

अथ मल्हणनामा कविरुमाकान्तं प्रस्तौति—

कान्ताकचप्रचय ( . . . . ) नमः शिवाय ॥

कान्ताकचेत्यादि[रिति]। कान्तानां मत्तकाशिनीनां कचप्रचयाः केशपाशाः, तेषु पुष्पाणि, तेषु शोभनो गन्धो यस्य सः सुगन्धिः, स चासौ गन्धश्च सुगन्धिगन्धः, पुष्पेषु सुगन्धिगन्धः पराग इति यावत् ।

**End:**

भक्तिरेव प्रमाणमिति क्षमस्व । भक्तभाषणं बालभाषणमिव न्यूनातिरिक्तावहं न भवति । अपिच भक्तवत्सलस्य प्रेमास्पदमेवेति भक्तवत्सलेन त्वया स्वीकर्तव्यमिति भावः ॥

अकरोदाकरो वाचां मल्हणस्तुतिपाञ्चिकाम् ।
लक्ष्मीधरकटाक्षेण देचयामात्यशेखरः ॥
मर्यादानतिलङ्घ्यतामुपगतो गम्भीरशौर्याश्रितो
भूनीभृत्प्रकराञ्चितोऽद्भुतमहासत्त्वो न दोनोऽपि च ।
नित्यं बाडबवृत्तिमेव विदधन्नानारसार्धाश्वरो
वीरेशाकृतिदेश(च)राजसचगम्भोधिः समुज्जृम्भते ॥
नाडें(डें)ड्गोपनृपते यूरेदेचप्रधानता ।
कचिदर्थः कचिन्मैत्री कचिद्धर्मः कचेद्यशः ॥

---

No. **11094.** मल्हणस्तवः— सव्याख्यः.

MALHAṆASTAVAḤ WITH COMMENTARY.

Pages, 7. Lines, 8 on a page.

Begins on fol. 97*a* of the MS. described under No. 10912.

Breaks off in the 7th stanza.

Same work as the above.

This manuscript is said to have been written by one Subbaṇṇā.

---

No. **11095.** मल्हणस्तवः—कर्णाटकटीकासहितः.

MALHAṆASTAVAḤ WITH KANARESE MEANING.

Pages, 52. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 11080.

Complete.

Same hymn as the above, but with Kanarese meaning of which the first stanza and the colophon are hereunder given: by Guru dēva, son of Gurulingadēva and grandson of Paṇḍitārādhyadēva.

चन्द्रार्धमौलिं कालारिं भुजगावलिभूषितम् ।
कण्ठेकालं महादेवं नमामि गिरिजापतिम् ॥

**Colophon:**

इति श्रीमद्वे(दा)गमोक्तोपनिषत्पुराणोक्तमार्गप्रवर्तनप्रवीणपण्डिताराध्य-देवनामार्यवर्यतनूभवगुरुलिङ्गदेवनामधेयदेशिकेन्द्रप्रतीकोद्भूतगुरुदेवाख्येन कर्णाटभाषाकृता मल्हणस्तवटीका परिसमाप्ता ॥

## No. 11096. महादेवगद्यम्.
## MAHĀDĒVAGADYAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 106*a* of the MS. described under No. 119, wherein this work has been mentioned as Bhargastuti in the list of other works.

Complete.

A prose work consisting of a number of eulogistic attributes addressed to Śiva.

**Beginning :**

श्रीमन्महादेव, सकलदेवतानिस्तारक, सामरूप, सामवेद सर्वाङ्ग-भस्मा(स्मधा)रक, सनत्कुमारादिमुनिगणवन्द्य, सुन्दर, त्र्यम्बक, त्रिशूलधर ।

**End :**

आद्यन्तरहित, परमात्मन्, परञ्ज्योतिः, भवानीवल्लभ, भक्तवत्सल, शिवकर, शिव, नमस्ते नमस्ते नमस्ते नमः ॥

---

## No. 11097. महादेवगद्यम्.
## MAHĀDĒVAGADYAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 106*b* of the MS. described under No. 119, wherein this work has been mentioned as Bāṇagadyam in the list of other works.

Complete.

Similar to the above.

**Beginning :**

ओं जय जय, महादेव, महाकाल, महाकालास्पद, महाकालगल, नाकौक(:)प्रत्यनीकनाशकर, नारा(य)णप्रिय, नारदोपगीयमानशुभचरित-

**End :**

समस्तलोकैकनाथ, शिवाशिव . . . . . नमस्ते नमस्ते नमः ।
अपगतपापाय नमः कपिलजटामण्डलेन्दुखण्डाय नमः ।
द्विपचर्मपटाय नमस्त्रिपुरमखघ्नाय दैवताय नमः ॥

## No. 11098. महादेवस्तोत्रम्.
## MAHĀDĒVASTŌTRAM

Pages, 3. Lines, 5 on a page.

Begins on fol. 281*b* of the MS. described under No. 7247

Complete.

A number of stanzas of praise and prayer addressed to Mahādēva or Śiva.

**Beginning:**

महादेव महादेव महादेवेति वादिनम् ।
वत्सं गौरिव गौरीशो धावन्तमनुधावति ॥

महादेव महादेव महादेवेत्ययं ध्वनिः ।
सुधियो मुक्तिकान्तायाः पाणिग्रहणडिण्डिमः ॥

**End:**

कोटयो ब्रह्महत्यानामगम्यागमकोटयः ।
सद्यः प्रलयमायान्ति [श्री]महादेवेति कीर्तनात् ॥

* * *

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष महेश्वर ॥
प्रातः काले शिवं दृष्ट्वा निशि पापं विनश्यति ।
आजन्मकृतमध्याह्ने सायाह्ने सप्तजन्मसु ॥
महादेवं महेशानं महेश्वरमुमापतिम् ।
महासेनगुरुं वन्दे महाभयनिवारणम् ॥
सकलभुवनकर्ता साम्बमूर्तिः शिवश्चेत्
सकलमपि पुराणं सागमं चेत्प्रमाणम् ।
यदि भवति महत्त्वं भूतिरुद्राक्षभाजां
किमिति न मृतिरस्मद्रोहिणः स्यादकाण्डे ॥

## No. 11099. महादेवस्तोत्रम्.
## MAHĀDĒVASTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 28*a* of the MS. described under No. 6600, wherein it is given as Mahādēvāṣṭaka in the list of other works

Contains ten stanzas.

Same work as the above.

---

## No. 11100. महादेवस्तोत्रम्.
## MAHĀDĒVASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 181*b* of the MS. described under No. 119, wherein this work has been mentioned as Mahādēvaṣōḍaśastava in the list of other works

Contains sixteen stanzas.

Same work as the above.

---

## No. 11101. महादेवस्तोत्रम्.
## MAHĀDĒVASTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 20*b* of the MS. described under No. 5422, wherein this work has been mentioned as Mahādēvāṣṭaka in the list of other works.

Contains ten stanzas.

Same work as the above.

---

## No. 11102. महादेवाष्टकम्.
## MAHĀDĒVĀṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 9*a* of the MS. described under No. 10955

Complete.

Eight stanzas in praise of Mahādēva or Śiva.

**Beginning :**

कृपासिन्धुपूर गिरीन्द्रप्रचार जपाहृदयकार चतुर्वेदसार ।
महादेव शम्भो महादेव शम्भो महादेव शम्भो महादेव शम्भो ॥ १ ॥
गिरामेश्व(क)रूप विशालप्रतापहरादि(द्रि)न्द्रचाप अजाण्डप्रदीप ।
महादेव शम्भो (महादेव शम्भो महादेव शम्भो महादेव शम्भो) ॥२॥

**End:**

गणेशाधिपत्य गणानन्दनृत्य फणीनादिस्तुत्य प्रपञ्चैकनित्य ।
महादेव शम्भो महादेव शम्भो महादेव शम्भो महादेव शम्भो ॥ १०॥

---

No. **11103.** महिम्नस्स्तवः.

MAHIMNASSTAVAḤ.

Pages, 3. Lines, 31 on a page.

Begins on fol. 54*a* of the MS. described under No. 1493, wherein this work has been omitted to be included in the list of other works.

Complete.

Same work as the one described under R.No. 399(*a*) of the Triennial Catalogue of MSS., Vol. I, Part I-B. The authorship of this hymn is attributed to Puṣpadanta by some and to Kumārila Bhaṭṭācārya by certain other commentators. Ahōbala states in his commentary that Puṣpadanta, a Gandharva, composed this hymn to glorify Śiva when He appeared before him in response to his severe penances. In another commentary it is said that Puṣpadanta composed this hymn in expiation of the sin of disregarding the remains of offerings made to Śiva. Dēcayāmātya, another commentator, attributes it to Kumārila Bhaṭṭa whom he considers as an incarnation of Subrahmaṇya, son of Śiva.

**End:**

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठति परमभक्त्या शुद्धचित्तः पुमान् यः ।

स भवति शिवलोके रुद्रकल्पस्तदैव
प्रचुरतरधनायुःपुत्रवान् कीर्तिमांश्च ॥
दीक्षादानं तपस्तीर्थं ध्यानयज्ञादिकाः क्रियाः ।
महिम्नस्स्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥
महेशान्नापरो देवो महिम्नो नापरं(रः) स्तवः ।
अघोरान्नापरो मन्त्रोः नास्ति तत्त्वं गुरोः परम् ॥

**Colophon :**

महिम्नस्स्तवः सम्पूर्णः ॥

---

## No. 11104. महिम्नस्स्तवः.

## MAHIMNASSTAVAḤ.

**Pages, 3.** Lines, 5 on a page.

Begins on fol. 9*a* of the MS. described under No. 2972.

Breaks off in the twelfth stanza.

Same work as the above.

---

## No. 11105. महिम्नस्स्तवः.

## MAHIMNASSTAVAḤ.

**Pages, 14.** Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 2550.

Complete.

Same work as the above, but with the additional stanzas in the end as given below :—

याचेऽहं याचेऽहं पुनरपि तामेव तामेव ॥
श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन स्तोत्रेण किल्बिषहरेण हरिप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन संप्रीणितो भवति भूतपतिर्महेशः ॥

* * * *

असमाप्तमिदं स्तोत्रं पुण्यगन्धर्वभाषितम् ।
अनौपम्यं मनोहारि शैवमीश्वरवर्णनम् ॥

* * * *

एककालं द्विकालं वा त्रिकालं यः पठेन्नरः ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

श्रीमहिम्नस्स्तवः पूर्णः ॥

शिवेति परमेशेति शङ्करेति हरेति च ।
पार्वतीप्राणनाथेति स्मर जीव निरन्तरम् ॥
मत्समः पातकी नास्ति त्वत्समो नास्ति पापहा ॥
इति मत्वा महादेव यथेच्छासि तथा कुरु ॥

---

No. **11106.** महिम्नस्स्तवः.

MAHIMNASSTAVAḤ

Pages, 10. Lines, 7 on a page.

Begins on fol. 25*b* of the MS. described under No. 200, and not on fol. 25*a* as stated therein.

Complete.

Same work as the above, but with the following additional stanza at the end:—

याचेऽहं याचेऽहं शिव तव चरणारविन्दयोर्भक्तिम् ।
याचेऽहं याचेऽहं पुनरपि तामेव तामेव ॥

**Colophon:**

इति श्रीपुष्पदन्ताख्यगन्धर्वविरचितमहिम्नस्स्तवः समाप्तः ॥

---

No. **11107.** महिम्नस्स्तवः.

MAHIMNASSTAVAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 11061.

Wants six stanzas in the beginning.

Same work as the above.

**Colophon:**

इति महिम्नस्स्तोत्रं सम्पूर्णम् ॥

## No. 11108. महिम्नस्स्तवः—आन्ध्रभाषाटीकासहितः.
## MAHIMNASSTAVAḤ WITH TELUGU MEANING.

Pages, 36. Lines, 6 on a page.

Begins on fol. 35*a* of the MS. described under No. 5500.

Complete.

Same work as the above, but with the meaning of the stanzas in the Telugu language.

The copying of this manuscript is said to have been completed on the 7th day of the bright fortnight in the month of Kārttikai of the year Bhava.

---

## No. 11109. महिम्नस्स्तवः.
## MAHIMNASSTAVAḤ.

Pages, 15. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 10909.

Complete.

Same work as the above. The authorship is here attributed to Bhaṭṭapādācārya.

**Colophon:**

इति श्रीमद्भट्टपादाचार्यविरचितं महिम्नस्तोत्रं सम्पूर्णम् ॥

---

## No. 11110. महिम्नस्स्तवः.
## MAHIMNASSTAVAḤ.

Pages, 17. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 10358.

Complete.

Same work as the above.

---

## No. 11111. महिम्नस्स्तवः.
## MAHIMNASSTAVAḤ.

Pages, 13. Lines, 12 on a page.

Begins on fol. 117*a* of the MS. described under No. 2710.

Complete.

Same work as the above.

## No. 11112. महिम्नस्स्तवः.
## MAHIMNASSTAVAḤ.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 7. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1a. The other work herein is Kirātārjunīya 5a.

Complete.

Same work as the above, but with the additional stanzas at the end as given below :—

श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन स्तोत्रेण किल्बिषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन सुप्रीणितो भवति भूतपतिर्महेशः ॥

* * * *

जातस्य जायमानस्य गर्भस्थस्यापि देहिनः ।
मा भून्मम कुले जन्म शम्भुर्यस्य नं दैवतम् ॥

**Colophon:**

इति श्रीपुष्पदन्ताचार्यविरचितं महिम्नस्स्तोत्रं सम्पूर्णम् ॥

---

## No. 11113. महिम्नस्स्तवः.
## MAHIMNASSTAVAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 52a of the MS. described under No. 5858.

Contains only four stanzas.

Same work as the above.

---

## No. 11114. महिम्नस्स्तवः.
## MAHIMNASSTAVAḤ.

Pages, 11. Lines, 6 on a page.

Begins on fol. 9b of the MS. described under No. 2418.

Complete.

Same work as the above, but with colophon.

## No. 11115. महिम्नस्स्तवः.

MAHIMNASSTAVAḤ.

Pages, 9. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 5928.

Almost complete ; breaks off in the last stanza.

Same work as the above.

---

## No. 11116. महिम्नस्स्तवः.

MAHIMNASSTAVAḤ.

Pages, 6. Lines, 9 on a page.

Begins on fol. 153*b* of the MS. described under No. 119.

Complete.

Same work as the above.

---

## No. 11117. महिम्नस्स्तवः.

MAHIMNASSTAVAḤ.

Pages, 10. Lines, 7 on a page.

Begins on fol. 32*a* of the MS. described under No. 2155.

Complete.

Same work as the above, but with one additional stanza only at the end as given below :—

कुबेरमित्र देवेश भूतेश त्रिपुरान्तक ।
पार्वतीहृदयानन्द प्रथमार्घ्यं गृहाण मे ॥

This manuscript is said to have belonged to one Rāmadāsan Rāmacandran.

---

## No. 11118. महिम्नस्स्तवः.

MAHIMNASSTAVAḤ

Pages, 7. Lines, 9 on a page.

Begins on fol. 4*a* of the MS. described under No. 120 and not on fol. 3*a* as stated therein.

Complete.

Same work as the above.

At the end of the work, the following Telugu stanza is found in which it is stated that Viśvanāthakavi wrote a commentary on this work at the instance of Bappati Cenna Mallanāyakuḍu.

చ॥ సకలకళాగమజ్ఞవిలసన్మతి బప్పతి చెన్నమల్లి నా
యకుఁడు మహిమ్న సంస్తుతికి నాంధ్రవచస్స్థితిఁ డీక విశ్వనా
థకవివరేణ్యుచేతను ముదంబుఁరంగ రచించె బండితుల్
సుకవులుఁజూచి మెచ్చఁగను క్షోణితలంబున శాశ్వతంబుగన్ .

---

No. **11119.** महिम्नस्स्तवः—सव्याख्यः.

MAHIMNASSTAVAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 14 × 1⅜ inches. Pages, 57 Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Same text as the above together with the commentary entitled Kalpalatā which was written by Ahōbala, son of Nṛsiṁhabhaṭṭa of the Bhāskara family and Rāmāmbā.

**Beginning :**

ईशानं सर्वविद्यानामीश्वरं पार्वतीपतिम् ।
भजामि श्रीमहादेवं सर्वदेवोत्तमं प्रभुम् ॥

व्यालमालमनलाम(ल)फालं शूलपालममलामलशीलम् ।
कालकालमकलङ्क(ङ्कि)लमौलिरीतिं व्यालमनुवेलमलीलम् ॥

महेश्वराराधनदत्तशीलो श्रीमन्महिम्नार्थविचारशीलः ।

अहोबलः पूजितकालकालः महिम्नटीकां तनुते सुशीलः ॥

पुष्पदन्तनामगन्धर्वविशेषः शिवैकशरणो भूत्वा शिवप्रसादार्थं हिमवत्पर्वते तपः कृत्वा स्वतपस्सन्तुष्टे शङ्करे प्रसन्ने स्वशक्त्या शिवचरणाम्बुरुहं श्रीफलदलादिभिः समभ्यर्च्य शङ्करं स्तोतुमिच्छन् शङ्करगुणानामनन्तत्वेनाप्रमेयत्वा(त्) गुणकथनरूपस्तुतिकरणमशक्यमित्याशङ्क्य स्वानौद्धत्यश्च प्रकटयन् स्तोतुमारभते ।

महिम्नः पारं ते ( . . . . . . . ) तदवसन्नास्त्वयि गिरः ॥

हे हर आध्यात्मिकाधिभौतिकाधिदैविकादिसकलदुःखनिवर्तकत्वेनैव श्रुतिस्मृतीतिहासपुराणादिषु प्रसिद्धोऽसि तथाच मद्दुःखहरणे पार्थक्येन व्यापारं (न) करिष्यसीति भावः। हे हर ते महिम्नः पारमवधिमविदुषः एतावानेव श्रीमहादेवमहिमेतीयत्तामजानतः; कर्तरि षष्ठी।

**End:**

अथेदं स्तोत्रं पठितं सदभीष्टदायकमिति कश्यपो वदति देवानृषीन्प्रत्यपि अघोरेत्यादिना। अथेदानीं शिवस्तुतिगुम्भितमिदं स्तोत्रं पठितम्। स तु पौण्डरीकादिमहायोगरत्नतुलादिसकलमहादानजपकाश्यल्पप्रयागादिसकलतीर्थपञ्चाग्निसेवादिसमस्ततपोदीक्षादि चाधिकरोतीत्याह—दीक्षेत्यादिना।

सद्भस्मरेखाङ्कविशालफालः शिवार्चनास्वादितचारुशीलः।
अहोबलः कीर्तितकालकालो महिम्नटीकां विदधे त्रिविज्ञाम्(:)॥

**Colophon:**

इति श्रीमत्सकललोकप्रसिद्धश्रीमद्भास्करवंशरत्नमहोदधिसंभूतसकलविद्यानिधिभूतश्रीनृसिंहभट्टमहोपाध्यायतनूजेन रामाम्बागर्भसंभूतेन अहोबलेन श्रीविश्वेश्वरचरणपरिचरणैकानिदानेन विरचिता श्रीमहिम्नस्तवव्याख्या कल्पलता सम्पूर्णा॥

---

No. **11120.** महिम्नस्स्तवः—सव्याख्यः.

MAHIMNASSTAVAH WITH COMMENTARY.

Pages, 46. Lines, 8 on a page.

Begins on fol. 1*b* of the MS. described under No. 10912.

Foll. 1 to 6 are almost broken.

Complete.

Same work as the above, but with the commentary of Dēcayāmātya, son of Annayāmātya of Kauṇḍinyagōtra. He gives some details in connection with his genealogy and states that he was a disciple of Candramauli, a descendant of Prōlanārādhya, and of Lolla Lakṣmīdhara, and that he was a minister along with Nādiṇḍla Gōpa and Sālva Timma.

**Beginning:**

. . . वंशे वनजासनाभाः कौण्डिन्यनाम्ना कलिता मुनीन्द्राः ।
षड्दर्शनीदर्शनपारगैर्यैर्वेदाश्च यज्ञाश्च विशेषितार्थाः ॥
तदन्ववाये तपन . . . . . . . ।
तद्धर्मपत्नी तरुणीमणीनां वराग्रगण्या भुवि कोम्ममाम्बा ॥
उमया परमेशानं रमया पुरुषोत्तमम् ।
संस्तुवन्त्यन्नयामात्यमनया . . . . . ॥
. . . . म्बागर्भपाथोधेः समभूवंस्त्रयः सुताः ।
अय्यलन्नप्रधानाख्यस्तिप्पयामात्यशेखरः ॥
देचिराजमहामन्त्री पित्रोः पादाब्जसेवकाः ।
तत्रा . . . . . . . . . . . . .
. . . . धर्मपत्नी बभूवाय्यलुमन्त्रिणः ।
अरुन्धती वसिष्ठर्षेरनसूया भृगोरिव ।
तस्या(म)य्यलुमन्त्रीशात् पुत्रीद्वयम . . . . ।
. . . . . त्यमणिर्गणाधिपसमस्तयोः ॥
कुमारसदृशः श्रीमांस्तिप्पयामात्यशेखरः ।
कवे विभो तिप्पगवात्यहीननहीत्यवागप्पतिभोविवेकः ।
इत्यादिका . . . . . . . . ॥
. . . . . . कृपा रमाम्बा कृपणार्तिहन्त्री ।
अपारमानान्वयसिन्धुजाता सातिप्पयार्यासद(दस)विष्ट सूनुम् ॥
कोण्डयामात्यचन्द्रोऽयं मण्डलाधिपवैभवः ।
कुण्डलीन्द्रसमो वाचा चण्डरश्मिप्रभोज्ज्वलः ॥
मण्डनाधिकलावण्यः खण्डनः खलवैरिणाम् ।
दण्डनाथ . . . . . . . . . . ॥
स चान्नयामात्य इति प्रसिद्धः समन्वय . . . वः ॥

अन्नयः सचिवः श्रीमान् स[न्नय]न्नयः सर्ववर्त्मसु ।
सुन्नयार्यसमो विद्वान् सन्नयागार्चितातिथिः ॥
सन्नगेश्वरसंकाशः पन्नगेश्वर . . . . ।
. . . . . . . . . . . . . द्धो
दुग्धाम्भोराशिमध्यात्सरसिजसदनेवाम(वेयमा)विर्बभूव ।
अस्याः कृष्णाम्बिकायाः पतिरभिजनवानन्नयामात्यवर्य-
स्तस्याः पद्मालयायाः पतिरभिजनवान् पद्मनाभो (यथैव) ॥
. . . लग्नं विदुषां पुष्णाति मृगतृष्णिकाम् ॥
कूर्मावतारपादा च मीनावतरलोचना ।

* * * *

ब्रह्मा यथा वेदचतुष्टयेन भात्यन्नयः पुत्रचतुष्टयेन ।

* * * *

श्रीपर्वताख्यः प्रथमः कुमारः पुत्रो द्वितीयोऽय्यलुमन्त्रिवर्यः ।
तृतीयपुत्रोऽजनि देचमन्त्री ततोऽभवत्कोण्डय(मन्त्रिवर्यः) ॥
. . . . . . गैः श्रीपर्वतेन मुनिना सदृशप्रभावः ।
श्रीपर्वतेश्वरपदाम्बुजचञ्चरीकः श्रीपर्वताब्धिनगचीरगभीरचित्तः ॥
युगन्धरो नीतिविचारणायां धुरन्धरः स्वामिहितक्रियायाम् ।
जलन्ध . . . . . . . . अय्यलार्यः ॥
यद्बुद्ध्या बुद्धिमन्तो निखिलबुधगणा यस्य शौर्येण शूरा
भृत्या यद्भाग्यलक्ष्म्या प्रतिदिनमभवन् बान्धवा भाग्यवन्तः ।
यन्नीत्या नीतिमन्तः सकलनृपवरामात्यवर्गा भवेयुः
. . . . . . . . . . . . . वानय्यलार्यः ॥
. . . . . कोण्डवंश्यो यस्य प्रभावगुणसंगणनाविवर्तो ।
सोऽयं गुरुर्भवति यूरकुलावतंसश्रीदेचमन्त्रिनरवीरमहेश्वरस्य ॥

यद्रक्षादीक्षितोऽसौ परमशिवमत . . . . . ।
यस्मादस्त्रेशमादादखिलमनुपतिं देचयामात्यवर्यः
सोऽयं श्रीचन्द्रमौळिर्जयति गुरुवरप्रोलनाराध्यवंश्यः ॥

नाडि(दि)ण्ड्गोपसचिवः सचिवाग्रगण्यः श्रीसाल्वतिम्मसचिवेश्वर. . ।
. . . . . . . देचार्यमन्त्रिणि निधाय सुखं समास्ते ॥

श्रीकोण्डवीडुनगरे नगरे (भ)हर्म्यभर्म्याणि भूषणवराणि वितानजालम् ।
छत्रध्वजांश्च मखवैरिमहेश्वराय प्रादत्त देचय . . . . . ॥

. . . . . . सप्तभुवनव्याप्तं यशो यत्कुले
सप्तर्षिप्रवरो हि यत्कुलगुरुः कौण्डिन्यनामा मुनिः ।
यूरेग्रामनिवासवासनवशाद्यूराख्यया विश्रुतः
सोऽयं देचयमन्त्रि . . . . . ॥

* * * *

(शू)रः शौर्यप्रथितमहसां पुण्यवान् पुण्यवत्सु ।
प्राज्ञः प्रज्ञेष्वतुलमहिमा नीतिमान् नीतिमत्सु
श्रीमान् देचप्रभुमणिरसावन्नयामात्यसूनुः ॥

* * * *

स चायं देचयामात्यो महिमस्तुतिपञ्चिकाम् ।
लक्ष्मीधरकटाक्षेण कुरुते गुरुतेजसा ।
विश्वेशपार्वतीपुत्रं लोल्लक्ष्मीधराह्वयम् ।
विद्वद्गणपतिं वन्दे द्विजराजशिरोमणिम् ॥

तत्र तावद्ब्र . . . . . . . . . . .
स्तुवन्ति महिम्नः पारं त इत्यादिस्तुत्या । अत्र इमां ग्रन्थां (कथां) वदन्ति—पूर्वं बिल्हणो नाम महाराजः राजन्यवंशाग्रणीः धरणीमपीपलत् । तस्मिन् समये बौद्धमतबाहुल्यात् . . . . . . . .

यथा राजा तथा प्रजा इति न्यायेन सर्वाः प्रजास्तन्मतेनावार्तिषत । ततो वैदिकः सर्वोऽपि मार्गः खिलीकृतस्तेन राज्ञा । तत इन्द्रादयो देवा इमं वृत्तान्तं महादेवाय न्यवेदयन् । ततो महादेवः (कुमारगजान) नावाहूयो-भाभ्यां भूलोकमवतीर्य वेदमार्गो निर्वाह्या इत्याज्ञापितवान् । तदाज्ञानु-सारेण कुमारस्वामी भट्टाचार्यरूपेण जनित्वा हेरम्बस्तु प्रभाकररूपेण . . . . . . परिषदां त्रिल्हणाख्यराजन्यस्य च वेदान्तवेद्यं परमे-श्वरं प्रत्यक्षं दर्शयामासतुः स्तोत्रद्वयेन । भट्टाचार्यकृतं महिम्नः पारं त इत्यादिकम् । प्रभाकरगुरुकृतं तु स्तोत्रं कथ्यते—जय . . . . तपसि निरत पृथुलभुजमहित जय विषमनयन जय गिरिपशयन ( . . . . . .) जय कलितभुवन नमस्ते नमस्ते । अत्र कैश्चिदुक्तं भट्टा-चार्यः प्रभाकरगुर(रु)श्च निरीश्वरवादं कृतवन्तौ । तदनन्तरं देवपूजा-समये पेटिकायां देवता नास्ति । अतः परमपचारनिवृत्त्यर्थं ( . . . . . . . . . .) गुरुमते वा उपास्यत्वेन देवता नास्तीति नो-क्तम् । उपासना फलं ददातीत्युक्तमेव । अतोऽस्मदुक्तकथानुसंधानमेव सम्यक् । इतरेषां तु भ्रममूलमेतत् । यत्प्रभाकरगुरुणा तर्कवादे ईश्वरवादे ( . . . . .) भट्टाचार्यैरपि महिम्नः स्तुतिः पर(ठि)तेति ।

**End:**

लक्ष्मीधरकटाक्षेण देचयामात्यशेखरः ।
अकरोदाकरो वाचां महिम्नस्स्तुतिपञ्चिकाम ॥

---

No. **11121.** महिम्नस्स्तवः—सव्याख्यः.

MAHIMNASSTAVAḤ WITH COMMENTARY.

**Pages,** 106. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 3776.

Complete.

Same commentary as the above.

This MS. is said to have been copied by Vēṅkaṭēśvara.

**Beginning:**

महिम्नः पारं ते ( . . . . . ) निरपवादः परिकरः ॥

अस्यार्थः—महिम्नः अत्यैश्वर्यस्य ते तव परमुत्कृष्टं पारमविदुषोऽविदितस्य यद्यसदृशी अननुरूपा चेत् स्तुतिः स्तोत्रं ब्रह्मादीनां ब्रह्मा आदिर्येषान्ते वाचस्पतिप्रभृतयः तेषामपि अपिशब्दः सम्भावनायाम् । तत्तर्हीत्यर्थः ।

**End:**

स पुमान् इह लोके प्रचुरतरधनायुः पुत्रवान् कीर्तिमांश्च भूत्वा शिवलोके मनुष्यः सन् रुद्रतुल्यो भवति ।

महेशान्नापरो ( . . . . . . ) गुरोः परम् ॥

स्पष्टोऽर्थः ॥

**Colophon:**

महिम्नव्याख्यानं समाप्तम् ॥

---

No **11122.** महिम्नस्स्तवः—सव्याख्यः.

MAHIMNASSTAVAH WITH COMMENTARY.

Pages, 57. Lines, 21 on a page.

Begins on fol 73*a* of the MS. described under No. 3907.

Contains twenty-eight stanzas only.

In the introduction to this commentary extracted below, a brief account of the origin of this eulogy on Śiva is given. This commentary purports to be a summary of the previous commentaries on the work.

**Beginning:**

विश्वेश्वरं गुरुं मत्वा महिम्नाख्यस्तुतेरयम् ।
पूर्वाचार्यकृतव्याख्यासङ्ग्रहः क्रियते मया ॥

एवं किलोपाख्यायते कश्चित्किल गन्धर्वराजः कस्यचिद्राज्ञः प्रमदवनकुसुमानि हरन्नासीत् । तद् ज्ञात्वा च शिवनिर्माल्यलङ्घनेन मत्पुष्प-

चा(ह)रस्या . . . नादिका सर्वापि शक्तिर्विनङ्क्ष्यतीत्यभिप्रायेण राज्ञा शिवनिर्माल्यं पथि निक्षिप्तम् । तदप्रतिसन्धाय च गन्धर्वराजस्तत्र प्रविशन्नेव कुण्ठितशक्तिर्बभूव । ततश्च शिवनिर्माल्यलङ्घनेनैव ममैतादृशं वैकल्यमिति प्रणिधानेन विदित्वा परमकारुणिकं भगवन्तं सर्वकामदं तमेव तुष्टाव । ननु स्तुतिर्नाम गुणकथनं तच्च गुणं ज्ञानाधीनम् अज्ञानस्य कथनासम्भवात् तथा च भगवतो गुणानामनन्तत्वेन ज्ञातुमशक्यत्वात्कथं तत्कथनरूपा स्तुतिरनुरूपा भवेत् अननुरूपकरणञ्चोपहासायैवेति या शङ्का तदपनोदव्याजेन स्वस्यानौद्धत्यन्दर्शयन्नेव भगवन्तं स्तोतुमारभते ।

महिम्नः ( . . . . . . . . . ) निरपवादः परिकरः ॥

हे हर सर्वाणि दुःखानि हरतीति हरयोग्यं संबोधनम् । सर्वदुःखहरत्वेन प्रसिद्धोऽपि न मम दुःखंहरणे पृथग्व्यापारं करिष्यसीत्यभिप्रायः । हे सर्वदुःखहर तव महिम्नः परं पारमवधिम् ।

**End:**

एवं जातभक्त्युद्रेको नमस्कारमेवानुवर्तयन् दुरूहमहिमत्वेन स्तौति ॥

---

### No. 11123. महिम्नस्स्तवव्याख्या.

### MAHIMNASSTAVAVYĀKHYĀ

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 28. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains a commentary different from the previous one on the first thirty-three stanzas only.

**Beginning:**

महिम्न इति । हे हर शम्भो तव महिम्नः महत्त्वस्य . . . . . . . . ब्रह्मादीनामपि गिरो वाचः त्वयि विषये अवसन्नाः कुण्ठिताः । अथेति प्रकारान्तरे ।

**End :**

अनेन चकितं मां महादेव तव चरणयोः भक्तीरमन्दीकृत्य भीतिराहितं कृत्वा वाक्यपुष्पोपहारम् आधात् वाक्यान्येव पुष्पाणि तेषामुपहारः पूजा तामकल्पयत् । अन्यत्सुगमम् ॥

---

## No. 11124. महिम्नस्स्तवव्याख्या.
## MAHIMNASSTAVAVYĀKHYĀ.

Pages, 23. Lines, 6 on a page.

Begins on fol. 6*a* of the MS. described under No. 5928.
Contains the commentary on the first thirty-three stanzas only.
Same work as the above.

**Beginning :**

यस्य मानुषवेषस्य मुखं करिमुखोपमम् ।
विघ्नं निघ्नन् गणाधीशः . . . . . ॥

* * * *

हे हर शम्भो ते तव महिम्नः महत्त्वस्य परं पारमत्यर्थमवसानम् अविदुषः अविजानतः पुरुषस्य स्तुतिः यद्यसदृशी अननुरूपा तर्हि ब्रह्मादीनामपि गिरः वाचः त्वयि विषये अवसन्नाः कुठि(ण्ठि)ताः । अथेति पक्षान्तरे ।

See under the previous number for the end.

---

## No. 11125. महेशाष्टकम्.
## MAHĒŚĀṢṬAKAM.

Page, 1. Lines, 16 on a page.

Begins on fol. 92*a* of the MS. described under No. 5593.
Complete.
Eight stanzas in praise of Mahēśvara or Śiva.

**Beginning :**

संसारदावानलशामकाय मृत्युञ्जयायामितविक्रमाय ।
सुरासुरौघार्चितपादुकाय शिवासमेताय महेश्वराय ॥

**End :**

नमस्ते नमस्ते सदा चन्द्रमौले नमस्ते नमस्ते सदा शूलपाणे ।
नमस्ते नमस्ते सदोमैकजाने नमस्ते नमस्ते नमस्ते महेश ॥

**Colophon :**

इति सम्पूर्णम् ॥

---

No. **11126.** मातृभूतेश्वरस्तोत्रम्.
MĀTṚBHŪTĒŚVARASTŌTRAM.

**Pages, 2. Lines, 10 on a page.**

Begins on fol. 160*a* of the MS. described under No. 631.

Complete.

A eulogy by Sudarśanapaṇḍita on Mātṛbhūtēśvara, a form of Śiva worshipped in Trichinopoly. It is stated in the Tamil Śevvandipurāṇam that God Śiva once appeared in the form of her mother to a pregnant woman in Tirichinopoly, ministered to her wants and enabled her to deliver with ease. This story accounts for the designation, Mātṛbhūtēśvara.

**Beginning :**

प्रसन्नवक्त्रमेकदन्तमादिपूज्यमीश्वरं
सुरासुरेन्द्रसेव्यमानपादपद्ममव्ययम् ।
समस्तशोकनाशकारणं सुखप्रदं नृणाम्
उमासुतं नमामि तं समस्तविघ्नशान्तिदम् ॥ १ ॥
अजायमानमप्यनेकधा सुजायमानमुं
पुराणमप्यहं युवानमादिकारणं शिवम् ।
अपाणिपादमप्यनेकपाणिपादचक्षुषं
नमामि मातृभूतसाम्बमूर्तिमेव सन्ततम् ॥ २ ॥

अनन्तरूपनामधेयमप्यनामरूपकं
कपालभिक्षमप्यशेषलोकसर्वकामदम् ।
अनाथमप्यशेषलोकनाथमीशमच्युतं
नमामि . . . . . . . . . . तम् ॥ ३ ॥

**End:**

इयं समस्तकामदा नवप्रसूनमालिका
नृणामशेषकर्मजन्यशोककक्षपावका ।
सुदर्शनाख्यपण्डितेन भक्तियुक्तचेतसा
विलिख्यते शिवप्रसादलेशलाभवैभवात् ॥ ११ ॥
या कृपा गर्भिणीत्राणे या कृपा मुनिनन्दने ।
मातृभूतेश्वर क्षिप्रं सा कृपा मयि दीयताम् ॥ १२ ॥

---

No. **11127.** मार्कण्डेयाष्टकम्.

MĀRKAṆḌĒYĀṢṬAKAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 180*b* of the MS. described under No. 119.[1]

Complete.

Same work as that described under R. No. 324(*j*) of the Triennial Catalogue of MSS., Vol. I, Part 1--A.

---

No. **11128.** मार्कण्डेयाष्टकम्.

MĀRKAṆḌĒYĀṢṬAKAM.

Pages, 2. Lines, 4 on a page.

Begins on fol. 62*b* of the MS. described under No. 6600, wherein it is given as Mārkaṇḍēyastuti in the list of other works.

Complete.

Same work as the above.

No. **11129.** मार्कण्डेयाष्टकम्.

MĀRKAṆḌĒYĀṢṬAKAM.

**Pages, 5.** Lines, 7 on a page.

Begins on fol. 152*a* of the MS. described under No. 781 and not on fol. 154*b* as stated therein.

Complete.

Same work as the above.

---

No. **11130.** मार्कण्डेयाष्टकम्.

MĀRKAṆḌĒYĀṢṬAKAM.

**Pages, 2.** Lines, 5 on a page.

Begins on fol. 20*a* of the MS. described under No. 5422.

Complete.

Same work as the above.

---

No. **11131.** मार्कण्डेयाष्टकम्.

MĀRKAṆḌĒYĀṢṬAKAM.

**Page, 1.** Lines, 7 on a page.

Begins on fol. 10*b* of the MS. described under No. 7517, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Same work as the above.

---

No. **11132.** मार्कण्डेयाष्टकम्.

MĀRKAṆḌĒYĀṢṬAKAM.

**Page, 1.** Lines, 6 on a page.

Begins on fol. 12*a* of the MS. described under No. 8609, wherein it is mentioned as Mārkaṇḍēyastuti in the list of other works.

Complete.

Same work as the above, but with one additional stanza only.

सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते ।
वेदशास्त्रात्परं नास्ति न दैवं शङ्करात्परम् ॥

## No. 11133. मार्कण्डेयाष्टकम्.
## MĀRKAṆḌĒYĀṢṬAKAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 53*b* of the MS. described under No. 2418.

Complete.

Same work as the above, but with slightly different readings.

---

## No. 11134. मार्कण्डेयेश्वरस्तवः.
## MĀRKAṆḌĒYĒŚVARASTAVAḤ.

Pages, 4. Lines, 18 on a page.

Begins on fol. 122*a* of the MS. described under No. 2373.

Complete.

Same work as the above.

**Beginning:**

सर्वेषां देवतानां सकलसुखफलप्राप्तये पूजकानां
कार्याधीशो गणेशो नगवरतनयानन्दचेष्टाभिरामः ।
यस्य श्रीशेश्वरस्य प्रथितगुणगणालङ्कृतस्यात्मजस्तं
मार्कण्डेयेश्वरेशं पशुपतिमनिशं पार्वतीशं भजेऽहम् ॥

**End:**

मार्कण्डेयेश्वरस्य स्तवमिदमघतुल्याद्रिवैश्वानराभं
नित्यं यो भक्तियुक्तः पठति स पुरुषः पापसङ्घाद्विमुक्तः ।
सद्भूमौ सर्वभोगैरनवरतसुखं प्राप्तवान् सर्वदेवैः
सन्मान्यः श्लाघनीयः स भवति भगवान् श्रीगुरोस्सत्प्रसादात् ॥

---

## No. 11135. मृत्युञ्जयमानसपूजास्तोत्रम्.
## MṚTYUÑJAYAMĀNASAPŪJĀSTŌTRAM

Pages, 7. Lines, 6 on a page.

Begins on fol. 108*a* of the MS. described under No 781.

Complete.

Stanzas of praise and worship attributed to Śaṅkarācārya and addressed to Mṛtyuñjaya (lit, the conqueror of death) or Śiva. The first stanza describes how he should be conceived for meditation.

**Beginning:**

कैलासे कमनीयरत्नखचिते कल्पद्रुमूलस्थिते
कर्पूरस्फटिकेन्दुसुन्दरतनुं कात्यायनीसेवितम् ।
गङ्गातुङ्गतरङ्गराञ्जितजटाभारं कृपासागरं
स्कन्धालङ्कृतशेषभूषणमजं मृत्युञ्जयं भावये ॥
आगच्छ मृत्युञ्जय चन्द्रमौळे व्याघ्राजिनालङ्कृतशूलपाणे ।
स्वभक्तसंरक्षणकामधेनो प्रसीद सर्वेश्वर पार्वतीश ॥

**End:**

चतुश्चत्वारिंशाद्विलसदुपचारैरभिनवैः
मनःपद्मे भक्त्या बहिरपि च पूजां शुकरि(भकरीम्) ।
करोति प्रत्यूषे निशि दिवसमध्ये स च पुमान्
प्रयाति श्रीमृत्युञ्जयपदमनेकाद्भुतपदम् ॥

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितं मृत्युञ्जय-मानसपूजाविधानं संपूर्णम् ॥

---

No. **11136.** मृत्युञ्जयमानसपूजास्तोत्रम्.

MṚTYUÑJAYAMĀNASAPŪJĀSTŌTRAM.

Pages, 18. Lines, 6 on a page.

Begins on fol. 7*b* of the MS. described under No. 367.

Complete.

Same work as the above.

---

No. **11137.** मृत्युञ्जयाष्टकम्.

MṚTYUÑJAYĀṢṬAKAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 172*a* of the MS. described under No. 119.

Contains eight stanzas.

Similar to the above. The repetition of this eulogy is said to be efficacious in freeing one from fear of death. This hymn is

said to have been disclosed by Sadāśiva, and each of the eight stanzas contains one of the syllables of the Mṛtyuñjayamantra.

**Beginning:**

ओङ्काराक्षरादिव्याङ्गं सर्वकारणकारणम् ।
परमात्मा परब्रह्म मृत्युञ्जय नमोऽस्तु ते ॥
नकाराक्षरपूर्वश्च बालार्कनिभशोभितः ।
तदेव तत्पुरुषं ब्रह्म मृत्युञ्जय नमोऽस्तु ते ॥

**End:**

सदाशिवेन कथितं स्तोत्रं मृत्युञ्जयाष्टकम् ।
यः पठेत्सततं तस्य नास्ति मृत्युभयं तथा ॥

**Colophon:**

इति मृत्युञ्जयाष्टकम् ॥

---

No. **11138.** यमाष्टकम्.

YAMĀṢṬAKAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 179*b* of the MS. described under No. 119.

Complete.

Eight stanzas in praise of Śiva attributed to Yama, the god of death. The stanzas are written in what is called the Muktapadagrasta figure of speech, according to which the final word of each quarter of a stanza is repeated as the first word of the succeeding quarter.

**Beginning:**

ओं नमः करटिचर्मवाससे वाससेवितपरेतभूमये ।
भूमयेन वपुषा विराजते राजते हिमगिरौ तिरा(शिवा)य ते ॥
वामभागधृतवामलोचने लोचनेन हतमीनकेतने ।
केतने विहितचारुपुङ्गवे पुङ्गवे दिविषदां मनश्चरेः ॥ १ ॥

**End:**

पावनाधिकमुनीन्द्रसङ्गते सङ्गते प्रमथनाथयूथपैः ।
यूथपैकपवमानभञ्जने भञ्जने भवभृतां मनश्चरेः ॥ ८ ॥

यमाष्टकमिदं पुण्यं यः पठेत्सततं नरः ।
यमलोकमसौ मर्त्यो न गच्छेन्नात्र संशयः ॥

---

No. **11139.** रामायणसारस्तवः—सव्याख्यः.

RĀMĀYAṆASĀRASTAVAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 18⅛ × 1½ inches. Pages, 23. Lines, 11 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

A eulogy establishing the greatness of Śiva as based on the Rāmāyaṇa: by Appayyadīkṣita.

**Beginning:**

इह खलु भगवान् प्राचेतसो मुनिवरः कमलासनलब्धसकलार्थवेदनश्श्रीरामचन्द्रचरितवर्णनात्मकं श्रीरामायणाख्यं महत् आदिकाव्यं निर्ममे। तन्निर्माण एव तत्र तत्र निबद्धैश्श्रीरामचन्द्रवचनैस्तच्चरितविशेषैर्वक्रन्तरनिवचनैस्स्ववचनैश्शिवस्यैव सकलदेवतातिशायिनं महिमातिशयं व्यञ्जयामासेत्येतदर्थप्रतिपादकं शिवस्तोत्रमारभमाणस्तत्प्रतिपाद्यमर्थन्तावत् प्रतिजानीते—

वाल्मीकिरादिकविराडखिलार्थदर्शी साक्षाद्विरिञ्च इव संप्रतिपन्नभावः ।
विश्वेशविष्णुमधिकृत्य कृते प्रबन्धे वृत्त्या तवैव निबबन्ध परं परत्वम् ॥

वृत्त्या व्यञ्जनाख्यया ध्वनिवृत्त्या । तत्र तावत् अगस्त्याश्रमप्रवेशसमये श्रीरामचन्द्रवचनैः कविवचनैश्च शिवमहिमातिशयद्योतनमाविष्करोति—

रामायणे हि कलशप्रभवाश्रमस्था देवादयोऽपि तमुपासत इत्युदीर्य ।
स्थानानि धातृमधुजिन्मघवन्मुखानां तस्याश्रमे निगदितानि न ते कपर्दिन् ॥

**End:**

अतः केवलं राज्यप्रेप्सयैव रामचन्द्रप्रपदनं रामचन्द्रस्यापि राज्यप्रदानमात्रविषया प्रतिज्ञा । अत एव नागपाशबद्धस्य रामस्य विभीषणाय प्रतिज्ञातं राज्यं न दत्तमित्येवोक्तं वचनं रावणवधानन्तरम् अभिषेकपूर्वकं विभीषणाय लङ्काराज्यप्रदानेनैव रामस्य विभीषणविषये कृतकृत्यत्वबुद्ध्या प्रमोदो बालरामायणे कथितः—

अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम् ।
कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥ इति ।

तस्माद्विभीषणप्रपदनस्य फलगौरवकृतं पारिभाषिकमपि प्रधानप्रतिपाद्यत्वमपि न संभवति इति पूर्वोक्तरीत्या रामायणे प्रायस्सर्वत्र ध्वन्यमानं शिवपारम्यमेव तस्य प्रधानप्रतिपाद्यमिति सिद्धम् । यद्यपि ध्वन्यमानत्वाविशेषाद्रामायणे तत्र तत्र व्यञ्जितश्शृङ्गारवीरकरुणाद्भुतरौद्रादिको रसो देवतागुरुनृपपितृपुत्रादिविषयरतिरूपो भावोऽपि प्राधान्यमर्हति, तथापि रामायणे सर्वत्र प्रविततः(तं)शिवपारम्यमङ्गलं क्रियते ।
प्राचेतसाय कवये प्रथमाय तस्मै तत्काव्यहारतरलाय च राघवाय ।
विश्वात्मने तदुभयस्थिरभावलक्ष्म्या मुख्यास्पदाय विभवे च नमश्शिवाय ॥

**Colophon:**

इत्यप्पयदीक्षितकृतौ रामायणसारस्तवं(वः) समाप्तम्(:) ॥

---

No. **11140.** रामायणसारस्तवः—सव्याख्यः.

RĀMĀYAṆASĀRASTAVAḤ WITH COMMENTARY.

Substance, paper. Size, $15\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 46. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the above.

**Colophon:**

इति श्रीरामायणसारं(रः) समाप्तम्(:) ॥

## No. 11141. रावणपञ्चचामरस्तोत्रम्.
## RĀVAṆAPAÑCACĀMARASTŌTRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 25*a* of the MS. described under No. 2418.

A eulogy in Pañcacāmara metre on Śiva, said to have been made by Rāvaṇa.

**Beginning :**

जटाकटाहसंभ्रमभ्रमन्निलिम्पनिर्झरी-
विलोलवीचिवल्लरी विराजमानमूर्धनि ।
*धगद्धगज्ज्वलल्ललाटपट्टपावनानले
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥
धराधरेन्द्रनन्दि(न्द)नीविलास(बन्ध)बन्धुर-
स्फुरद्दि(द्दृ)गन्तसन्ततिप्रमोदमानमानसे ।
कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदे
क्वचिच्चिदम्बरे मनो विनोदमेतु वस्तुनि ॥

**End :**

नमामि चण्डताण्डवप्रसङ्गसङ्गतभ्रम-
जटा(लसत्सरि)त्तरङ्गसन्मृदङ्गनिस्वनम् ।
अनङ्गमङ्गलक्रियादु(धु)रीणमेदुरीभवत्-
तमीतमस्समानकेशपाशकं सदाशिवम् ॥
दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजोः
गरिष्ठरत्नलोष्टयोस्सुहृद्विपक्षपक्षयोः ।
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः
समप्रवृत्तयोः (वर्तकः) कदा सदाशिवं भजामहे ॥
कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्
विमुक्ति(क्त)दुर्मतिस्सदा शिरस्थमञ्जलिं वहन् ।

---

* धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके इति पाठभेदः.

विमुक्तिलोललोचनाललामफाललग्नकं
शिवेवि(ति)मन्त्रमुच्चरन् कदा सुखीभवामहे ॥

---

No. 11142. रावणपञ्चचामरस्तोत्रम्.
RĀVAṆAPAÑCACĀMARASTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 27*a* of the MS. described under No. 781.

Complete.

Same work as the above, but with slight difference at the end as given below :—

अघ(ख)र्वसर्वमङ्गलाकदम्बमञ्जरीरस-
प्रवाहजालमाधुरीविजृम्भणेन मण्डितम् ।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजासुरान्धकान्तकं तमन्तकान्तकं भजे ॥
दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजोः
गरिष्ठरत्नलोष्टयोस्सुहृद्विपक्षपक्षयोः ।
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः
सम[:]प्रवर्तकः कदा सुखीभवाम्यहो अहम् ॥

---

No. 11143. रावणपञ्चचामरस्तोत्रम्.
RĀVAṆAPAÑCACĀMARASTŌTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 5*a* of the MS. described under No. 217.

Complete.

Same work as the above, but with slight difference in the arrangement of the stanzas and with additional stanzas at the end as given below :—

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा-
कदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे ।

मदान्धसिन्धुरासुरत्वगन्तरीयमेदुरे
मनो विनोदमद्भुतं बिभर्तु चूत(भूत)भर्तरि ॥
प्रतिप्रभातमुद्यतः प्रभुं प्रभावबन्धुरं
मदङ्गनर्तनास्तवं मृडप्रियामुदावहम् ।
सदाशिवस्य यः स्मरेत्समाहितस्वमानसः
स याति शांभवं पदं समस्तभोगभाग्भुवि ॥

**Colophon:**

रावणभुजङ्गं संपूर्णम् ॥

---

No. **11144.** रावणपञ्चचामरस्तोत्रम्.

RĀVAṆAPAÑCACĀMARASTŌTRAM.

Substance, palm-leaf. Size, 18½ × 1⅜ inches. Pages, 4. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 11*a*. The other work herein is Śivānandalaharī 1*a*.

Complete.

Slightly different from the above both in the beginning and in the end.

**Beginning:**

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा-
कदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे ।
मदान्धसिन्धुरासुरत्वगन्तरीयमेदुरे ।
मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि ॥

**End:**

रावणेशकृतं स्तोत्रं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

**Colophon:**

इति श्रीरावणभुजङ्गं संपूर्णम् ॥

No. **11145.** लिङ्गपञ्चविंशतिस्तोत्रम्.

LIṄGAPAÑCAVIṀŚATISTŌTRAM.

Pages, 6. Lines, 4 on a page.

Begins on fol. 38*a* of the MS. described under No. 5559, wherein it is given as Sadāśivaliṅgastōtram in the list of other works.

Complete.

Twenty-five stanzas in praise of the Śivaliṅga, the due repetition of which is held to be efficacious in removing from a person fear of old age and death.

**Beginning:**

श्रीमत्परमशिवामृतलिङ्गं श्रीपातिदीनविलोकनलिङ्गम् ।
सृष्टिस्थितिलयकारणलिङ्गं तं प्रणतोऽस्मि शमीशनः(नव)-
[लिङ्गम् ॥

श्रीगिरिजापरमाद्भुतलिङ्गं श्रितजनतासंरक्षणलिङ्गम् ।
शृङ्गाराङ्गमखान्तकलिङ्गं तं प्रणतोऽस्मि शमीनवलिङ्गम् ॥

**End:**

एतत्पञ्चविंशतिलिङ्गं(ङ्ग)श्लोकानि च यः पठति सकृद्वा ।
तस्य जरामृतिभयतु(म)पि नहि (नहि) देहान्ते परमशिवमाप्नोति ॥

---

No. **11146.** लिङ्गभजनम्.

LIṄGABHAJANAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 78*b* of the MS. described under No. 2418, wherein this work has been mentioned as Śivaliṅgastōtram in the list of other works.

Complete.

Stanzas exhorting the supplicant to worship the Śivaliṅga.

**Beginning:**

भज रे शिवलिङ्गं मानस भज रे शिवलिङ्गम् ।
भज शिवलिङ्गं भक्तविपु(भु)लिङ्गं सुजनार(लि)ङ्गं सुरचरलिङ्गं
[भज रे शिवलिङ्गम् ॥

**End:**

नित्यानन्दं निर्मलकान्तं सत्यवेदान्तं सुजनसुदत्तं भज रे शिवलिङ्गम्।
मानस भज रे शिवलिङ्गं भज शिवलिङ्गं रे रे भज रे शिवलिङ्गम्॥

---

No. 11147. लिङ्गाष्टकम्.

LIṄGĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 25*a* of the MS. described under No. 6600

Complete.

Eight stanzas in praise of the Śivaliṅga.

**Beginning:**

ब्रह्ममुरारिसुरार्चितलिङ्गं निर्मलभासुरशोभितलिङ्गम् ।
जन्मविदुःखविनाशनलिङ्गं तं प्रणतोऽस्मि सदाशिवलिङ्गम् ॥

**End:**

अष्टतनुपरिवेष्टितलिङ्गं सृष्टिसमुद्भवकारणलिङ्गम् ।
कष्टदरिद्रविनाशनलिङ्गं तं प्रणतोऽस्मि सदाशिवलिङ्गम् ॥

---

No. 11148. लिङ्गाष्टकम्.

LIṄGĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 3*a* of the MS. described under No. 2418.

Complete.

Same work as the above, but with the addition of a stanza containing the Phalaśruti.

**End:**

लिङ्गाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
तस्य मृत्युभयं नास्ति सत्यं सत्यं वदाम्यहम् ॥

No. **11149.** लिङ्गाष्टकम्.

LIṄGĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 17*b* of the MS. described under No. 5422.

Complete.

Same work as the above, but with a different Phalaśruti stanza and with colophon as given below:—

**Colophon:**

लिङ्गाष्टकं सम्पूर्णम् ॥

लिङ्गाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

No. **11150.** लिङ्गाष्टकम्.

LIṄGĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5787, wherein it is given as Śivaliṅgāṣṭaka in the list of other works.

Complete.

Same work as the above, but with the addition of one stanza at the end as given below:—

देवगणार्चितदिव्यसुलिङ्गं भावय संहरकारणलिङ्गम् ।
रावणदर्पविनाशनलिङ्गं तं प्रणतोऽस्मि सदाशिवलिङ्गम् ॥

No. **11151.** लिङ्गाष्टकम्.

LIṄGĀṢṬAKAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 18*a* of the MS. described under No. 120.

Complete.

Similar to the above.

**Beginning:**

अनादिमलसंसाररोगवैद्याय शम्भवे ।
नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥

ज्वालामालावृताङ्गाय ज्वलनस्तम्भरूपिणे ।
नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥

**End:**

निर्विकाराय नित्याय सत्यायामलतेजसे ।
नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥

---

## No 11152. लिङ्गाष्टकम्.
## LIṄGĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 18*b* of the MS. described under No. 5422, wherein it is called Brahmāṣṭaka in the list of other works.

Complete.

Same work as the above, with the following additional stanza in the end and with colophon.

**End:**

आदिमध्यान्तरूपाय स्वभावामलधीमते ।
नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥

**Colophon:**

ब्रह्माष्टकं सम्पूर्णम् ॥

---

## No. 11153. लिङ्गाष्टकम्.
## LINGĀṢṬAKAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 173*a* of the MS. described under No. 119.

Complete.

Same work as the above, but with the addition of the following stanzas as given below :—

**End:**

वेदान्तसाररूपाय कालरूपाय वेधसे ।
नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥
लिङ्गाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति सोऽभीष्टफल[प्रदम]वा(मा)प्नुयात् ॥

## No. 11154. वालिशैलाधिनाथत्रयम्.
## VĀLIŚAILĀDHINĀTHATRAYAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 28*a* of the MS. described under No. 9372.

Complete.

Three stanzas in praise of Śiva worshipped in a place called Vāliśaila.

**Beginning** and **End :**

अजं वेदसारं भुजङ्गेन्द्रहारं निजाराधनोद्यत्प्रजाह्लादिहारम् ।
गजेशार्चितं शैलजाचित्तचोरं भजे शङ्करं वालिशैलाधिनाथम् ॥
जटामण्डलीनानटद्दिव्यगङ्गाझरीतुङ्गवीचिच्छटादीप्यमानम् ।
पटीभूतकृत्यं(त्तिं) नटालिं वरेण्यं भजे शङ्करं वालिशैलाधिनाथम् ॥
दलत्कुन्दमन्दारकर्पूरगौरं स्वगद्गस्मरेखाविजृम्भल्ललाटम् ।
बलारिस्तुतं बालबालेन्दुमौलिं भजे शङ्करं वालिशैलाधिनाथम् ॥

**Colophon :**

संपूर्णम् ॥

---

## No. 11155. विश्वनाथाष्टकम्.
## VIŚVANĀTHĀṢṬAKAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 9*a* of the MS. described under No. 5787.

Complete.

Same work as that described under R. No. 488(*e*) of the Triennial Catalogue of MSS., Vol. I, Part I-B, but without colophon.

---

## No. 11156. विश्वनाथाष्टकम्.
## VIŚVANĀTHĀṢṬAKAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 6 *a* of the MS. described under No. 2550.

Complete.

Same work as the above.

## No. 11157. विश्वनाथाष्टकम्.
## VIŚVANĀTHĀṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 2*a* of the MS. described under No. 2418.

Complete.

Same work as the above.

---

## No. 11158. विश्वनाथाष्टकम्.
## VIŚVANĀTHĀṢṬAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 44*a* of the MS. described under No. 5422, wherein this work has been mentioned as Vyāsāṣṭaka in the list of other works.

Wants the first stanza ; otherwise complete.

Same work as the above.

---

## No. 11159. विश्वनाथाष्टकम्.
## VIŚVANĀTHĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 40*b* of the MS. described under No. 430

Complete.

Same work as the above

---

## No. 11160. विश्वनाथाष्टकम्.
## VIŚVANĀTHĀṢṬAKAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 17*a* of the MS. described under No. 9372, wherein this work has been mentioned as Viśvēśvarāṣṭaka in the list of other works.

Complete.

Same work as the above, but with a colophon as given below :—

विश्वेश्वराष्टकं संपूर्णम् ॥

No. 11161. विश्वनाथाष्टकम्.
VIŚVANĀTHĀṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 8*a* of the MS. described under No. 10955.

Wants the last stanza.

Same work as the above.

---

No. 11162. विश्वनाथाष्टकम्.
VIŚVANĀTHĀṢṬAKAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 69*a* of the MS. described under No. 2418.

Complete.

Same work as the above, but with the addition of one stanza in the beginning as given below:—

श्रीविश्वनाथ करुणाकर शूलपाणे शम्भो गिरीश शिव शङ्कर चन्द्रमौले।
श्रीनीलकण्ठ मदनान्तक विश्वमूर्ते गौरीपतीश मम देहि करावलम्बम्॥

---

No. 11163. विश्वनाथाष्टकम्.
VIŚVANĀTHĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 19*a* of the MS. described under No. 2037, wherein this work has been mentioned as Vārāṇasīstōtram in the list of other works.

Wants two stanzas in the beginning.

Same work as the above.

---

No. 11164. विश्वनाथाष्टकम्.
VIŚVANĀTHĀṢṬAKAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 177*b* of the MS described under No. 119.

Almost complete.

Same work as the above.

No. **11165.** विश्वनाथाष्टकम्.

VIŚVANĀTHĀṢṬAKAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No. 9240.

Complete.

Same work as the above, but the stanzas here are arranged in a different order and there are some additional stanzas at the end as given below :—

वन्दे भस्मविलेपनं त्रिणयनं वन्दे सुरेशप्रियं

* * * *

वन्दे यक्ष्महरं विषोज्ज्वलगलं वन्दे जगत्प्राभवं

वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम्।

वन्दे शर्वमनाकृतिं . . . . .॥

---

No. **11166.** विश्वनाथाष्टकम्.

VIŚVANĀTHĀṢṬAKAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 4*a* of the MS. described under No. 11061.

Incomplete.

Same work as the above.

---

No. **11167.** विश्वनाथाष्टकम्.

VIŚVANĀTHĀṢṬAKAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 9*b* of the MS. described under No. 8609.

Incomplete.

Same work as the above.

---

No. **11168.** विष्ण्वष्टकम्.

VIṢṆVAṢṬAKAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 174*b* of the MS. described under No. 119, wherein it is mentioned as Śivāṣṭaka in the list of other works.

Complete.

Eight stanzas attributed to Viṣṇu in praise of Śiva conceived as Paramēśvara.

**Beginning:**

यज्ञकर्ता च देवेन्द्रो वेदकर्ता च वाक्पतिः ।
अहमेव जगत्कर्ता मम कर्ता महेश्वरः ॥
अहो ध्यानमतिश्रेष्टा किं दोषो मम लीयते ।
शङ्करं सर्वदेवानां कर्तव्यं परमेश्वरः ॥

**End:**

विष्ण्वष्टकमिदं पुण्यं यः पठेच्छिवसंनिधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

---

## No. 11169. विष्ण्वष्टकम्.
## VIṢṆVAṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 14*b* of the MS. described under No. 5422.

Complete.

Same work as the above, but with the colophon given below: –

विष्ण्वष्टकं संपूर्णम् ॥

---

## No. 11170. विष्ण्वष्टकम्.
## VIṢṆVAṢṬAKAM.

Pages, 3. Lines, 4 on a page.

Begins on fol. 13*a* of the MS. described under No. 6600.

Complete.

Same work as the above.

---

## No. 11171. वीरभद्रध्यानम्.
## VĪRABHADRADHYĀNAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 52*a* of the MS. described under No. 5422, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

A stanza in contemplation and praise of Vīrabhadra, an incarnation of Śiva.

**Beginning and End:**

सहस्रबाहुललितं शशिधरमकुटं सोमसूर्याग्निनेत्रं
दिव्यास्त्रं दीप्यमानं दिव्यतेजःप्रभावम् ।
शूलं रुण्डास्थिमालाडमरुकसहितं शत्रुनश्वरकारं
रुद्रं रौद्रस्वरूपं मम भय[तु]हरणं वीरभद्रं भजामि ॥

---

## No. 11172. वीरभद्रभुजङ्गप्रयातस्तोत्रम्.
## VĪRABHADRABHUJAṄGAPRAYĀTASTŌTRAM.

Pages, 3 Lines, 6 on a page.

Begins on fol. 102*b* of the MS. described under No. 119.

Complete.

Similar to the above and written in the Bhujaṅgaprayāta metre.

**Beginning:**

गुणाद्दोषभद्रं सदा वीरभद्रं मुदा भद्रकाल्या समाश्लिष्टमुग्रम् ।
स्वभक्तेषु भद्रं तदन्येष्वभद्रं कृपाम्भोधि(म्भस्स)मुद्रं भजे वीरभद्रम् ॥

**End:**

भुजङ्गप्रयातैर्महारुद्रमीशं सदा तोषयेद्यो महेशं सुरेशम् ।
स (भक्तो) धरायां समग्रं च भुक्त्वा विपद्म्यो विमुक्तः सुरः स्यात्सुरः
स्यात् ॥

**Colophon:**

श्रीवीरभद्रभुजङ्गप्रयातं संपूर्णम् ॥

---

## No. 11173. वीरभद्राष्टकम्.
## VĪRABHADRĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 32*a* of the MS. described under No. 781.

Complete.

Eight stanzas in praise of Vīrabhadra, the destroyer of **Dakṣa's** sacrifice.

**Beginning :**

दक्षाध्वरध्वंसविधानदक्षं दम्भोलितुल्यायतबाहुबृन्दम् ।
फालोज्ज्वलन्नेत्रहुताशनेन भस्मीकृतारिं भज वीरभद्रम् ॥

**End :**

कालस्य कालं कनकाद्रिचापं वीरेश्वरं निर्विषयान्तरङ्गम् ।
निरीहमेकं निगमान्तमृग्यं निर्वाणहेतुं भज वीरभद्रम् ॥

भद्राष्टकं (पापहरं)पठेद्यः प्रभातकाले पितृसूतिकाले ।
सुखी भवेत्सम्पदवान् सुभोगी सुरूपवान् सुस्थिरबुद्धितस्य(मान् स्यात्) ॥

---

No. **11174.** वीरभद्राष्टकम्.

VĪRABHADRĀṢṬAKAM.

**Pages, 2.** Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5422.

Complete.

Same work as the above, but the stanzas here are arranged in a different order and the concluding stanza is also wanting.

---

No. **11175.** वीरभद्राष्टकम्.

VĪRABHADRĀṢṬAKAM.

**Pages, 3.** Lines, 4 on a page.

Begins on fol. 2*b* of the MS described under No. 6600.

Complete.

Same work as the above, but with a different end as given below :—

रावि(श्रीवीर)भद्रं परमात्मसुद्रं दलद्दरिद्रं दहनार्करौद्रम् ।
गाम्भीर्यमुद्रं करुणासमुद्रं श्रीवीरभद्रं शिरसा नमामि ॥

## No. 11176. वीरभद्राष्टकम्.
## VĪRABHADRĀṢṬAKAM.

Page, 1. Lines, 11 on a page.

Begins on fol. 28*a* of the MS. described under No. 120, wherein it is called Pañcākṣarastōtra in the list of other works.

Complete.

Same work as the above.

---

## No. 11177. वीरभद्राष्टकम्.
## VĪRABHADRĀṢṬAKAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 170*a* of the MS. described under No. 119.

Complete.

Same work as the above.

---

## No. 11178. वीरभद्राष्टकम्.
## VĪRABHADRĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 31*b* of the MS. described under No. 781.

Complete.

Similar to the above. The due repetition of this Stōtra in the morning, noon and evening daily is held to be efficacious in removing the evil influences caused by planets and the risk of contracting diseases.

**Beginning:**

वीरनामाङ्क(मन्)विशालाक्ष वीरान्तक महाबले(ल) ।

* * * *

उद्दण्डदण्डकोदण्डवासुकीमकुटस्तथा ।
प्रलयान्त[क]मृगश्चैव वीरभद्राय ते नमः ॥

**End:**

वीरभद्रस्तुतिं पुण्यं(ण्यां) त्रिसन्ध्या(न्ध्यं) यः पठेन्नरः ।
व्याधिचोरमयं नास्ति ग्रहपीडादिवर्जनम् ॥

अनन्तफलमाप्नोति सौभाग्यं शत्रुनाशनम् ।
भक्तिमुक्तिफलं चैव इह लोके नरः सदा ॥

---

No. 11179. वीरभद्राष्टकम्.
VĪRABHADRĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 29*a* of the MS. described under No. 6600, wherein it has been omitted to be included in the list of other works.

Complete.

Same work as the above.

---

No. 11180. वीरभद्राष्टकम्.
VĪRABHADRĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 1*b* of the MS. described under No. 5422, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Same work as the above.

---

No. 11181. वीरभद्राष्टकम्.
VĪRABHADRĀṢṬAKAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 51*a* of the MS. described under No. 5422.

Complete.

Similar to the above. Those who repeat this hymn every morning are held to obtain prosperity here and salvation after death.

**Beginning:**

दुरितवनकुठारो दुर्जनाचारदूरो निरुपमभुजसारो निर्जिताशेषशूरः ।
धरणिधरविहारो दक्षयागप्रहारो विमलगुणसमुद्रो वीरभद्रस्सहायः ॥

**End:**

नरमृगमदभेदो नागमञ्जीरपादो निरसितपरवादो निश्चलध्यानमोदः ।
गुरुतरगरलादो गोगणेशप्रसादो विमलगुणसमुद्रो वीरभद्रः सहायः ॥
(श्री)वीरभद्राष्टकमात्मशक्त्या प्रभातकालेषु च ये पठन्ति ।
समस्तभोगानिह संलभन्ते परे महादेवपदं प्रयान्ति ॥

**Colophon:**

वीरभद्राष्टकम् ॥

---

## No. 11182. वीरभद्राष्टकम्.
## VĪRABHADRĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 2*a* of the MS. described under No. 5422, wherein it has been omitted to be included in the list of other works.

Breaks off in the fifth stanza.

Same work as the above.

---

## No. 11183. वीराघोरमहोग्रसाल्वशरभस्तोत्रम्.
## VĪRĀGHŌRAMAHŌGRASĀLVAŚARABHASTŌTRAM.

Pages, 5. Lines, 4 on a page.

Begins on fol. 2*a* of the MS. described under No. 5559.

Complete; as found in the Rudrayāmala.

In praise of Śarabha who is considered to be an incarnation of Śiva and who is here conceived to be heroic, terrible and powerful.

**Beginning:**

उत्पत्तिस्थितिनाशनैकनिपुणं स्वर्गापवर्गप्रदं
निस्त्रैगुण्यगुणार्णवं हरिहरब्रह्मात्मकं चिन्मयम् ।

मायातीतमनन्तशक्तिमहिमाविर्भावतेजोमयं
वीराघोरमहोग्रसाल्वशरभं वन्दे त्रिमूर्त्यात्मकम् ॥

**End:**

मारीभूतपिशाचराक्षसगजव्याघ्रोरगध्वंसकं
प्रत्यग्रप्रथितोग्रकृत्तिवसनं मन्त्रालिसङ्घावृतम्
शत्रुप्रेरितयन्त्रकृद्विदलनं भ्रान्तिज्वरोच्छेदनं
वीराघोर . . . . . . . . ॥
ध्यात्वैवं निशि शुद्धमानस . . . . . कृपटो
वीराघोरमहोग्रसाल्वशरभस्तोत्रं जपेत्सर्वदा ।
विज्ञानं विदितप्रसिद्धमभयं विद्यामन . . . .
. . . . . मुपैति शत्रुविजयं वित्तं प्रभुत्वं यशः ॥

**Colophon:**

इति रुद्रयामले वीराघोरमहोग्रसाल्वशरभ (स्तोत्रं संपूर्णम् ॥)

---

No. **11184.** व्यासाष्टकम्.
VYĀSĀṢṬAKAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 172*b* of the MS. described under No. 119.

Complete.

A eulogy on Śiva in eight stanzas which are attributed to Vyāsa.

**Beginning:**

भस्मलेपनादिविश्वरूपशङ्करं नमो भानुकोटितेजसोमजूटगङ्गवासुके ।
बोधलोकरक्षणाभिधानरुद्रनाथ जे (हे) फाललोचनं कपालहस्त ते नमोऽस्तु ते॥

**End:**

व्यासाष्टकमिदं पुण्यं यः पठेच्छिवसंनिधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

**Colophon:**

व्यासाष्टकं सम्पूर्णम ॥

No. **11185.** व्यासाष्टकम्.

VYĀSĀṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 30*a* of the MS. described under No. 6600, wherein it is stated as Nyāsāṣṭaka in the list of other works.

Complete.

Similar to the above, and incidentally exalting Śiva over Viṣṇu.

**Beginning:**

यस्यास्ति शक्तिर्न तु पापधीस्तु प्रोद्दीपकात्वङ्कुलिका पुरो मे । (?)
कः पूजितो वा शशिशेखरेण केनार्चितो भू(त)पतिः परैर्वा ॥
किं वा न दृष्टं हि पितामहेन सुरासुरैर्वा मधुसूदनेन ।
क्षीरोदमन्थोद्भवकालकूटं कण्ठे धृतं केन हरं विहाय ॥

**End:**

सवज्रचक्राङ्कुसरोरुहाङ्कं लिङ्गाङ्कितं यस्य जगद्रगाङ्कम् ।
हस्तप्रबोधे सति कङ्कणेन पश्यन्ति मूढाः खलु दर्पणेन ॥

---

No. **11186.** व्यासाष्टकम्.

VYĀSĀṢṬAKAM

Pages, 2. Lines, 5 on a page.

Begins on fol. 23*b* of the MS. described under No. 5422.

Complete.

Same work as the above.

---

No. **11187.** व्यासाष्टकम्.

VYĀSĀṢṬAKAM.

Pages, 8. Lines, 9 on a page.

Begins on fol. 134*b* of the MS. described under No. 119.

Complete.

This is said to form the eightieth Adhyāya of Kāśīkhaṇḍa of Sanatkumārasaṁhitā in the Skāndapurāṇa.

Same work as the above, but with the Pūrvōttarapīṭhikā.

**Beginning:**

अनिलाद उवाच—

साधु साधु महाप्राज्ञ गम्भीरार्थमिदं वचः ।
नाहं वक्तुं मुनिश्रेष्ठ शक्तः शुक्रो गुरुस्तथा ॥

तथापि वक्ष्ये निश्चित्य सर्वेभ्योऽभ्यधिकः शिवः ।
अत्रेदं कारणं वच्मि यथावृत्तं प्रसिद्धिमत् ॥

कर्ताहं सर्वजगतां मम कर्ता महेश्वरः ।
तस्य देवादिदेवस्य कर्ता कोऽपि न विद्यते ॥

**End:**

व्यासाष्टकमिदं पुण्यं यः पठेच्छिवसंनिधौ ।
संत्यज्य विष्णुलोकादीन् शिवसायुज्यमाप्नुयात् ॥

मतिरुत्क्रमणे यस्य शिवध्यानार्चनं प्रति ।
य इदं पठतेऽध्यायं पाठयेद्वा शुचिः सदा ॥

सर्वकामैस्तु संतृप्तः सोऽन्ते निर्वाणमाप्नुयात् ॥

**Colophon:**

इत्यादिपुराणे स्कान्दे सनत्कुमारसंहितायां काशीखण्डे चतुर्विंशतिसाहस्र्यां व्यासभुजस्तम्भो नामाशीतितमोऽध्यायः ॥

---

No. **11188.** व्यासाष्टकम्.

VYĀSĀṢṬAKAM.

**Pages,** 4. Lines, 5 on a page.

Begins on fol. 28*a* of the MS. described under No. 2418.

Complete.

Similar to the above.

**Beginning:**

एको रुद्रो न द्वितीयोऽस्ति कश्चित्

* * * *

यः क्षीराब्धेर्मन्थराघातजातो ज्वालामाली कालकूटो विभीमः ।
तं सोढुं वा कोऽपरोऽभून्महेशं(शात्) यज्ज्वालाभिः कृष्णतामाप विष्णुः ॥

**End:**

व्यासाष्टकमिदं प्रातः पठनीयं प्रयत्नतः ।
दुःस्वप्नपापशमनं शिवसंनिधिकारकम् ॥

* * * *

नानाविधायुधोल्लासं दशबाहुं त्रिलोचनम् ।
युञ्जानं पुरुषश्रेष्ठं सच्चिदानन्दविग्रहम् ॥

---

No. **11189.** शिवकर्णामृतम्.
ŚIVAKARṆĀMṚTAM.

Pages, 56. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 3831.

Complete.

A work in three Śatakas (centums) of sweet and melodious stanzas in praise of Śiva: said to be by Bharadvājamuni.

**Beginning:**

श्रीपार्वतीसुकुचकुङ्कुमशोभमानवक्षस्स्थलाञ्चितममेयगुणप्रपञ्चम् ।
वन्दारुभक्तजनमङ्गलदायकान्तं(कं तं) वन्दे सदाशिवमहं वरदं महेशम् ॥

**End:**

प्रसन्नवदनं कान्तं सर्वविद्यानिधिं सुरैः ।
संस्तुति(तं) दक्षिणामूर्तिं सदाशिवमहं भजे ॥
श्रीकरी पठतामेषा शिवकर्णामृतस्तुतिः ।
शिवानन्दकरी नित्यं भूयादाचन्द्रतारकम् ॥

**Colophon:**

इति श्रीभरद्वाजमुनिकृते शिवकर्णामृतस्तोत्रे तृतीयं शतकं संपूर्णम् ॥

## No. 11190. शिवकर्णामृतम्.
## ŚIVAKARṆĀMṚTAM.

Pages, 5. Lines, 19 on a page.

Begins on fol. 53*a* of the MS. described under No. 426

Contains twenty stanzas in the first Śataka.

Same work as the above

---

## No. 11191. शिवकर्णामृतम्.
## ŚIVAKARṆĀMṚTAM.

Substance, palm-leaf. Size, $13\frac{1}{4} \times 1\frac{5}{8}$ inches. Pages, 14. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the first Śataka complete.

Same work as the above.

---

## No. 11192. शिवकर्णामृतम्.
## ŚIVAKARṆĀMṚTAM.

Substance, palm-leaf. Size, $9\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 76. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

---

## No. 11193. शिवध्यानम्.
## ŚIVADHYĀNAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 71*a* of the MS described under No. 781.

Complete.

A number of stanzas in contemplation and praise of Śiva.

**Beginning:**

वन्दे शङ्करमात्ममध्यममलं तेजोनिधिं शाश्वतं
बिन्दुक्षोभकरं परात्परतरं नादात्मकं बीजनम् ।

सर्वान्तःस्थमनेकलोकजनकं सोमं जगत्प्रेरकं
लिङ्गस्थं बहुमन्त्रमन्त्रितमहालिङ्गालवाक्यं ध्रुवम् ॥
गमागमस्थं गमनादिशून्यं चिद्रूव दीपं तिमिरान्धकारम् ।
पश्यामि ते सर्वजनान्तकस्त्वं नमामि हंसं परमात्मरूपम् ॥

**End :**

सदानन्दस्वरूपाय सम्यग्ज्ञानप्रदायिने ॥
सच्चिदानन्दरूपाय निर्विकल्प निरञ्जन ।
प्रत्यक्षजगदाधार चन्द्रशेखर पाहि माम् ॥
हृदि स्थितं पङ्कजमष्टपत्रं सकेसरं कर्णिकमध्यलीनम् ।
अङ्गुष्ठमात्रं मुनयो वदन्ति ध्याये तदिष्टं पुरुषं प्रमाणम् ॥

---

No. 11194. शिवपादकमलरेणुसहस्रम्.

ŚIVAPĀDAKAMALARĒṆUSAHASRAM.

Substance, palm-leaf. Size, 16⅞ × 1⅛ inches. Pages, 108. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, not old.

Complete.

The work is divided into 25 Paddhatis, their names being—

| | |
|---|---|
| १. प्रस्तावना. | ९. स्तुति. |
| २. प्रभाव. | १०. संचार. |
| ३. भावना. | ११. नियम. |
| ४. रूप. | १२. स्वातन्त्र्य |
| ५. प्रसादन. | १३. ताण्डव. |
| ६. शृङ्गार. | १४. रत्न. |
| ७. कुसुम. | १५. अर्चना. |
| ८. प्रणाम. | १६. नक्षत्र. |

| | |
|---|---|
| १७. विडम्बना. | २२. दया. |
| १८. भक्ति. | २३. लक्ष्मी. |
| १९. शास्त्र. | २४. शैशव. |
| २०. योग. | २५. चित्र. |
| २१. विश्राणन. | |

A work containing thousand stanzas in praise of Śiva written in imitation of the Pādukāsahasra of Vēdāntadēśika. The work is also called Śivalīlārṇava. By Nañjarāja, entitled Abhinava Bhōjarāja and son of Vīrarāja of the lunar race of kings. In the first stanza, mention is made of the sixty-three Tamil Śaiva saints, Śrīkaṇṭha, the author of the commentary on the Brahmasūtra, and Haradattācārya. The author belonged to the Bhāradvājagōtra and was a student of the Ṛgvēda.

**Beginning:**

ईशं शैलसुतामिभास्यशरजौ चण्डीश्वरं नन्दिनं
नत्वा भृङ्गिरिटिं त्रिषष्टिसहितान् भक्तांश्च भक्तुच्चनतान् ।
श्रीकण्ठागमतत्त्वसौरभविदं श्रीभाष्यकारं गुरुं
शैवस्थापनधूर्वहं च हरदत्ताचार्यमार्यस्तुतम् ॥
किंच श्रीमिति सुन्दरेश्वरपदद्वन्द्वारविन्दे स्वयं
गाढन्यस्तभरः करोति कुतुकी श्रीनञ्जभूवल्लभः ।
भारद्वाजसगोत्रतामुपगतो ऋ(ऽप्यृ)क्छाखयोल्लेखितः
पद्यानां परमेशितुर्दशशतं पादाब्जरेणुस्तुतौ ॥
वन्यैः किङ्किणिरत्नकुड्मलनिनादाद्यैर्हरेः पादुकां
पद्यानां दशभिः शतैः स्तुतवतश्चातुर्यमाश्चर्यदम् ।
तस्मादप्यतिशायि किंच यदुमाकान्ताङ्घ्रिरेणुं(णोः) कणं
स्तोतुं कौतुकिनः सहस्रविधतो यत्साहासिक्यं कवेः ॥
वामनीकृतवक्षोजसीमनीतविपञ्चिका ।
यामिनीविटचूडालकामिनी कुरुतान्मुदम् ॥

शिखा तत्त्वस्थेम्नां श्रुतिसमुदयानां श्रुतिपुटी
भवारण्यप्रेङ्खद्बहुतिमिरशुण्डालनिगडम् ।
परीवाहद्रोणी परमशिवविज्ञानजलधेः
विभोर्व्याख्यामुद्रा हृदि मम विनिद्रा विहरताम् ॥

**End:**

मुक्तपदग्रहणयमकम्—

भद्राकारां वहतु सदा नः स्वान्ते मूर्तिं शिवपदरेणो भव्ये ।
भव्ये दासे मयि करुणार्द्रे भङ्गैस्तापं शमय सुधादृष्टीनाम् ॥

**Colophon:**

इति श्रीचन्द्रकुलजलधिकौस्तुभश्रीकलुलेवीरराजगर्भपयःपा(रावार)·तनूभवाभिनवभोजराजबिरुद्राङ्कितनञ्जराजविरचिते शिवलीलार्णवनाम्नि शिवपादकमलरेणुकासहस्रे चित्रपद्धतिः समाप्ता ॥

---

## No. 11195. शिवपदकमलरेणुसहस्रम्.

## ŚIVAPADAKAMALARĒṆUSAHASRAM.

Substance, Śrītāla. Size, 8¼ × 1¾ inches. Pages, 200. Lines, 9 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Wants the first leaf; otherwise complete.

Same work as the above.

---

## No. 11196. शिवपदकमलरेणुसहस्रम्.

## ŚIVAPADAKAMALARĒṆUSAHASRAM.

Substance, palm-leaf. Size, 17⅜ × 1½ inches. Pages, 100. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Complete.

Same work as the above.

## No. 11197. शिवभुजङ्गस्तोत्रम्.
## ŚIVABHUJAṄGASTŌTRAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 14*a* of the MS. described under No. 10473.

Complete.

Same work as that described under R.No. 61(*o*) of the Triennial Catalogue of MSS., Vol. I, Part I-A, but this is complete. The author is stated to be Śaṅkarācārya.

**End:**

किरीटे निशेशो ललाटे हुताशो भुजे भोगिराजो गले कालिमा च ।
तनौ कामनीयस्य तुल्यं न जाने न जाने न जाने न जाने न जाने ॥
भुजङ्गप्रियाकल्प शम्भो मयेदं भुजङ्गप्रयातेन वृत्तेन क्लृप्तम् ।
तव स्तोत्रमेतत् पठेद्यस्तु भक्त्या शिवादायुरारोग्यमैश्वर्यमेति ॥

**Colophon:**

इति शङ्कराचार्यविरचितं शिवभुजङ्गस्तोत्रं संपूर्णम् ॥

---

## No. 11198. शिवभुजङ्गस्तोत्रम्.
## ŚIVABHUJAṄGASTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 46*a* of the MS. described under No. 2550, wherein this work has been mentioned as Vighnēśvarabhujaṅga in the list of other works.

Incomplete.

Same work as the above.

---

## No. 11199. शिवभुजङ्गस्तोत्रम्.
## ŚIVABHUJAṄGASTŌTRAM.

Pages, 6. Lines, 7 on a page.

Begins on fol. 100*a* of the MS. described under No. 119.

Complete.

Same work as the above.

## No. 11200. शिवभुजङ्गस्तोत्रम्.
## ŚIVABHUJAṄGASTŌTRAM.

Pages, 7. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 11061.

Complete.

Same work as the above, but with the addition of one stanza at the end as given below :—

शिवादन्यथा दैवतं नाभिजाने महादेव शम्भो गिरीश त्रिशूलिन् ।
त्वयीदं समस्तं विभातीति यस्माच्छिवोऽहं शिवोऽहं शिवोऽहं शिवोऽहम् ॥

---

## No. 11201. शिवभुजङ्गस्तोत्रम् —आन्ध्रटीकासहितम्.
## ŚIVABHUJAṄGASTŌTRAM WITH TELUGU MEANING.

Pages, 23. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 781.

Complete.

Same work as the above, but with Telugu meaning.

---

## No. 11202. शिवमङ्गलाष्टकम्.
## ŚIVAMAṄGALĀṢṬAKAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 170*a* of the MS. described under No. 119.

Complete.

Eight benedictory stanzas addressed to Śiva and Pārvatī.

**Beginning :**

मङ्गलं भगवन् शम्भो मङ्गलं पुरशासन ।
मङ्गलं सूर्यचन्द्राग्निलोचनो मम मङ्गलम् ॥
यन्मङ्गलं कुमारस्य गिरिजाकल्पयत् पुरा ।
तारकं हन्तुकामस्य तन्मे भवतु मङ्गलम् ॥
मङ्गलं पार्वतीनाथो मङ्गलं जाह्नवीधरः ।
मङ्गलं गिरिजा देवी मङ्गलं सर्वमङ्गलम् ॥

**End:**

यः शिवो नामरूपाभ्यां या देवी सर्वमङ्गला ।
तयोः संस्मरणात्पुंसां सर्वतो जयमङ्गलम् ॥

## No. 11203. शिववेदपादस्तवः.
## ŚIVAVĒDAPĀDASTAVAḤ

Pages, 18. Lines, 5 on a page.

Begins on fol. 259*a* of the MS. described under Nos. 537 and 7247.

Complete.

Same work as that described under R.No. 483(*v*) of the Triennial Catalogue of MSS., Vol. I, Part I-B.

## No. 11204. शिववेदपादस्तवः.
## ŚIVAVĒDAPĀDASTAVAḤ.

Pages, 13. Lines, 8 on a page.

Begins on fol. 14:*b* of the MS. described under No. 119 and not on fol. 143*a* as stated therein.

Complete.

Same work as the above, but with a different colophon as given below :--

इति श्रीभविष्योत्तरखण्डे पुण्डरीकपुरपतिजैमिनिसंवादो नाम वेद-पादस्तवाध्यायः ॥

## No. 11205. शिववेदपादस्तवः.
## ŚIVAVĒDAPĀDASTAVAḤ.

Substance, palm-leaf. Size, 16⅛ × 1⅝ inches. Pages, 20. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above, but without colophon.

## No. 11206. शिववेदपादस्तवः.
## ŚIVAVĒDAPĀDASTAVAḤ.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 15. Lines, 6 on a page. Character, Kanarese. Condition, much injured. Appearance, old.

Complete.

Same work as the above, but without colophon.

---

## No. 11207. शिववेदपादस्तवः.
## ŚIVAVĒDAPĀDASTAVAḤ.

Pages, 28. Lines, 6 on a page.

Begins on fol. 46*a* of the MS. described under No. 6032.

Complete.

Same work as the above, but with a brief colophon as given below :—

इति श्रीजैमिनिविरचितः वेदपादस्तवः संपूर्णः ॥

---

## No. 11208. शिववेदपादस्तवः—शिवतत्त्वदीपिकाव्याख्यासहिता.
## ŚIVAVĒDAPĀDASTAVAḤ WITH THE COMMENTARY ŚIVATATTVADĪPIKĀ.

Pages, 237. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 11008.

Complete.

Same work as the above, but with a commentary by Sūryanārāyaṇasūrin, son of Tirumalabhaṭṭa of Pattaṅgi family. He belonged to Mitrayavagōtra and dedicates the commentary to Śiva worshipped on the Śrīśaila.

**Beginning :**

पुण्डरीकपुरवृत्तान्तः—तत्रादौ नैमिशारण्ये तपश्चरतां शौनकादि-ऋषीणां निरन्तरनिखिलनिगमाध्ययनपरिपूतजिह्वानिर्गतपुराणकथामृतप्रमद-प्रवाहपरिपूरितसकलभुवनभवनश्रीमन्नारायणपरमूर्तिभूतश्रीकृष्णद्वैपायनप्र-

सादविबोधिताभिधेयसकलपुराणस्य सूतस्य संवादं प्रश्नपूर्वकमवतारयति। शौनकादृषय ऊचुः सूतं प्रति ।

पुण्डरीकपुरं प्राप्य जैमिनिर्मुनिसत्तमः ।
किं चकार महायोगी सूत नो वक्तुमर्हसि ॥

मुनिषु सत्तमः, न तु मुनीनां सत्तम इति षष्ठीसमासः, 'न निर्धारणे' इति षष्ठीसमासनिषेधात् । जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणमिति लक्षणात् । युज्यते अनेनेति योगः अष्टाङ्गः । सोऽस्यास्तीति योगी । महांश्चासौ योगी चेति समानाधिकरणसमासः ।

**End:**

तस्मादायुष्यादिकामानां परमेश्वरस्तुतिपठनादिना तेषां तत्सिद्धिः । यद्यत्कामास्तेषां तत्फलप्राप्तिः श्रीपरमेश्वरस्तोत्रपठनेनावश्यं कालत्रयेऽपि सिध्यतीति पूर्वमेव श्रुतीरेव प्रमाणीकृत्य उक्तत्वादिति सर्वं शिवम् ॥

पादं वाप्यर्धपादं वा श्लोकं श्लोकार्धमेव च ।
यस्तु वाचयते नित्यं शिवलोकं स गच्छति ॥

कमलभवमुकुन्दनिर्जरेन्द्रस्तुतिनुतिसंभ्रमनृत्तविभ्रमाय ।
अचलपतिसुतासखाय तुभ्यं कनकसभापतये नमः शिवाय ॥

**Colophon:**

इति श्रीमदखिलविद्यासकृतब्रह्माण्डपुराणे जैमिनिकृतवेदपादस्तवः संपूर्णः ॥

कुशलानि भवन्तु विश्वमूर्तेः कृपया साम्बशिवस्य सार्वकालम् ।
अचला कमला ममास्तु गेहे परमारोग्यमयत्नतोऽस्तु देहे ॥

रौद्र्यब्दे श्रावणे मासे दशम्यां भृगुवासरे ।
कृष्णपक्षे वेदपादस्तवव्याख्यां सुदुर्लभाम् ॥
व्यलिखद्दुलपट्टाभिरामो वेङ्कटनायके ।

आयुरारोग्यमैश्वर्यं पुत्रपौत्रधनादिकम् ।
साम्बमूर्तिप्रसादेन तस्यास्तु भुवि दुर्लभम् ॥
श्रीमत्केदारकाशिप्रमुखकलितया स्वास्थितां दर्शयन्त्या
मूर्त्या श्रीशैलवासी विलसितजगदाराधनीयत्वशक्तिः ।
व्याख्यानोपासनां मे श्रुतिभिरभिहितां वेदपादस्तवीयां
विश्वाकारः शिवोऽहं विशदयतु सदा दक्षिणामूर्तिरूपः ॥

* * * *

श्रीशैलवासि (सी) परमेश्वरो मया समर्पितां श्रीशिवतत्त्वदीपिकाम् ।
जगद्विलासी जगति प्रकाशयन् कटाक्षवीक्षाविषयीकरोतु ॥

* * *

श्रीमन्मित्रयवाख्यगोत्रविलसद्विद्वज्जनामोदकृ-
च्छ्रीपत्तङ्ग्यभिधान्वये हि सुषुवे श्रीतिम्मलायामयम्(योमिव:) ।
श्रीमत्तिर्मलभट्टसूरिसुमणेः श्रीसूरि(र्य)नारायण-
स्तेनेयं शिवतत्त्वदीपनमहानाम्नी कृता व्याकृतिः ॥

**Colophon**

इति श्रीमदशेषविद्याविशारदश्रीमित्रयवसगोत्रपवित्रसुचरितश्रीमत्पत्त-
ङ्गिकुलतिलकश्रीमत्तिरुमलभट्टमहोपाध्यायसूनुश्रीसूर्यनारायणसूरिविरचिता
श्रीशिवतत्त्वदीपिका नाम वेदपादस्तवव्याख्या समाप्ता ॥

---

No. **11209.** शिवशङ्कराष्टकम्.
ŚIVAŚAṄKARĀṢṬAKAM.

**Pages**, 2. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 9022.

Complete.

Eight stanzas in praise of Śiva or Śaṅkara and praying to him in the last quarter of each stanza for the removal of the supplicant's sins.

**Beginning:**

अतिभीषणकटुभाषणयमकिङ्करपटली-
कृतताडनपरिपीडनमरणागमसमये ।
उमया सह मम चेतसि यमशासन निवसन्
शिव शङ्कर शिव शङ्कर हर मे हर दुरितम् ॥

**End:**

शरणागतभरणाश्रितकरुणामृतजलधे
शरणं तव चरणौ शिव मम हृदिसं(चेतसि) वसताम् ।
परचिन्मय जगदामयभिषजे नतिरवतात्
शिव शङ्कर शिव शङ्कर हर मे हर दुरितम् ॥

**Colophon:**

शिवस्तुतिदशकं संपूर्णम् ॥

---

No. **11210.** शिवशङ्कराष्टकम्.

ŚIVAŚAṄKARĀṢṬAKAM.

**Pages,** 2. Lines, 5 on a page.

Begins on fol. 38*b* of the MS. described under No. 5422, wherein it is given as Śivāṣṭaka in the list of other works.

Complete.

Same work as the above, but with a different colophon as given below :—

शङ्कराष्टकं संपूर्णम् ॥

---

No. **11211.** शिवशङ्कराष्टकम्.

ŚIVAŚAṄKARĀṢṬAKAM.

**Pages,** 9. Lines, 3 on a page.

Begins on fol. 13*a* of the MS. described under No. 9906.

Complete.

Same work as the above, but without colophon.

## No. 11212. शिवशङ्कराष्टकम्.
## ŚIVAŚAṄKARĀṢṬAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 60*a* of the MS. described under No. 10940.

Complete.

Same work as the above, but the stanzas are in a slightly different order.

---

## No. 11213. शिवशङ्कराष्टकम्.
## ŚIVAŚAṄKARĀṢṬAKAM.

Substance, palm-leaf. Size, 2⅛ × 1 inches. Pages, 2. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol 24*a*. The other works herein are Anubhavasāra 1*a*, Sarpapuramāhātmyamu 20*b*, Śrīśailamallikārjunapadyamu 22*a*, Kaśīśagōpuravarṇanapadyamu 23*a*, Cennamallīśaśatakapadyamu 25*a*.

Incomplete.

Same work as the above.

---

## No. 11214. शिवशङ्कराष्टकम्.
## ŚIVAŚAṄKARĀṢṬAKAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 14*b* of the MS. described under No. 8609.

Complete.

Same work as the above, but the stanzas here are arranged in a different order.

---

## No. 11215. शिवशङ्कराष्टकम्.
## ŚIVAŚAṄKARĀṢṬAKAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 72*a* of the MS. described under No. 8632.

Complete.

Same work as the above, but the stanzas here are arranged in a different order.

No. 11216. शिवशङ्कराष्टकम्.
ŚIVAŚAṄKARĀṢṬAKAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 22*a* of the MS. described under No. 9372.

Complete.

Same work as the above.

---

No. 11217. शिवशङ्कराष्टकम्—आन्ध्रटीकासहितम्.
ŚIVAŚAṄKARĀṢṬAKAM WITH TELUGU MEANING

Pages, 2. Lines, 7 on a page.

Begins on fol. 30*a* of the MS. described under No. 764.

Contains three stanzas.

Same work as the above, but with Telugu meaning.

---

No. 11218. शिवषडक्षरस्तोत्रम्.
ŚIVAṢAḌAKṢARASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 125*b* of the MS. described under No. 119, wherein this work has been mentioned as Ṣaḍakṣarastōtra in the list of other works.

Complete.

In praise of Śiva by commenting upon and explaining each of the letters of the six-syllabled prayer-formula of the Śaivas.

**Beginning:**

ओङ्कारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः ।
कामदं मोक्षदं चैव ओंकाराय नमो नमः ॥
नमन्ति ऋषयः सर्वे नमन्ति शिरसोरुणा।
नमो नमन्ति नाकेशं नकाराय नमो नमः ॥

**End:**

यन्त्रमन्त्रास्थितं नित्यं सर्वव्यापिनमीश्वरम् ।
यन्नित्यं पूजयेल्लिङ्गं यकाराय नमो नमः ॥
षडक्षरमिदं स्तोत्रं यः पठेच्छिवसंनिधौ ।
तस्य मृत्युभयं नास्ति सत्यं सत्यं वदाम्यहम् ॥

**Colophon:**

षडक्षरीस्तोत्रं संपूर्णम् ॥

---

## No. 11219. शिवषडक्षरस्तोत्रम्.

## ŚIVAṢAḌAKṢARASTŌTRAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 77a of the MS. described under No. 430, wherein this work has been mentioned as Śivastuti in the list of other works.

Complete.

Same work as that described under R.No. 324(h) of the Triennial Catalogue of MSS., Vol. I, Part I-A, but without the benedictory portion.

---

## No. 11220. शिवस्तवगद्यम्.

## ŚIVASTAVAGADYAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 69a of the MS. described under No. 132.

Complete.

A prose composition giving a number of epithets in praise of Śiva.

**Beginning:**

शिव महेश्वर रुद्र श्रीमहादेव भव शर्व सर्वज्ञ पार्वतीनाथ परमेश्वर परमात्म(न्) भर्ग श्रीकण्ठ हर वामदेव शङ्कर नीलकण्ठ ।

**End:**

कङ्कालधर निर्मलरूप निर्विकार निरामय निरञ्जन नित्यकल्याणकर शूलप्रिय भक्तवत्सल भव मृडानीश शरभस्वरूप जय विजय रुद्र भद्र ॥

## No. 11221. शिवस्तवगद्यम्.
## ŚIVASTAVAGADYAM.

Substance, palm-leaf. Size, $15\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 5. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 74*b*. The other works herein are Caturvēdasāramu (Telugu) 1*a*, Lakṣmayyagāruvacanamu 77*b*, Manōbōdha 109*b*.

Complete.

A short prose work in praise of Śiva: by Mallikārjuna.

**Beginning:**

त्रैलोक्यस्य भवानेव निग्रहानुग्रहक्षमः ।
श्रीविश्वेश्वर मां पाहि महेश्वर गिरीश्वर ॥

जय जय श्रीरुद्र वीरभद्र विरिञ्चिपञ्चमशिरःखण्डन यज्ञपुरुषशिरःखण्डन दक्षप्रजापतिशिरःखण्डन ।

**End:**

अखिलभुवनभक्तजनप्रिय देव सुरपतिप्रमुखनिखिलप्रार्थित प्रधानपरमेश्वर देव नमस्ते नमस्ते नमस्ते नमः ॥

श्रीमन्महेश्वरशिष्यो मल्लिकार्जुनपण्डितः श्रीमुखदर्शनमद्यं हृद्यं ग्रथितवान् ॥

---

## No. 11222. शिवस्तोत्रम्.
## ŚIVASTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 121*a* of the MS. described under No. 11008.

Complete in twenty-one stanzas

A eulogy entreating the merciful Śiva to raise the supplicant from the ocean of distress

**Beginning:**

जय जय शम्भो गिरिजाबन्धो शिव शिव शंकर भूतपते ।
गिरिश महापज्जलधेरस्मानुद्धर धीर कृपाजलधे ॥ १ ॥

**End:**

भव भवदीयानस्माननिशं कुरु गतदुःखानतिदुःखान् ।
गिरिश महापज्जलधेरस्मानुद्धर धीर कृपाजलधे ॥ २१ ॥

---

## No. 11223. शिवस्तोत्रम्.

## ŚIVASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 9239.

Complete.

Similar to the above; said to have been uttered by Sānanda.

**Beginning:**

सानन्द उवाच—

नमः सकलकल्याणकारणाय कपर्दिने ।
कल्याणरमणीयाय कल्याणात्मस्वरूपिणे ॥
करुणाकर कालारे कपालपरिभूषण[म्] ।
कालापार कलाधार कारणं(करुणां) कुरु मे प्रभो ॥

**End:**

त्वत्पादभृत्यभृत्यानां भव्यभव्यत्वमुत्तमम् ।
इच्छामि देवदेवेश देवानामतिदुर्लभम् ॥

---

## No. 11224. शिवस्तोत्रम्.

## ŚIVASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 2*b* of the MS. described under No. 9239 and not on fol. 1*b* as stated therein.

Complete.

Similar to the above; said to have been uttered by Mṛtyu or the god of death.

**Beginning:**

मृत्युरुवाच—

तथा करिष्ये देवेश नमस्ते शंकराव्यय ।
त्रिपुरघ्न महेशान योगिहृत्पद्ममन्दिर ।
त्रियम्बक विरूपाक्ष सोम सोमार्धभूषण ।

**End:**

नमस्ते देवतानाथ नमस्ते दिव्यमूर्तये ।
सर्वज्ञाय नमस्तुभ्यं पशूनां पतये नमः ॥

---

No. **11225.** शिवस्तोत्रम्.

ŚIVASTŌTRAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 3*a* of the MS. described under No. 9239.

Complete.

Similar to the above; said to have been uttered by Brahman.

**Beginning:**

ब्रह्मोवाच—

नमस्ते सर्वलोकानामादिकर्त्रे महात्मने ।
पुरुषाय पुराणाय परंज्योतिःस्वरूपिणे ॥
चक्रभ्रमणकर्त(र्ता)त्वं सदा शम्भो नमोऽस्तु ते ।
प्रेरकः सर्वजगतामन्तर्यामी हृदि स्थितः ॥

**End:**

वाचामगम्यतां यातो विश्वरूपोऽपि सर्वगः ॥
ततः स्तोतुं न शक्नोमि योऽसि सोऽसि नमोऽस्तु ते ।
एवं स्तुत्वा ब्रह्मयोनिं तुष्टिमापुर्द्विजोत्तमाः ॥

## No. 11226. शिवस्तोत्रम्.
## ŚIVASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 2a of the MS. described under No. 9239.

Complete.

Similar to the above; this eulogy is said to have been made by Viṣṇu.

**Beginning:**

ततः शिवं प्रभुर्विष्णुः स्तोतुं समुपचक्रमे ।

विष्णुरुवाच—

सर्गस्थितिविनाशानां कर्ता त्वं सर्वदा शिव ।
त्वन्मायामोहिता देवा न जाने त्वां महेश्वर ॥

**End:**

शिवरात्रिव्रतं देव करिष्ये तव संनिधौ ।
निर्विघ्नं कुरु देवेश भक्तिग्राह्यं महेश्वर ॥

**Colophon:**

इति शिवरात्रिमहिमस्तोत्रम् ॥

---

## No. 11227. शिवस्तोत्रम्.
## ŚIVASTŌTRAM.

Pages, 22. Lines, 8 on a page.

Begins on fol. 13a of the MS. described under No. 9608.

Complete.

Similar to the above; by Vīrarāghva, an inhabitant of the village Sahajamahārājapura.

**Beginning:**

शिवं गौरीश्लिष्टं सुरविटपिमूलस्थितमहं
सुवर्णाभं पद्मासनसहितमर्धेन्दुशिरसम् ।

कुठारात्रासानुग्रहपरगदालंकृतकरं
त्रिणेत्रं नं(सं)सेवे गुहगजमुखोत्सङ्गमनिशम् ॥
मनोभूसन्दोहादपि सुवपुषं मन्दहसित-
प्रभास्तोमस्थेमद्विगुणितमुखाम्भोजसुषुमम् ।
वृषारूढं प्रौढामरनिकरकोटीरविलस-
त्पदद्वन्द्वं सेवे परमशिवमार्यासहचरम् ॥

**End:**

दुर्गाधीश ममेदं दौर्गत्यं दूरतो निरस्यैव ।
तव नामकीर्तनं मे तारकमेकं सदा दिशानन्दम् ॥
सहजमहाराजपुरग्रामनिवासी विवेकिमूर्धन्यः ।
श्रीवीरराघवाख्यः संख्यावान् स्तोत्रमेतदतनिष्ट ॥

---

No. 11228. शिवस्तोत्रम्.

ŚIVASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol 3*b* of the MS. described under No. 9239.

Complete.

Similar to the above; it is stated that the repetition or the listening to of this eulogy has the same efficacy as the observance of the Śivarātrivrata.

**Beginning:**

सूत उवाच—

नमः सकलकल्याणदायिने शूलपाणिने(णये) ।
विषयार्णवमग्नानां समुद्धरणहेतवे ।

**End:**

एतत्स्तोत्रं पठेद्यस्तु भक्त्या यस्तु शृणोति वा ।
शिवरात्रिव्रतफलं तयोर्दास्यति शंकरः ॥

* * * *

शम्भुः शूली महादेवो नामान्येतान्यनुक्रमात् ॥

---

## No. 11229. शिवस्तोत्रम्.

## ŚIVASTÔTRAM.

Pages, 4. Lines, 8 on a page.

Begins on fol. 4*a* of the MS. described under No. 9239.

Complete.

Similar to the above; this eulogy is said to have been made by Yama, the god of death

**Beginning:**

यम उवाच—

नमः सकललोकानां सर्गस्थित्यन्तहेतवे ।
सर्वज्ञाय वरेण्याय भक्तिगम्याय शम्भवे ॥
यत्पादं सकृदभ्यर्च्य पापिनोऽपि गतैनसः ।
शिवलोकं प्रपद्यन्ते तं नमामि सदाशिवम् ॥

**End:**

भूतेष्वन्तरस्तथैकत्वं तं प्रपद्ये सदाशिवम् ।
स्रष्टा त्वमेव जगतां रक्षकस्त्वं महेश्वर ॥
संहर्ता जगतामेकस्त्वमेवैको महेश्वर ।
शासनार्थं तु पापानां त्वयैवाहं नियोजितः ॥

---

## No 11230. शिवस्तोत्रम्.

## ŚIVASTÔTRAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 15*a* of the MS. described under No. 9239.

Complete.

This eulogy on Śiva is said to have been made by Nṛsiṁha, the man-lion incarnation of Viṣṇu.

**Beginning:**

नृसिंह उवाच—

नमो रुद्राय (मि) त्राय लोकग्रासाय विष्णवे ।
नम उग्राय भीमाय नमः क्रुद्धाय मन्यवे ॥

**End:**

नमस्ते द्वारराजाय वचसां पतये नमः ।
योगीश्वराय नित्याय सत्याय परमात्मने ॥
सर्वात्मने नमस्तुभ्यं नमः सर्वेश्वराय ते ।
एकद्वित्रिचतुःपञ्च(षट्)कृत्वश्च नमो नमः ॥
(सप्तकृत्वोऽष्टकृत्वश्च) दश(नव) कृत्वो नमो नमः ।
दशकृत्वः शतकृत्वः सहस्रार (शो) नमो नमः ॥
नमोऽपरिमितं कृत्वोऽनन्तकृत्वो नमो नमः ।
नमो नमो नमो भूयः पुनर्भूयो नमो नमः ॥

---

No. 11231. शिवस्तोत्रम्.
ŚIVASTŌTRAM.

Pages, 5. Lines, 4 on a page.

Begins on fol. 40*a* of the MS described under No. 6600.

Complete.

Similar to the above.

**Beginning:**

. . . . . . . . . कर्बुरकन्धराय ।
गन्धर्वयक्षसुरसिद्धकिरीटकोटिसंघट्टघृ(ट्ट)चरणाय नमः शिवाय ॥
न ब्रह्मविष्णुवचसामपि गोचरस्त्वमस्मद्विधस्य किमहो तदवैमि सर्वम् ।
भक्तिस्तथापि शिव मा मुखरीकरोति युष्मत्स्तुतौ कथय किं करवाणि देव ॥

**End:**

झंकारडम्बरविराजिजलाकुलेषु कैलासमेरुगिरिकन्दरनिर्झरेषु ।
ते प्राप्नुवन्ति सुरसिद्धवधूरतानि ये नीलकण्ठ तव पादयुगं नमन्ति ॥

* * * *

गर्जत्प्रचण्डघन . . . . रेषु संसर्गदोषघनघोररवेण कोऽन्यः।
श्चैत्यं नयन्ति मतिगीरकरालकालं(?) भस्मावशेषमकरोद्धर हुंकृतेन ।

---

No. **11232.** शिवस्तोत्रम्.

ŚIVASTŌTRAM.

**Pages,** 10. Lines, 7 on a page.

Begins on fol. 174*a* of the MS. described under No. 2040.

Complete.

Similar to the above. Herein the supplicant seeks refuge in Śiva's grace.

**Beginning:**

कस्ते बोद्धुं प्रभवति परं (देव)देव प्रभावं
यस्मादित्थं विविधरचना सृष्टिरेषा बभूव ।
भक्तिग्राह्यस्त्वमिति भगवंस्त्वामहं भक्तिमात्रात्
स्तोतुं वाञ्छा ह्यतिमहदिदं साहसं मे सहेत(थाः) ॥

**End:**

दासोऽस्मीति त्वयि शिव मया नित्यसिद्धं न वेद्यं
जानास्येव त्वमपि यदसन्न्य(न्नि)र्गतिः सन् भ्रमामि ।
नास्त्येवान्यन्मम किमपि ते नाथ पित्रावनीयं
कारुण्यान्मे शरणवरणं दीनवृत्तेर्गहारम् (गृहाण) ॥

---

No. **11233.** शिवस्तोत्रम्.

ŚIVASTŌTRAM.

**Pages,** 8. Lines, 7 on a page.

Begins on fol. 24*a* of the MS. described under No. 4384.

Complete.

Same work as the above.

## No. 11234. शिवस्तोत्रम्.

## ŚIVASTŌTRAM.

Substance, palm-leaf. Size, $9\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 22. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Wants beginning and end.

Similar to the above.

**Beginning:**

अर्वाचीना यदपरमिदं पार्वतीवल्लभं ते
रूपं भक्त्या वरद तदहं वाग्भिरभ्यर्चयामि ॥
आद्यैः स्तोत्रं रचितममृतस्यन्दिभिर्वाग्विलासैः
फल्गुप्रायैः किमिदमि (मु मित)तया त्याज्यते मद्वचोभिः ।
किं वा कैश्चित्कनककमलैरर्चितं पादपीठं
भक्त्या शम्भो न पुनरपरः पूजयत्यर्कपुष्पैः ॥

**End:**

तव चरणसरोजे दत्तमेकं प्रसूनं
फलति जलधिवेलावेष्टितां भूतधात्रीम् ।
प्रतिदिवससपर्याभक्तकौतूहलेन
फलमिदमिति शम्भो शक्यते नैव कर्तुम् ॥

The remaining four lines are very much broken on account of injuries.

---

## No. 11235. शिवस्तोत्रम्.

## ŚIVASTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 64*b* of the MS. described under No. 2418.

Complete.

Similar to the above. Herein the various forms of Śiva as worshipped in the important Śaiva shrines of India are eulogized.

**Beginning:**

अवन्तिकायां विहितावतानां(रं) मुक्तिप्रदानाय भवेजनानाम् ।
अकल्मृत्यो परिरक्षणाथ वन्दे महाकालमहं सुरेशम् ॥
सौराष्ट्रदेशे वसुधावकोणे ज्योतिर्मयं चन्द्रकलावतंसम् ।
भक्तिप्रदानाय भवेजनानां त्वां सोमनाथं शरणं प्रपद्ये ॥

**End:**

ब्रह्मानन्दं परमसुहृदं केवलज्ञानमूर्तिं
दुःखातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एवं नित्यं विपुलमचलं सर्वदा साक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

---

No. **11236.** शिवस्तोत्रम्.
ŚIVASTŌTRAM.

**Pages, 4. Lines, 5 on a page.**

Begins on fol. 67*b* of the MS. described under No. 2418.

Complete.

Same work as the above, but with a different end as given below:—

एतानि लिङ्गानि वसन्तयात्राप्रातर्वने निर्मलमानसस्य ।
ते पुत्रपौत्रैश्च धनैरुदारैः सत्कीर्तिभाजः सुखिनो भवन्ति ॥

---

No. **11237.** शिवस्तोत्रम्.
ŚIVASTŌTRAM.

**Pages, 2. Lines, 8 on a page.**

Begins on fol. 127*b* of the MS. described under No. 119.

Complete.

Similar to the above. Herein each of the eleven stanzas comprising the hymn is associated with the name of one of the numerals up to eleven. The authorship of the hymn is attributed to Śaṅkarācārya.

**Beginning:**

एकं निष्कलमचलं संस(स्व)प्रज्ञानशान्तमतिशान्तम् ।
ज्योतिर्विज्ञानमयं परात्परं पावनं शिवं वन्दे ॥

**End:**

एकादशप्रभेदं रुद्रं शतधा सहस्रधा भूयः ।
संख्यातीतं मूर्त्या मायामयमच्युतं शिवं वन्दे ॥
विरचितमेतत् स्तोत्रमेकादशाक्षरं हि शङ्करातण(चार्यैः) ।
यः पठति कायशुद्धिं तस्य (दिशति) भक्तिमम्बिकारमणः ॥

**Colophon:**

शङ्कराचार्यस्तुतिः संपूर्णा ॥

---

No. **11238.** शिवस्तोत्रम्.
ŚIVASTŌTRAM.

Substance, palm-leaf. Size, 16¼, 14⅛ × 1¼ inches. Pages, 12. Lines, 5-6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 9*a*. The other works herein are Taittirīya-brāhmaṇa 1*a*, Harimīḍēstōtra 6*a*.

Contains stanzas fourteen to ninety-three.

A hymn in praise of Mātṛbhūtēśa, a form of Śiva, worshipped in Trichinopoly. The work is also called Mātṛbhūtaśataka.

**Beginning:**

कालं कियन्तमघदन्तुरमन्तरङ्गं त्वाचिन्तनं तनितुमक्षमम(मी)क्षसे त्वम् ।
त्वद्भक्तये स्पृहयतः शिव मे दयस्व श्री . . . . . ॥ १४॥

**End:**

तातप्रसूतनयदारसुहृद्भिरेवमर्थोपपत्तिविरहादहहावसीदन् ।
नेतुं क्षणं न निपुणोऽस्मि ततः प्रसीद श्रीमातृभूत शिव पालय मां
नमस्ते ॥ ९३॥

## No. 11239. शिवस्तोत्रम्.
## ŚIVASTŌTRAM.

Substance, palm-leaf. Size, 8⅛ × 1¼ inches. Pages, 3. Lines, 5 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 23*b*. The other work herein is Śivānandalaharī 1*a*.

Complete.

In praise of Go l Śiva worshipped as Sōmēśa in the shrine at Gumpapurī, which is probably near the Viṣṇu shrine at Pulaparti. The two names—Gumpapurī and Pulaparti—appear like Telugu country names.

**Beginning:**

अमरतटिनीतरङ्गमरीचिकाचयक्रमपाटलीभवत्कचकलाप ।

समराङ्गणविवार्जितमरुद्विष(त्)कोपकमलसंभवमुख्यगणाविनुतबहुरूप ।

**End:**

पावनाकार पुलपर्तिगोपालसख गोवाहन भुजङ्गकुलविभूष

भावभवहरण मां पालय कृपानिधे कोविदस्तवपात्र गुम्पपुरिसोमेश ॥

अमर—

---

## No. 11240. शिवस्तोत्रम्—सव्याख्यानम्.
## ŚIVASTŌTRAM WITH COMMENTARY.

Pages, 6. Lines, 5 on a page.

Begins on fol. 167*a* of the MS. described under No. 673, wherein this work has been mentioned as Śrīvidyāviṣayōpanyāsa in the list of other works.

Contains only one stanza.

Similar to the above, but together with a commentary thereon.

**Beginning:**

यं प्राहुर्जगदुद्भवस्थितिलयाधीशाधिनाथं बुधाः

यं सार्वज्ञ्यमुखाङ्गषट्कमहितं यं सर्वतत्त्वातिगम् ।

यस्याहुः शशिभूषणस्य गृहिणीं चिच्छक्तिमाद्यां परां
सोऽव्याद्वः शरदिन्दुसुन्दरतनुर्भक्तेष्टदायी शिवः ॥

वष्टि इच्छतीति व्युत्पत्त्या वश कान्तावित्यस्माद्धातोरादादिकात 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इत्यच्प्रत्ययान्तत्वेन इच्छाशक्तिविशिष्टं शिवशब्देनोच्यते ।

**End:**

तथा पुराणान्तरेऽपि—

'अग्नेरुष्णत्ववच्छक्तिरविनाभाविनी विभोः ।
अमूर्ते चेदमूर्ता तु समूर्ते चेत् समूर्तिका ॥'

इति । तस्माच्छक्तिरूपस्वतन्त्रमपि तस्याः संभवतीति न किंचिदनुपपन्नम् ॥

---

## No. 11241. शिवानन्दलहरी.

## ŚIVĀNANDALAHARĪ.

Pages, 20. Lines, 17 on a page.

Begins on fol. 1*a* of the MS. described under No. 10855.

Complete.

Same work as that described under No. 47 of the Report on the Search for Sanskrit and Tamil MSS., No. 2, but this is complete.

**End:**

प्रतिपदमृदुवाचामाधुरी साधुरीतिः
प्रकटितकविता मे शम्भुनाङ्गीकृतासीत् ।
सफलमभवदस्मज्जन्म कर्मैव चैत-
त्परमशिवदयायाः पात्रमेवाहमस्मि ॥ १०० ॥

No. **11242.** शिवानन्दलहरी.
ŚIVĀNANDALAHARĪ.

Pages, 16. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 10734.

Wants the last stanza.

Same work as the above, but with a colophon as given below :—

शिवानन्दलहरी संपूर्णा ॥

---

No. **11243.** शिवानन्दलहरी.
ŚIVĀNANDALAHARĪ.

Pages, 21. Lines, 16 on a page.

Begins on fol. 81*a* of the MS. described under No. 5593.

Complete.

Same work as the above, but with colophon as given below :—

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पादपूज्यपाद (शिष्यशंकरभगवत्पूज्यपाद)निरूपितं शिवानन्दलहरीस्तोत्रं संपूर्णम् ॥

---

No. **11244.** शिवानन्दलहरी.
ŚIVĀNANDALAHARĪ.

Pages, 23. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 10850.

Complete.

Same work as the above.

---

No. **11245.** शिवानन्दलहरी.
ŚIVĀNANDALAHARĪ.

Pages, 46. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 11239.

Complete.

Same work as the above, but with the addition of one stanza in the beginning as given below :—

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥

---

No. 11246. शिवानन्दलहरी.
ŚIVĀNANDALAHARĪ.

Pages, 21. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 11144.

Complete.

Same work as the above, but the stanzas here are arranged in a different order.

---

No. 11247. शिवानन्दलहरी.
ŚIVĀNANDALAHARĪ.

Pages, 14. Lines, 5 on a page.

Begins on fol. 39*a* of the MS. described under No. 2550.

Contains stanzas seven to thirty-two only.

Same work as the above.

---

No. 11248. शिवानन्दलहरी.
ŚIVĀNANDALAHARĪ.

Pages, 20. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No. 10852.

Complete in hundred and eight stanzas.

Same work as the above, but the stanzas here are arranged in a different order, and there is a different end as given below :—

महद्भक्त्युद्रेकं परमिति शिवानन्दलहरी-
स्तवोत्तंसं भक्त्या पठति पुरुषो योऽनिशमिदम् ।
पशुस्त्रीपुत्रायुः फलमिह जगत्यां लभति सः
परे श्रीकैलासे विधुमकुटतुल्यश्च भवति ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितं शिवानन्दलहरीस्तोत्रं संपूर्णम् ॥

---

No. **11249.** शिवानन्दलहरी.
ŚIVĀNANDALAHARĪ.

Pages, 15. Lines, 6 on a page.

Begins on fol. 94*a* of the MS. described under No. 4384 and not on fol. 93*a* as stated in the list of other works.

Contains thirty stanzas only.

Same work as the above.

---

No. **11250.** शिवाष्टकम्.
ŚIVĀṢṬAKAM.

Pages, 3. Lines, 18 on a page.

Begins on fol. 121*a* of the MS. described under No. 2373.

Complete.

Eight stanzas in praise of Śiva who is here eulogized as the benefactor of Mārkaṇḍēya.

**Beginning:**

जगत्रयगुरुः परात्परगुणाकरः शङ्करः
पितामहमुखाखिलामरवरैः समाराधितः ।
दयारसगुणाम्बुधिर्नगवरात्मजाधीश्वरो
मृकण्डुतनयेष्टकृत्परशिवः सदा पातु नः ॥

**End:**

स विश्वसुखनाथदेशिकवरप्रसादाद्यथा
मृकण्डुतनयेष्टकृत्परशिवाष्टकोच्चारणात् ।
नरो भवति तत्सुखी भगवदाज्ञया सर्वतः
स्थले सलिलसंकुले विपिनमध्यदेशे तथा ॥

## No. 11251. शिवाष्टकम्.
## ŚIVĀṢṬAKAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 176*a* of the MS. described under No. 119.

Complete.

Similar to the above. The supplicant herein says that he takes refuge in Śiva alone.

**Beginning:**

कल्याणगुणसंपूर्ण(र्णः) करुणारससागरम्(:) ।
कुहचित्कलितश्रीकः शिव एव गतिर्मम ॥
असतामतिदूरस्थः सतामतिसमीपगः ।
सदसत्त्वकथाव्यङ्ग्यः शिव एव गतिर्मम ॥

**End:**

शिवाष्टकमिदं पुण्यं स्पष्टमिष्टफलप्रदम् ।
परमं (पठन्) परमभक्त्या नां (तु) शिवसायुज्यमाप्नुयात् ॥

---

## No. 11252. शिवोत्कर्षसाक्षिपञ्चकम्.
## ŚIVŌTKARṢASĀKṢIPAÑCAKAM.

Page, 1. Lines, 22 on a page.

Begins on fol. 11*b* of the MS. described under No. 1021.

Complete.

Five stanzas maintaining with reasons the superiority of Śiva over other gods, and especially over Viṣṇu.

**Beginning:**

गायत्रीवल्लभत्वाद्दशरथतनयस्थापितात्वाधितत्वात्
शौरेः कैलासयात्राव्रतमुदिततयाभीष्टसन्तानदानात् ।
नेत्रेण स्वेन साकं दशशतकमलैर्विष्णुना पूजितत्वात्
तस्मै चक्रप्रदानादपि च पशुपतिः सर्वदेवप्रकृष्टः ॥

कन्दर्पध्वंसकत्वाद्गरलकबलनात्कालगर्वापहत्वात्
दैतेयावासभूतत्रिपुरविदलनाद्दक्षयागे जयित्वात् ।
पार्थस्य स्वास्त्रदानान्नरहरिविजयान्माधवे स्त्रीशरीरे
शास्तुः संपादकत्वादपि च पशुपतिः सर्वदेवप्रकृष्टः ॥

**End:**

वैशिष्ट्ये योनिपीठायितमुररिपु(सं)श्लिष्टभावेन शम्भोः
स्वस्यैकार्थप्रतीकायितहरिवपुषालिङ्गितत्वेन यद्वा ।
अप्राधान्याद्विशिष्टाद्वयसमधिगमे दानवानामरातेः
शम्भोरुत्कृष्टभावादपि च पशुपतिः सर्वदेवप्रकृष्टः ॥

**Colophon:**

इति साक्षिपञ्चकं संपूर्णम् ॥

---

## No. 11253. शिवोत्कर्षसाक्षिपञ्चकम्.
## ŚIVŌTKARṢASĀKṢIPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 25*b* of the MS. described under No. 764, wherein this work has been mentioned as Nigrahāṣṭaka beginning on fol. 26*a* in the list of other works.

Contains three stanzas only.

Same work as the above, but the stanzas here are arranged in a different order.

---

## No. 11254. श्रीकण्ठस्तोत्रम्.
## ŚRĪKAṆṬHASTŌTRAM.

Substance, palm-leaf. Size, 17, 9¼ × 1½ inches. Pages, 4. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, not old.

Begins on fol. 81*a*. The other work herein is Daśarūpaka with commentary 1*a*.

Complete.

This is a eulogy on Śiva, composed by Kṛṣṇarāja of Ātrēya-gōtra and a former king of Mysore.

**Beginning:**

श्रीमच्छ्रीकण्ठपादाब्जद्वन्द्वं वन्दामहे वयम् ।
निगमागमशाखायां यत् पल्लववरायते ॥ १ ॥

* * * *

रावणाननभक्तिश्रीमुद्रारसनिधिप्रभुम् ।
कृतदिङ्मण्डलश्रीचन्द्राकल्पोरुसुरत्नधृक् ॥ ३ ॥

**End:**

नरसिंहावतारकृन्मुद्रादशरभाङ्किकः ।
श्रीकण्ठः कल्पशास्त्रोक्तसिद्धान्तकतुकर्मभाक् ॥ २६ ॥
भूतकेशहरो नित्यं पातु मां भक्तवत्सलः ।
आत्रेयगोत्रजलधिरा(का)पीयूषभानुना ॥ २७ ॥
महीशूरपुराधीशकृष्णराजेन धीमता ।
नैजसंख्यारत्नकोशरीत्या रसिकतुष्टये ॥ २८ ॥
भाव(चाम)राजेन चात्मार्थं रचितं शोधितं बुधैः ।
श्रीश्रीकण्ठस्तोत्रमिदं जीयादाचन्द्रतारकम् ॥

---

No. **11255.** श्रीगिरीशाष्टकम्.

ŚRĪGIRĪŚĀṢṬAKAM.

**Pages, 3. Lines, 8 on a page.**

Begins on fol. 170*b* of the MS. described under **No. 119,** wherein it has been given as Śrīśailāṣṭaka in the list of other works.

Complete.

Eight stanzas in praise of Śiva, worshipped in the shrine at Śrīśaila in the Kurnool district.

**Beginning:**

क्षीराम्भोराशितूणं धृतपरशुधनुःशूलदीव्यत्कृपाणं
गौरीकान्ताभिरामं निटिलहुतवहज्वालनिर्दग्धकामम् ।

तारास्माभृद्विहारं सकलभुवनभृन्नागराट्कण्ठहारं
वीरं रौद्राधिदेवं शरणशिवकरं श्रीगिरीशं भजेऽहम् ॥

**End:**

न्यग्रोधक्ष्माजमूले स्फटिकमणिमयस्वच्छपीठाधिवासं
सर्वज्ञं भक्तबन्धुं प्रविमलकरुणासारवद्दग्धसिन्धुम् ।
प्रत्यक्षादृष्टमूर्तिं दशदिगधिपतिं विश्वदृग्दिव्यमूर्तिं
ज्योतिर्लिङ्गं सिताङ्गं निरवधिमपरं श्रीगिरीशं भजेऽहम् ॥
श्रीगिर्यष्टकमिदं पुण्यं यः पठेत्सततं नरः ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

---

## No. 11256. शिवस्तुतिरत्नमाला.
## ŚIVASTUTIRATNAMĀLĀ.

Substance, palm-leaf. Size, 15½ × 1⅛ inches. Pages, 20. Lines, 5 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 47*a*. The other works herein are Śivastutiratnamālā with Kanarese meaning 1*a*, Cikkadēvarājastuti with Kanarese meaning 39*b*, Cikkadēvarājastuti 56*b*.

Complete.

A eulogy on God Śiva said to have been composed by Śaṅkarādhvarin at the instance and under the patronage of king Cikkabhūpati.

**Beginning:**

सर्वेश्वरस्तुतिकथारसपूर्णकर्णः श्रीचिक्कभूपतिरिति प्रथितप्रभावः ।
प्रत्यर्थिगर्वपरिलुण्ठनकेलिदक्षः प्रत्यग्रवाक्प्रसृतिरस्ति हि भू[बु]धेन्द्रः ॥
श्रीचिक्कभूपतिकृतस्तुतिपूर्णकर्णः श्रीकण्ठ एष भगवान् मणिकण्ठनामा ।
स्वर्गौकसां परिवृतः स्वयमेव साम्बमूर्तिः परं परमकारुणिकोऽवताद्वः ॥

* * * *

काहं क तादृशशिवस्तुतिरत्नमाला श्रीचिक्कभूपतिपरिष्कृतिसाञ्चितश्रीः ।
वाञ्छा तथापि हृदये परिवर्तते मे चेतःपथे शिवपदे दृढभक्तियोगात् ॥

अन्येषु सत्स्वपि सुधाशनशेखरेषु श्रीनीलकण्ठमवतंसितजह्नुकन्यम् ।
ईशानमस्य जगतस्त्रिदिवस्य नेत्रं त्वामेव नैगमरहस्यगिरो गृणन्ति ॥

**End:**

श्रीचिक्कभूपतिनियोगविशेषपूर्त(र्ण)श्रीशङ्कराध्वरिकृतस्तुतिरत्नमालाम् ।
शृण्वन्ति ये भुवि पठन्ति महोक्षघण्टानादं त एव गिरिशस्य गुणप्रबन्धम् ॥
सर्वेश्वरस्तुतिकथामृतपानगोष्ठीसंसेविनामपि विनोदकवित्वभाजाम ।
साम्राज्यसंपदवलेपविभूतिलक्ष्मीरन्यादृशी करगता जयति प्रकाशम् ॥

**Colophon:**

इति श्रीशङ्कराध्वरिविरचिता शिवस्तुतिरत्नमाला सम्पूर्णा ॥

---

No. **11257.** शिवस्तुतिरत्नमाला—कर्णाटकटीकासहिता.

ŚIVASTUTIRATNAMĀLĀ WITH KANARESE MEANING.

Pages, 78. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under the last number.

Complete.

Same work as the above, but with Kanarese meaning.

---

No. **11258.** षड्वर्णमन्त्राष्टकम्.

ṢAḌVARṆAMANTRĀṢṬAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 25*b* of the MS. described under No. 764.

Complete

A eulogy consisting of eight stanzas on the six-syllabled Mantra relating to God Śiva. The due repetition of this Mantra is held to have the power to confer on a person all kinds of blessings including salvation.

**Beginning:**

धनुर्धरित्रीधरसार्वभौमः मौर्वी च दर्वीकरसार्वभौमः ।
शरस्तु सर्वामरसार्वभौमः पायात्स नो दैवतसार्वभौमः ॥

वेदान्ततत्त्वमथितं नवनीतसारं चिद्रूपदृक्परमशैवरहस्यमन्त्रम् ।
ज्योतिर्मयोज्ज्वलनिरञ्जनरूपमन्त्वं वन्दे षडक्षरिसदाशिवनाममन्त्रम् ॥

**End:**

षड्वर्णमन्त्राष्टकमद्भुतार्थं सर्वागमप्रोक्तजगत्प्रकाशम् ।
यः संपठेन्मुक्तिसमस्तभोगान् प्राप्नोति सत्यं सति सिद्धमन्त्रम् ॥

---

No. **11259.** **षड्वर्णमन्त्राष्टकम्.**

ṢAḌVARṆAMANTRĀṢṬAKAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 35*a* of the MS. described under No. 17.
Complete.
**Same work** as the above, but without the first stanza.

---

No. **11260.** **षड्वर्णमन्त्राष्टकम्.**

ṢAḌVARṆAMANTRĀṢṬAKAM.

**Pages,** 3. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5122.
Complete.
Same work as the above.

---

No. **11261.** **षड्वर्णमन्त्राष्टकम्.**

ṢAḌVARṆAMANTRĀṢṬAKAM.

**Pages,** 2. Lines, 5 on a page.

Begins on fol. 4*a* of the MS. described under No. 781, wherein this work has been mentioned as Ṣaḍakṣarīmantrāṣṭaka in the list of other works.

Complete.

Same work as the above.

## No. 11262. षड्वर्णमन्त्राष्टकम्.

## ṢAḌVARṆAMANTRĀṢṬAKAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 27*a* of the MS. described under No. 120, wherein this work has been mentioned as Sadāśivāṣṭaka in the list of other works.

Complete.

Same work as the above, but with the addition of one stanza at the end as given below :—

यदच्युतामेयशुभाभिरामं सस्त(त्त)त्स्वहेमोज्ज्वलवर्णदीप्तम् ।
वीरेशलिङ्गं सदृशाङ्घ्रिपद्मं नित्यं प्रसन्नं शरणं प्रपद्ये ॥

---

## No. 11263. सदाशिवार्या.

## SADĀŚIVĀRYĀ.

Pages, 7. Lines, 22 on a page.

Begins on fol. 25*b* of the MS. described under No. 1021.

Complete.

Contains sixty-two stanzas written in the Āryā metre in praise of Sadāśiva conceived as the Supreme Being. By Svayamprakāśārya.

**Beginning:**

चिन्मुद्रितकरकमलं चिन्तितभक्तेष्टदं विमलम् ।
गुरुवरमाद्यं कंचन निरवधिकानन्दनिर्भरं वन्दे ॥

* * * *

निरुपमनित्यानिरीहो निष्कलनिर्मायनिर्गुणाकारः ।
विगलितसर्वविकल्पः शुद्धो बुद्धश्चकास्ति परमात्मा ॥

**End:**

सुखतरममरमदूरं सारं संसारवारिधेस्तीरम् ।
विदलितसकलविभेदं पूर्णं तत्किमपि भासते नित्यम् ॥

गुरुवरकरुणापाङ्गादार्याभिर्व्यधिकषाष्टिसङ्ख्या[का]भिः ।
निरवद्याभिरवोचं निगमाशिरस्तन्त्रसारभूतार्थम् ॥

गदितामिदमात्मविद्यां विमलामनुवासरं स्मरन् विबुधः ।
परिणतपरमार्थविद्यः प्रपद्यते सपदि परमार्थम् ॥

**Colophon:**

इति स्वयंप्रकाशार्यविरचिता सदाशिवार्या समाप्ता ॥

---

## No. 11264. साम्बपरब्रह्मस्तोत्रम्.

## SĀMBAPARABRAHMASTÔTRAM.

**Pages, 7. Lines, 6 on a page.**

Begins on fol. 28*a* of the MS. described under No. 17, wherein this work has been mentioned as Śivastôtra in the list of other works.

Stanzas in praise of Śiva as associated with Ambā or Pārvatī and conceived of as the Supreme Brahman.

**Beginning:**

साम्बो नः कुलदैवतं पशुपतिः साम्ब त्वदीया वयं
साम्बं नौमि सुरासुरोरगगणाः साम्बेन सन्तारिताः ।
साम्बायास्तु नमो मया विरचितं साम्बात्परं नो भजे
साम्बस्यानुचरोऽस्म्यहं मम रतिः साम्बे परब्रह्मणि ॥ १ ॥

**End:**

विष्वक्सेनमक्षि(पी)न्दिरापातिसमं(मसौ)तं रक्तभिक्षा(च्छ)ला(त)
संहृत्याथ स भैरवः शशिधरो यस्यांशभूतो जटी ।
ब्रह्मेन्द्रामरशिक्षकस्य बलिनो विष्णोर्मुखं(मेदं) व्या(चा)हरत्
तस्मिन्मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥ १३ ॥

## No. 11265. साम्बपरब्रह्मस्तोत्रम्.
## SĀMBAPARABRAHMASTŌTRAM.

Pages, 3. Lines, 22 on a page.

Begins on fol. 10*a* of the MS. described under No. 1021, wherein this work has been mentioned as Tattvapīṭhadaśaka in the list of other works given therein.

Complete.

Same work as the above, but the stanzas here are arranged in a different order. Haradatta is said to have composed this hymn explaining the superiority of Śiva over all other deities, and to have mounted upon a red hot iron plate in proof of the truthfulness of the statements made in the eulogy. He is said to have felt the hot plate as cool as the lotus flower on account of the supremacy of Śiva.

**Beginning:**

विष्ण्वाद्याश्च पुरत्रयं सुरगणा जेतुं न शक्ताः स्वयं
यं शंभुं भगवन् वयं तु पशवोऽस्माकं त्वमेवेश्वरः ।
तेन त्वां शरणागतान् पशुपते पाहीत्यवोचद् द्रुतं
तस्मिन्मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥
यस्येषुः कमलेक्षणः पशुपतेरब्जोद्भवः सारथिः
यस्य ज्या फणिनां वरो रथपदे यस्येन्दुसूर्यावुभौ ।
मेरुर्यस्य शरासनं रथवरो भूमिस्तु यस्याभवत्
तस्मिन्मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥

**End:**

विष्णुब्रह्ममुनीन्द्रदेवदितिजा यल्लिङ्गनुत्या(द)राः
संप्राप्ताः पदवीं सदैव मुदितास्ते कर्मदेवा जनाः ।
एतत्सत्यमहो त्रिसत्यमधुना वच्मीदमर्मीशितुः
सांनिध्ये निवसामि तत्सुखमहं पद्माभतप्तायसे ॥

इति शिवोत्कर्षप्रत्ययार्थं हरदत्तः तप्तायःपीठमारुरोह । तस्य तदा तत्पीठं कमलमिव शिवोत्कर्षयाथार्थ्यादभवत् ॥

No. **11266.** साम्बभुजङ्गस्तोत्रम्.

SĀMBABHUJAṄGASTŌTRAM.

**Pages, 4. Lines, 6 on a page.**

Begins on fol. 6*a* of the MS. described under No. 781, wherein it is mentioned as Bhujaṅgaprayātastava in the list of other works.

Complete.

Same work as that described under R.No. 177(*d*) of the Triennial Catalogue of MSS., Vol. I, Part I–A, but without colophon.

---

No. **11267.** साम्बभुजङ्गस्तोत्रम्.

SĀMBABHUJAṄGASTŌTRAM.

**Pages, 7. Lines, 5 on a page.**

Begins on fol. 48*a* of the MS. described under No. 2550.

Complete.

Same work as the above.

---

No. **11268.** साम्बभुजङ्गस्तोत्रम्.

SĀMBABHUJAṄGASTŌTRAM.

**Pages, 10. Lines, 5 on a page.**

Begins on fol. 65*a* of the MS. described under No. 5937.

Complete.

Same work as the above, but with colophon

---

No. **11269.** साम्बभुजङ्गस्तोत्रम्.

SĀMBABHUJAṄGASTŌTRAM.

**Pages, 9. Lines, 6 on a page.**

Begins on fol. 3*b* of the MS. described under No 367.

Complete.

Same work as the above.

## No. 11270. साम्बशिवस्तोत्रम्.
## SĀMBAŚIVASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 46*a* of the MS. described under No. 369.

Complete.

Stanzas in praise of Śiva and Pārvatī stated to have been uttered by Viṣṇu.

**Beginning:**

नमः शिवाभ्यां नवयौवनाभ्यां परस्पराश्लिष्टवपुर्धराभ्याम् ।
नगेन्द्रकन्यावृषकेतनाभ्यां नमो नमः शङ्करपार्वतीभ्याम् ॥
नमः शिवाभ्यां परदेवताभ्यां वधूवराभ्यां वनजेक्षणाभ्याम् ।
वरप्रदाभ्यां वररक्षकाभ्यां नमो नमः शङ्करपार्वतीभ्याम् ॥

**End:**

प्रवालशुद्धस्फटिकप्रभाभ्यां प्रासादपञ्चाक्षरसंस्थिताभ्याम् ।
प्रकल्पचिच्छक्तिसदाशिवाभ्यां नमो नमः शङ्करपार्वतीभ्याम् ॥
इति स्तुत्वा महादेवं देव्या[ः] सार्धं महेश्वरम् ।
प्रणम्य शिरसा साम्बं हरिस्तस्थौ शिवाग्रतः ॥

---

## No. 11271. हलायुधस्तोत्रम्.
## HALĀYUDHASTŌTRAM.

Pages, 25. Lines, 5 on a page.

Begins on fol. 26*a* of the MS. described under No. 2550.

Complete.

A work in praise of Śiva: by Halāyudha, who is said to be a native of Navagrāma in Southern India.

**Beginning:**

विघ्नं निघ्नन् द्विरदवदनः प्रीतये वोऽस्तु नित्यं
वामे कूटः प्रकटितबृहद्दक्षिणस्थूलदन्तः ।
यः श्रीकण्ठं पितरमुमया श्लिष्टवामार्धदेहं
दृष्ट्वा नूनं स्वयमपि दधावर्धनारीश्वरत्वम् ॥

श्लाघ्यः पुत्रो न भवति किल स्वस्य वप्तुः सकाशात्
धत्ते कैश्चित् क्वचिदपि गुणैर्यः समुत्कर्षरेखाम् ।
इत्थं वाञ्छन् पितुरधिकतां पञ्चवक्त्रस्य नूनं
षष्ठं बिभ्रद्वदनमपरं पातु विश्वं विशाखः ॥
एको देवः स जयति शिवः केवलज्ञानमूर्ति-
र्देवी सा च त्रिभुवनमिदं यद्विभूतिप्रपञ्चः ।
यत्कूटस्थं मिथुनमविनाभावसम्बन्धयोगा-
न्मिश्रीभूतं तदखिलजगज्जन्मबीजं नमामि ॥

**End:**

अप्येकाक्षरजल्पितैरपि शिशोः प्रीतिर्गुरूणां भवेत्
तस्मान्मद्वचनं मलीमसमपि स्यात्तुष्टिहेतुस्तव ।
श्रान्तस्त्वद्गुणकीर्तनात्किमपि यत्पुण्यं मयोपार्जितं
तेन स्ताद्भवनान्तरेऽपि गिरिश त्वय्येव भक्तिर्मम ॥
महाकालेन सेव्यन्तामामोदेन विरक्तया ।
संसारोद्भूतदेहः सन् स्वरूपहरणक्षमम् ॥
द्विजो दक्षिणदेशीयो नवग्रामविनिर्मितः ।
हलायुधबुधः शम्भोरिमां स्तुतिमचीकरत् ॥

**Colophon:**

हलायुधस्तवः संपूर्णः ॥

---

## No. 11272. हलायुधस्तोत्रम्.
## HALĀYUDHASTŌTRAM.

**Pages, 5.** Lines, 36 on a page.

Begins on fol. 57*b* of the MS. described under No. 1493, wherein it has been omitted to be included in the list of other works.

Complete.

Same work as the above, but without colophon.

## No. 11273. हलायुधस्तोत्रम्.
## HALĀYUDHASTŌTRAM.

**Pages, 29. Lines, 6 on a page.**

Begins on fol. 21*a* of the MS. described under No. 10909.

Wants the last two stanzas.

Same work as the above.

---

## No. 11274. हलायुधस्तोत्रम्.
## HALĀYUDHASTŌTRAM

**Pages, 11. Lines, 8 on a page.**

Begins on fol. 164*b* of the MS. described under No. 119.

Complete.

Same work as the above.

---

## No. 11275. हलायुधस्तोत्रम्—आन्ध्रटीकासहितम्.
## HALĀYUDHASTŌTRAM WITH TELUGU MEANING.

**Pages, 33. Lines, 6 on a page.**

Begins on fol. 71*a* of the MS. described under No. 5500.

Breaks off in the thirty-third stanza.

Same work as the above, but with Telugu meaning.

---

## No. 11276. हलायुधस्तोत्रम्—कर्णाटकटीकासहितम्.
## HALĀYUDHASTŌTRAM WITH KANARESE MEANING.

Substance, palm-leaf. Size, $7\frac{3}{8} \times 1$ inches. Pages, 120. Lines, 4 on a page. Character, Kanarese. Condition, good. Appearance, old.

Incomplete.

Contains forty-three stanzas only.

Same work as the above, but with Kanarese meaning.

No. 11277. हलायुधस्तोत्रम्—कर्णाटकटीकासहितम्.

HALĀYUDHASTŌTRAM WITH KANARESE MEANING.

Substance, palm-leaf. Size, 7⅛ × 1 inches. Pages, 42. Lines, 4 on a page. Character, Kanarese. Condition, injured. Appearance, new.

Begins in the forty-fifth stanza and breaks off in the fifty-sixth stanza.

Same work as the above, but with Kanarese meaning.

---

No. 11278. हलायुधस्तोत्रम्—सव्याख्यानम्.

HALĀYUDHASTŌTRAM WITH COMMENTARY.

Pages, 63. Lines, 8 on a page.

Begins on fol. 55*a* of the MS. described under No. 10912

Complete.

Same poem as the above, but together with a commentary thereon by Yūrēḍ Dēcayamantrin.

**Beginning:**

हलायुधकृतेष्टीकां यूरेदेचयमन्त्रिराट् ।
लक्ष्मीधरकटाक्षेण कुरुते गुरुतेजसा ॥
विघ्नान्निघ्नन् द्विरदवदनः प्रीतये वोऽस्तु नित्यं

* * * *

दृष्ट्वा नूनं स्वयमपि दधावर्धनारीश्वरत्वम् ॥

विघ्नान्निघ्नन्निति । विघ्नान् अन्तरायान् । निघ्नन् संहरन् । द्विरदवदनः विनायकः । प्रीतये संतोषाय । वः युष्माकं जगताम्; यद्वा युष्मच्छब्दवाच्यानां देहेन्द्रियादीनाम् । अस्तु भूयात् । नित्यं सर्वदा । वामे वामभागे । कूटः दन्तशून्यः । प्रकटितबृहद्दक्षिणस्थूलदन्तः प्रकटितश्चासौ बृहन् दीर्घश्च स चासौ दक्षिणश्च, दक्षिणः दक्षिणभागस्थितः, स चासौ स्थूलो विपुलो दन्तो यस्य सः प्रकटितबृहद्दक्षिणस्थूलदन्तः, यो विनायकः । श्रीकण्ठं विषकण्ठं पितरम् । उमया पार्वत्या । श्लिष्टवामार्धदेहं श्लिष्टः संश्लिष्टः वामार्धदेहो यस्य तं पितरं दृष्ट्वा नूनम् इवेत्यर्थः ।

**End:**

भवनान्तरेऽपि जन्मान्तरेऽपि हे गिरीश त्वय्येव भक्तिः मम । अत्रेत्थं पदयोजना——अपिच कथनान्तरे शिशोः एकाक्षरजल्पितैरपि पितुः प्रीतिर्भवेत् । तस्मात् मलीमसमपि मद्वचनं तव तुष्टिहेतु स्यादिति विचिन्त्य संसारचक्रे भ्रान्तः सन्

* * * *

भक्तौ प्रार्थितायामीश्वरानुग्रहवशात् भक्तिर्दृढा चेत् परमेश्वर एव भक्तमनुधावति, न तु भक्तः परमेश्वरम्, "वत्सं गौरिव गौरीशो धावन्तमनुधावति" इति स्मृतेः । अतः भक्तैः परतन्त्रः परमेश्वरः इति माहेश्वरपाशुपतमतसिद्धान्तम् । एतन्मतमेवावलम्ब्य भट्टहलायुधेन स्तोत्रमुट्टङ्कितमिति निरटङ्कि ॥

हलायुधकृतेष्टीकामकरोदाकरो गिराम् ।
लक्ष्मीधरकटाक्षेण देचयामात्यशेखरः ॥

**Colophon:**

इति श्रीहलायुधस्तोत्रं संपूर्णम् ॥

---

## (27) ŚAIVAGURU.

---

### No. 11279. गुरुध्यानम्.
### GURUDHYĀNAM.

Pages, 2. Lines, 4 on a page.

Begins on fol. 44*a* of the MS. described under No. 6600.

Complete.

Eulogistic stanzas on the greatness of the spiritual preceptor of the Śaivas.

**Beginning:**

ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः फलम् ।
मन्त्रमूलं गुरोर्वाक्यं मु(क्तिमू)लं गुरोः कृपा ॥

**End:**

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

* * * *

नादबिन्दुकलातीतं तस्मै श्रीगुरवे नमः ॥

No. **11280.** गुरुस्तोत्रम्.
GURUSTŌTRAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 84*a* of the MS. described under No. 119.

Complete.

Similar to the above.

**Beginning:**

चैतन्यं शाश्वतं शान्तं व्योमातीतं निरञ्जनम् ।
नादबिन्दुकलातीतं तस्मै श्रीगु(रवे) नमः ॥

**End:**

गुरुस्तोत्रमिदं पुण्यं यः पठेच्छिवसंनिधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

No. **11281.** गुरुस्तोत्रम्.
GURUSTŌTRAM.

Pages, 2. Lines, 17 on a page.

Begins on fol. 77*b* of the MS. described under No. 118.

Complete.

Same work as the above.

No. **11282.** गुरुस्तोत्रम्.
GURUSTŌTRAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 9*a* of the MS. described under No. 831.

Wants the last stanza.

Same work as the above.

No. **11283.** गुरुस्तोत्रम्.

GURUSTŌTRAM.

**Page, 1. Lines, 6 on a page.**

Begins on fol. 173*b* of the MS. described under No. 5661, wherein it has been omitted to be included in the list of other works.

Complete.

Similar to the above.

**Beginning:**

यस्मिन् सृष्टिस्थितिध्वंसविधानानुग्रहात्मकम् ।
कृत्यं पञ्चविधं शश्वद्भासते तं (नु)मः शिवम् ॥
सच्चिन्मयानन्दगुरोश्चरणं शरणं व्रजे ।
यस्य पादाम्बुजरसस्त्वज्ञानतिमिरौषधम् ॥

**End:**

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
दुःखातीतं गगनसदृश तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वदा साक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

---

No **11284.** गुरुस्तोत्रम्.

GURUSTŌTRAM.

**Pages, 4. Lines, 6 on a page.**

Begins on fol. 1*a* of the MS. described under No. 8701.

Complete.

In praise of Paramārādhya, son of Mallikēśvaraliṅga, a descendant of Śrīpatipaṇḍita. He is said to have belonged to the Jayavāṭikā family.

**Beginning:**

श्रीमच्छ्रीपातिपण्डितान्वयसुधासिन्ध्वादिमूलो गुरुः
स्वामी श्रीजयवाटिकानगरसंतानो द्विजाग्रेसरः ।

श्रीमल्लेश्वरलिङ्गगर्भजननः शृङ्गारभास्वद्गुरो
धामा यः सकलार्थमुक्तिफलदस्तं भावयेऽहं सदा ॥

**End:**

भूमौ यः परमाराध्यनामाख्यातोऽभवद्गुरुः ।
कामितार्थप्रदं तं नमामि चोत्तरशैवगम् ॥

* * * *

स्वतान्त्रिणां चैव जनानुरागिणां
स्तुतिं गुरूणां सुमतिः करोम्यहम् ॥

---

## No. 11285. गुर्वष्टकम्.

## GURVAṢṬAKAM.

Pages, 3. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 2881.

Complete.

Eight stanzas in praise of Śaṅkarācārya.

**Beginning:**

श्रीगुरुं भगवत्पादं शरण्यं भक्तवत्सलम् ।
शिवं शिवकरं शुद्धमप्रमेयं नमाम्यहम् ॥
आश्रिताज्ञानतत्कार्यनाशकं देशिकोत्तमम् ।
चिन्मुद्रालंकृतकरं यतिराजं नमाम्यहम् ॥

**End:**

गुर्वष्टकमिदं यस्तु पठेन्नित्यमतन्द्रितः ।
तस्य प्रसन्नो भवति गुरुर्देशिकदेशिकः ।

**Colophon:**

गुर्वष्टकं संपूर्णम् ॥

## No. 11286. चिदम्बरगुरुस्तवः.
## CIDAMBARAGURUSTAVAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 14*b* of the MS. described under No. 757, wherein this work has been mentioned as **Nārāyaṇatīrthastava** in the list of other works.

Complete.

Stanzas of self-surrender addressed to Cidambaraguru, son of Vyāsa and disciple of Nārāyaṇatīrtha.

**Beginning:**

नारायणाख्यवरतीर्थपदारविन्दं(न्द)-
त्रेधाङ्कुतं परमयोगिविलासमूर्तिम् ।
व्यासात्मजं परमकारुणिकं प्रशान्तं
तीर्थं चिदम्बरगुरुं शरणं प्रपद्ये ॥ १ ॥

**End:**

शिष्यान् प्रबोधयति तत्त्वमसीति वाक्ये
यः स्तौति तं वदति सूक्तमनेकवृत्तिम् ।
त्वामेव नित्यं(त्यमतुलं)सुदृढं प्रपद्ये
तीर्थं चिदम्बरगुरुं शरणं प्रपद्ये ॥ ५ ॥

---

## No. 11287. रामकृष्णगुरुस्तोत्रम्.
## RĀMAKṚṢṆAGURUSTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 57*a* of the MS. described under No. 560, wherein it is mentioned as Gurustava in the list of other works.

Complete.

In praise of Rāmakṛṣṇa, a religious teacher. There are also added at the end stanzas in praise of Kṛṣṇaguru, Vēṅkaṭaguru, Nārāyaṇabrahmēndra, Jagannātha, Kṛṣṇāśramasamyamin, etc.

**Beginning:**

श्रीरामचन्द्रपदपद्ममरन्दभृङ्ग वेदान्तसारविदुषं सकलागमज्ञम् ।
श्रीराममन्त्रवरमर्मसदान(कलास्व)भिज्ञं श्रीरामकृष्णगुरुमूर्तिमहं भजामि ॥

**End:**

श्रीरामकृष्णगुरुमूर्तिनुतिं पठन्ति ये मानवा विगतकल्मषमानसास्ते ।
श्रीरामभक्तजनशेखरमुख्यगण्या भूत्वा वहन्ति परलोकसुखं महान्तम्(:) ॥

रामाङ्घ्रिपद्मभ्रमरं महान्तं राराजदब्जायितनेत्रयुग्मम् ।
राजीवमान्यं रमणीयमूर्तिं श्रीरामकृष्णं गुरुवर्यमीडे ॥

* * * *

कारुण्यमूर्तिं कलिकल्मषघ्नं संजातशान्तिं विदितात्मविद्यम् ।
भास्वद्गुणं विष्णुशरण्यमार्यं श्रीवेङ्कटाख्यं गुरुवर्यमीडे ॥

* * * *

श्रीनारायणशब्दपूर्वमनघं ब्रह्मेन्द्रशब्दोत्तरं
प्राज्ञं सद्गुरुसत्तमं वरजगन्नाथाभिधानं गुरुम् ।
श्रीकृष्णाश्रमसंयमीश्वरमनन्तानन्दपूर्णाशयं
श्रीमद्व्यासपराशराभिधगुरुं ध्यायामि मन्मानसे ॥

---

No. 11288. लिङ्गयोग्यष्टकम्.
LIṄGAYŌGYAṢṬAKAM.

**Pages, 2. Lines, 5 on a page.**

Begins on fol. 55*a* of the MS. described under No. 764.

Complete.

Eight stanzas in praise of a Śaiva spiritual preceptor named Liṅgayōgin.

**Beginning:**

धृतिगाङ्गेयगिरिं सुरेशविनुतं देवादिदेवं विभुं
सततोदारमनन्तमव्यमाहिजं षड्वर्गातीतं हरिम् ।

अतितत्त्वार्थविवेदमन्वितमतिं हंसाधिरूढं गुरुं
श्रितपालं सुकवीन्द्रदेवमहिजं श्रीलिङ्गयोगिं (?) भजे ॥

**End:**

अतुलत्वं हरिशाम्भवादिविनुतं श्राव्याकृताश्विन्मयं
यतिवेदान्तमनामयं त्वविशदं ह्येकन्निरालम्बनम् ।
क्षितिवेदाष्टकपालिनश्च कुरुते चित्सौख्यश्च:श्रेयसं
श्रितपालं सुकवीन्द्रदेवमहिजं श्रीलिङ्गयोगिं (?) भजे ॥

---

No. 11289. शङ्कराचार्याष्टकम्.

ŚAṄKARĀCĀRYĀṢṬAKAM.

Pages, 3 Lines, 6 on a page.

Begins on fol. 166*a* of the MS. described under No. 745, wherein it is mentioned as Bhāṣyakārastava in the list of other works.

Complete.

Eight stanzas in praise of Śaṅkarācārya.

**Beginning:**

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशंकरं लोकशंकरम् ॥
योऽयं दैवतसार्वभौमविभवो विश्वाधिको रुद्र इ-
त्याद्यो ह्याद्यवचोभिरद्वयपरैरद्यापि संस्तूयते ।
अद्वैतात्मनिबोधनाय विदुषामिच्छासमङ्गीकृत-
श्रीमच्छङ्करदेशिकेन्द्रवपुषं श्रीशङ्करं भावये ॥

**End:**

भवभीतिहरं पुंसां भाविबन्धापनोदकम् ।
भाष्यकाराष्टकं भव्यं भजन्तु भुवि भावुकाः ॥

## No. 11290. शंकराचार्यस्तोत्रम्.
## ŚAṄKARĀCĀRYASTŌTRAM.

**Pages, 15. Lines, 8 on a page.**

Begins on fol. 2*a* of the MS. described under No. 2881, wherein this work has been mentioned as Śṛṅgēriguruparamparāstōtra in the list of other works given therein.

Complete.

Similar to the above. In the introduction the author refers with respectful homage to the disciples of Śaṅkarācārya, such as, Padmapāda, Hastāmalaka, Tōṭaka and Surēśvarācārya, of whom the last named has written an explanatory gloss on Śaṅkarabhāṣya.

**Beginning:**

गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥

* * * *

नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं श्रीगोविन्दयोगीन्द्रमथास्य शिष्यम् ॥
श्रीशंकराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम् ।
तं तोटकं वार्तिककारमन्यानस्मद्गुरून् संततमानतोऽस्मि ॥
शंकरं शंकराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥

**End:**

नमामि शंकराचार्यगुरुपादसरोरुहम् ।
यस्य प्रसादान्मूढोऽपि सर्वज्ञोऽपि सदास्म्यहम् ॥
श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशंकरं लोकशंकरम् ॥

---

## No. 11291. शृङ्गेरिगुरुपरम्परास्तोत्रम्.
## ŚṚṄGĒRIGURUPARAMPARĀSTŌTRAM.

**Pages, 12. Lines, 6 on a page.**

Begins on fol. 8*b* of the MS. described under No. 2881.

Complete.

Same work as that described under No. 49 of the Report on a Search for Sanskrit and Tamil MSS., No. 2, pages 99 to 101, 256 and 257. The dates on which the worship of the various teachers should be celebrated annually are also given.

**End:**

चतुर्षु मठेष्वपि विशेषोत्सवावसरे आदौ श्रीश्रीगिरिभट्टाचार्याराधनं कर्तव्यमिति श्रीमदाचार्यानुशासनम् ॥

---

## No. 11292. शृङ्गेरिगुरुपरम्परास्तोत्रम्.

## ŚṚṄGĒRIGURUPARAMPARĀSTŌTRAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 40*a* of the MS. described under No. 673, wherein this work has been mentioned Gurupaṅktistava in the list of other works.

Complete.

Similar to the above. The list of spiritual teachers as contained in this work is given below :—

(1) Śiva.
(2) Viṣṇu.
(3) Brahman.
(4) Vasiṣṭha.
(5) Śakti.
(6) Parāśara.
(7) Vyāsa.
(8) Śuka.
(9) Gauḍapāda.
(10) Gōvinda.
(11) Śaṅkarācārya.
(12) Viśvarūpācārya.
(13) Bōdhaghana.
(14) Jñānaghana.
(15) Jñanōttamaśiva.
(16) Jnānaghana.
(17) Siṁhagirīśvara
(18) Īśvaratīrtha.
(19) Narasiṁhatīrtha.
(20) Vidyātīrtha.
(21) Bhāratītīrtha.
(22) Vidyāraṇyaśiva.
(23) Chandraśēkharānandabhāratī.
(24) Narasiṁhabhāratī.
(25) Candraśēkharabhāratī.
(26) Nṛsiṁhāraṇya.
(27) Śaṅkarabhāratī.
(28) Gaṅgādharabhāratī
(29) Abhinavaviṣṇubhāratī.
(30) Mahēśānandabhāsura.
(31) Yōgānanda.
(32) Viśvātmaka.
(33) Saccidānanda.

**Beginning:**

नत्वा देवो(वेदो)पदेष्टारं शिवं परमकारणम् ।
वक्ष्ये पूजाविशुद्ध्यर्थं गुरुपङ्क्तेस्स्तवोत्तमम् ॥
आदौ शिवस्ततो विष्णुस्ततो ब्रह्मा ततः परम् ।
वसिष्ठश्च ततः शक्तिस्ततः श्रेष्ठपराशर[ा]ः ॥
ततो व्यासः शुकः पश्चाद्गौडपादोऽपि तत्तथा ।
गोविन्दाख्यो गुरुः श्रीमान् शंकराचार्यसंज्ञकः ॥

**End:**

तं वन्दे सच्चिदानन्दरूपं सर्वस्य साक्षिणम् ।
एवंक्रमः कथाप्रोक्तस्त्रयस्त्रिंशद्गुरूंस्तथा ॥

---

## No. 11293. सद्गुरुस्तोत्रम्.
## SADGURUSTŌTRAM.

Pages, 9. Lines, 6 on a page.

Begins on fol. 103*a* of the MS. described under No. 781, wherein this work has been mentioned as Ṣadgururagaḍa in the list of other works.

Complete.

The supplicant herein prays to the spiritual teacher for securing his protection.

**Beginning:**

श्रीगुरुलिङ्गघृणामृतसागरनिर्धूतदुष्टदुर्भवदूयाना(दुर्यान) गुरुमुक्तिप्रद-
विद्यागौरवं

* * * *

भवतिमिराहारदीपिकावार्तिसद्गुरवे । शमितपुनरागतान्वितमूर्तिसद्गुरवे ।
यमिजनान्तःस्फुरणचित्स्फूर्तिसद्गुरवे ।

**End:**

मल्लाल्य मल्लाल्य मां पाहि सद्गुरवे मल्लिङ्ग मल्लिङ्ग मां त्राहि सद्गुरवे ।
मां पाहि मां त्राहि मां पाहि सद्गुरवे मां पाहि मां पाहि मां पाहि सद्गुरवे ॥

No. **11294.** सद्गुरुस्तोत्रम्.
SADGURUSTŌTRAM.

Substance, palm-leaf. Size, 11¼ × 1¼ inches. Pages, 18. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Same work as the above, but with colophon as given below :—

इति श्रीसद्गुरुरगला समाप्तम् ॥

No. **11295.** सद्गुरुस्तोत्रम्.
SADGURUSTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 9*a* of the MS. described under No. 2418, wherein it is apparently wrongly given as Ṣaḍgurustōtra in the list of other works.

Incomplete.

Same work as the above.

No. **11296.** सद्गुरुस्तोत्रम्.
SADGURUSTŌTRAM.

Pages, 12. Lines, 5 on a page.

Begins on fol. 1*a* of the MS described under No. 10955.

Complete.

Same work as the above.

No. **11297.** सद्गुरुस्तोत्रम्.
SADGURUSTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 25*a* of the MS. described under No. 5541, wherein it is mentioned as Gurudhyāna in the list of other works.

Complete.

Similar to the above.

**Beginning:**

ब्रह्मानन्दं परमसुहृदं केवलं ज्ञानमूर्तिं
विश्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वदा साक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

**End:**

चिदंशं विभुं निर्मलं निर्विकल्पं निरीहं निराकारमोङ्कारगम्यम् ।
गुणातीतमव्यक्तमेकं तुरीयं परब्रह्म यं वेद तस्मै नमस्ते ॥

---

## (28) SARASVATĪ.

---

### No. 11298. विद्यादशकम्.
### VIDYĀDAŚAKAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 3*a* of the MS. described under No. 6548.

Wants beginning; otherwise complete.

Ten stanzas of praise and prayer addressed to the goddess Sarasvatī and invoking her to bestow learning on the supplicant.

**Beginning:**

. . . . नप्रिये नित्ये सर्वलोकप्रिये नमः ।
वरदाभयहस्तायै तव विद्यां प्रयच्छ मे ॥
सप्तकोटिमहामन्त्रे(न्त्रैः) कृतहारविराजिते ।
भक्तानुग्रहकारिण्यै तव विद्यां प्रयच्छ मे ॥

**End:**

इदं तु शारदास्तोत्रं शुचिर्भूत्वा समाहितः ।
मासार्धं तु जपं कुर्याच्छीघ्रसिद्धिर्भविष्यति ॥
अष्टोत्तरसहस्रं तु दिनं प्रति जपेद्बुधः ।
स पुमान् श्रियमाप्नोति शिवलोके महीयते ॥

**Colophon:**

इति विद्यादशकस्तोत्रं संपूर्णम् ॥

No. **11299.** सरस्वतीस्तोत्रम्.

SARASVATĪSTŌTRAM.

Pages, 4. Lines, 17 on a page.

Begins on fol. 102*b* of the MS. described under No. 5568.

Complete.

A eulogy on Sarsvatī, the goddess of learning, said to have been addressed by Bṛhaspati.

**Beginning:**

बृहस्पतिरुवाच—

सरस्वति नमस्यामि चेतनाहृदि संस्थिताम् ।
कण्ठस्तु पद्मयोनिस्तु ह्रीं ह्रीङ्काराप्रिय(:)तथा ॥

**End:**

षट्कर्मसिद्धिदं स्तोत्रं साक्षात्रैलोक्यमोहनम् ।
सिद्धसारस्वतं चैव विषयं नाशनं भवेत् ॥

---

No. **11300.** सरस्वतीस्तोत्रम्.

SARASVATĪSTŌTRAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 74*a* of the MS. described under No. 3776

Complete.

Similar to the above; said to be by Bhāṣyakāra, a disciple of Śrīkālahastīśaguru.

**Beginning:**

शुभानि विदधातु नः किमपि पाणिपद्मस्थली-
विभासिशुकपोतकप्रियवचोभिरानन्दितम् ।
सुधाकरकलासमुल्लसितशेखरं पद्मभू-
वशीकरणचतुरीकलितलीलमाद्यं महः ॥

**End**

भाष्यकारेण रचिता जीयाद्वाग्देवतानुतिः ।
श्रीकालहस्तीशगुरुवर्यपादाब्जसेव(वि)ना ॥

No. **11301.** सरस्वतीस्तोत्रम्.

SARASVATĪSTŌTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 74*b* of the MS. described under No. 3776, wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Similar to the above.

**Beginning:**

कुन्दालिद्युतिमन्दहाससुमुखी राकेन्दुबिम्बानना
मल्लीतल्लज[माल]मालतीसुमनसां सौभाग्यपाटच्चरी ।
फुल्लेन्दीवरबृन्दषट्पदतमःसंदोहसंदेहकृ-
द्वेणीका विधिसुन्दरी मम भवेदानन्दसंदोहिनी ॥ १ ॥

**End:**

शुभ्रं दभ्रवलग्नमभ्रतनु तेऽदभ्रप्रमोदप्रदं
विश्रान्ते भ्रमदन्धपस्य सततं तैस्तैर्निजैर्विभ्रमैः ।
शब्दब्रह्ममये जगत्यनितरापेक्षाधिकाराक्रियं
किंचित्कुञ्चितकेशमद्य जयति स्रष्टुर्भुविष्ठं महः ॥

---

No. **11302.** सरस्वतीस्तोत्रम्.

SARASVATĪSTŌTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 13*a* of the MS. described under No. 5787.

Complete.

Ten stanzas said to have been addressed by Āśvalāyana in praise of the goddess Sarasvatī. The manner in which the goddess should be contemplated upon is also described herein.

**Beginning:**

ऋषय ऊचुः—

कथं सारस्वतप्राप्तिः केन ध्यानेन सुव्रत ।
महासरस्वती येन तुष्टा भवति सर्वदा ॥

आश्वलायन उवाच—

श्रृण्वन्तु ऋषयः सर्वे गुह्याद्गुह्यतमं महत् ।
दशश्लोक्यमिदं स्तोत्रं वदामि ध्यानपूर्वकम् ॥
अङ्कुशं चाक्षसूत्रं च पाशपुस्तकधारिणीम् ।
मुक्ताहारैः समायुक्तां देवीं ध्यायेच्चतुर्भुजाम् ॥

*　　*　　*　　*

प्रणम्य स्तौमि तामेव ज्ञानशक्तिं सरस्वतीम् ॥
या वेदान्तोक्ततत्त्वैकस्वरूपा परमार्थतः ।
नामरूपात्मिकाव्यक्ता सा मां पातु सरस्वती ।

**End:**

नामजात्यादिकं सर्वं यस्यामावेश्यते पुनः ।
ध्यायन्ती ब्रह्मरूपैका सा मां पातु सरस्वती ॥
यः कवित्वं निरातङ्कं भक्तिं मुक्तिं च वाञ्छति ।
सोऽभ्यर्च्यैनां दश श्लोक्या भक्त्या स्तौतु सरस्वतीम् ॥

*　　*　　*　　*

इत्याश्वलायनमुनिर्निजगाद देव्याः
स्तोत्रं समस्तफलभोगनिधानभूतम् ।
एतत्पठन् द्विजवरः शुचितामुपैति
सन्ध्यासु वाञ्छितमुपैति न संशयोऽत्र ॥

**Colophon:**

सरस्वतीस्तोत्रं सम्पूर्णम् ॥

---

## No. 11303. सरस्वतीस्तोत्रम्.
## SARASVATĪSTŌTRAM.

Pages, 14. Lines, 4 on a page.

Begins on fol. 12*a* of the MS. described under No. 2421, wherein this work has been mentioned as Dēvīstuti in the list of other works.

Complete.

Same work as the above.

---

No. 11304. सरस्वतीस्तोत्रम्.

SARASVATĪSTŌTRAM.

Pages, 7. Lines, 8 on a page.

Begins on fol. 192*b* of the MS. described under No. 119 and no on fol. 192*a* as stated in the list of other works.

Complete.

Same work as the above.

---

No. 11305. सरस्वतीस्तोत्रम्.

SARASVATĪSTŌTRAM

Pages, 5. Lines, 5 on a page.

Begins on fol. 71*a* of the MS. described under No. 5661.

Complete.

Same work as the above.

---

No. 11306. सरस्वतीस्तोत्रम्.

SARASVATĪSTŌTRAM.

Pages, 4. Lines, 16 on a page.

Begins on fol. 209*a* of the MS. described under No. 424.

Complete; as found in the Brahmāṇḍapurāṇa.

Similar to the above; the repetition of this eulogy is held to be efficacious in the accomplishment of one's desires, in conferring prosperity upon one and in making one a poet.

**Beginning:**

अस्य श्रीसरस्वतीस्तोत्रमन्त्रस्य मार्कण्डेय ऋषिः, स्रग्धरानुष्टुप् छन्दांसि श्रीसरस्वती देवता ।

* * * *

शुक्लां ब्रह्मविचारसारपरमोमाद्यां जगद्व्यापिनीं
वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम् ।

हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥
ह्रीं ह्रीं ह्रीं हृद्यबीजे शशिरुचिकमलाकल्पविस्पष्टशोभे
भव्ये भव्यानुकूले कुमतिवनदहे विश्ववन्द्याङ्घ्रिपद्मे ।
पद्मे पद्मोपविष्टे प्रणतजनमनोमोदसम्पादयित्री(त्रि)
प्रास्फु(प्रोत्फु)ल्लज्ञानकूटे हरिहरदयिते देवि संसारसारे ॥

**End:**

इत्येतैः श्लोकमुख्यैः प्रतिदिनमुषसि स्तौति यो भक्तिनम्रः
वाण्या वाचस्पतेरप्यविदितविभवो वाक्पटुर्मृष्टपङ्कः ।
सस्यादीष्टार्थलाभाः सुतमिव सततं पातितं सा च देवी
सौभाग्यं तस्य लोके प्रसरति कविता विघ्नमन्तं प्रयाति ॥

* * * *

पक्षद्वये च यो भक्त्या त्रयोदश्येकविंशतिः ।
अविच्छिन्नं पठेद्धीमान् ध्यात्वा देवीं सरस्वतीम् ॥
सर्वपापविनुर्मुक्तः सुभगो लोकविश्रुतः ।
वाञ्छितं फलमाप्नोति लोकेऽस्मिन् नात्र संशयः ॥

**Colophon:**

इति श्रीनारदनन्दिकेश्वरसंवादे ब्रह्माण्डपुराणोक्तं ब्रह्मपुराणोक्तं ब्रह्मप्रोक्तं सरस्वतीस्तोत्रं सम्पूर्णम् ॥

## (29) SUBRAHMAṆYA.

### No. 11307. कार्त्तिकेयस्तवः.
### KĀRTTIKĒYASTAVAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 21*a* of the MS. described under No. 2097.

Complete; as found in the 231st Adhyāya of the Āraṇyaparva of the Mahābhārata.

A eulogy on god Subrahmaṇya, the son of Śiva and Pārvatī and the foster-son of Kṛttikā.

**Beginning :**

मार्कण्डेयः—

स्तोष्यामि देवैः ऋषिभिश्च जुष्टं शक्त्या गुहं नामभिरप्रमेयम् ।
षडाननं शक्तिधरं सुवीरं निबोध चैतानि कुरुप्रवीर ॥
ब्रह्मण्यो वै ब्रह्मजो ब्रह्मविच्च ब्रह्मे(ह्मा)शयो ब्रह्मविदां वरिष्ठः ।
ब्रह्मप्रियो ब्राह्मणसव्रती त्वं ब्रह्मज्ञो वै ब्राह्मणानां च नेता ॥
स्वाहा स्वधा त्वं परमं पवित्रं मन्त्रस्तुतस्त्वं प्रथितः षडर्चिः ।
संवत्सरस्त्वमृतवश्च षड्वै मासार्धमासावयनं दिशश्च ॥

**End :**

धनमायुर्यशो दीप्तं पुत्रान् शत्रुजयं तथा ।
स पुष्टितुष्टी संप्राप्य स्कन्दसायुज्यमाप्नुयात् ॥

**Colophon :**

इत्यरण्यपर्वणि कार्त्तिकेयस्तव एकत्रिंशदधिकद्विशतितमोऽध्यायः ॥

---

## No. 11308. षडाननस्तुतिः.

## ṢAḌĀNANASTUTIḤ.

Substance, palm-leaf. Size, 15⅝ × 1⅜ inches. Pages, 4. Lines, 8 on a page. Character, Telugu and Grantha. Condition, good. Appearance, old.

Begins on fol. 11*a*. The other works herein are Pādarakṣāprayōgapratyāmnāya 1*a*, Niruktaprakāśikā 5*a*, **Mahimnasstava** 13*a*, Svarṇagaurīvrata 19*a*

Complete.

Similar to the above. The god is conceived herein as having six faces.

**Beginning :**

श्रीशंकरसंहितान्तर्गतकौमारखण्डगतसप्तकाण्डकथाभिप्रायसंग्रहरूपेयं षडाननस्तुतिः—

श्रीगौरीसहितेशफालनयनादुद्भूतमग्न्याशुग-
व्यूढं विष्णुपदीपयःशरवणे संभूतमन्याहशम् ।
षोढाविग्रहसुन्दरास्यममलं श्रीकृत्तिकाप्रीतये
शर्वाण्यङ्कविभूषणं स्फुरतु मच्चित्ते गुहाख्यं महः ॥

**End:**

षडाननस्तुतिमिमां यो जपेदनुवासरम् ।
धर्ममर्थं च कामं च मोक्षं चापि स विन्दति ॥

**Colophon:**

षडाननस्तुतिः संपूर्णा ॥

---

No. **11309.** सुब्रह्मण्यभुजङ्गस्तोत्रम्.

SUBRAHMANYABHUJAṄGASTŌTRAM.

Pages, 15. Lines, 5 on a page.

Begins on fol. 7*a* of the MS. described under No. 2040

Complete.

Similar to the above; written in the Bhujaṅgaprayāta metre. By Śaṅkarācārya.

**Beginning:**

गणेशं नमस्कृत्य गौरीकुमारं गजास्यं गुहस्याग्रजातं गभीरम् ।
प्रलम्बाधरं शूर्पकर्णं त्रिणेत्रं प्रवक्ष्ये भुजङ्गप्रयातं गुहस्य ॥
पृथक्षट्किरीटस्फुरद्दिव्यरत्नप्रभाक्षिप्तमार्ताण्डकोटिप्रकाशम् ।
चलत्कुण्डलोद्यत्प्रगण्डस्थलान्तं महानर्घहारोज्वलत्कम्बुकण्ठम् ॥

**End:**

भुजङ्गाकृतेः स्वक्रियार्थं मयेदं भुजङ्गप्रयातेन वृत्तेन क्लृप्तम् ।
तव स्तोत्रमेतत्पवित्रं सुपुण्यं परानन्दसंदोहसंवर्धनं च ॥
इद तारकाचु(रे)र्गुणस्तोत्रराजं पठन्तास्त्रिकाले प्रसन्ना जना ये ।
सुपुत्राष्टभोगानिहैव(वाप्य तेऽमी)लभन्ते तदन्ते परं स्वर्गभोगम् ॥

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्यवर्य[पारावार]यमनियमासनप्राणायाम-प्रत्याहारध्यानधारणसमाध्यष्टाङ्गयोगनिरत(त)पश्चकवर्तिश्रीगुरुशङ्कराचार्य-विरचितं सुब्रह्मण्यभुजङ्गस्तोत्रं संपूर्णम् ॥

---

No. **11310.** सुब्रह्मण्यषट्कम्.

SUBRAHMAṆYAṢAṬKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 21*a* of the MS. described under No. 3178, wherein this work has been mentioned as Subrahmaṇyāṣṭaka in the list of other works.

Complete in six stanzas.

Similar to the above.

**Beginning:**

शरणागतमातुरमाधु(धि)जितं करुणाकर कामप कामहतम् ।
शरकाननसंभव चारुरुचे परिपालय तारकमारक माम् ॥

**End:**

इति कुक्कुटकेतुमनुस्मरतां पठतामपि षण्मुखषट्कमिदम् ।
भजतामपि नन्दनमिन्दुमृथो(भृतो) म(न)भयं कु(क)चितस्तु(दस्ति) शरीरभृताम् ॥

गाङ्गेयं वह्निगर्भं शरवणजनितं ज्ञानशक्तिं कुमारं
ब्रह्मण्यं स्कन्ददेवं गुहमचलभिदं रुद्रतेजस्स्वरूपम् ।
सेनान्यं तारकघ्नं गजमुखसहितं कार्त्तिकेयं षडास्यं
सुब्रह्मण्यं मयूरध्वजरथसहितं देवदेवं नमामि ॥

---

No. **11311.** सुब्रह्मण्यस्तोत्रम्.

SUBRAHMAṆYASTŌTRAM.

Pages, 4. Lines, 4 on a page.

Begins on fol. 20*a* of the MS. described under No. 950.

Complete.

Similar to the above. The form in which the god should be contemplated is given in the initial stanza

**Beginning:**

षड्वक्त्रं शिखिवाहनं त्रिनयनं चित्राम्बरालङ्कृतं
शक्तिं वज्रकृपाणशूलमभयं खेटं धनुश्चक्रकम् ।
पाशं कुक्कुटमङ्कुशं च वरदं दोर्भिर्दधानं सदा
ध्यायेदीप्सितसिद्धिदं शिवसुतं स्कन्दं सुरेन्द्रं सदा ॥

**End:**

द्विषड्भुजं षण्मुखमम्बिकासुतं कुमारमादित्यसहस्रतेजसम् ।
वन्दे मयूरासनमग्निसंनिभं सेनान्यहं(धिपं) स्कन्दमभीष्टमीडे ॥

(30) SŪRYA.

No. 11312. सूर्यद्वादशार्यास्तोत्रम्.
SŪRYADVĀDAŚĀRYĀSTŌTRAM.

Pages, 3. Lines, 16 on a page.

Begins on fol. 12*b* of the MS. described under No. 424, wherein this work has been mentioned as Dvādaśāryāstōtra in the list of other works.

Complete.

A eulogy in twelve stanzas of Āryā metre on the twelve forms of the Sun-god. Its due repetition is held to be efficacious in removing diseases.

**Beginning:**

अस्य श्रीद्वादशार्या(स्तोत्र)मन्त्रस्य साम्ब ऋषिः, आर्या छन्दः, भगवान् सूर्यः समस्तरोगहर्ता देवता, सर्वव्याधिनिवृत्त्यर्थे विनियोगः ।

ध्यानम्—

धृतपद्मद्वयं भानुं तेजोमण्डलमध्यगम् ।
सर्वाधिव्याधिशमनं छायाश्लिष्टतनुं भजे ॥

उद्यन्नद्य विवस्वानारोहन्नुत्तरां दिवं देवः ।
हृद्रोगं मम सूर्यो हरिमाणं चापि नाशयतु ॥

**End:**

द्वादशकं साम्बस्य पुरो नभस्स्थलात्पतितम् ।
पठतां भाग्यसमृद्धिः समस्तरोगक्षयश्च स्यात् ॥

**Colophon:**

इति द्वादशार्यास्तोत्रमन्त्रः ॥

---

## No. 11313. सूर्यद्वादशार्यास्तोत्रम्

## SŪRYADVĀDAŚĀRYĀSTŌTRAM.

Pages, 2. Lines, 23 on a page.

Begins on fol. 170*a* of the MS. described under No. 446, wherein this work has been mentioned as Dvādaśāryāstōtra and is wrongly printed as beginning on fol. 178*a* in the list of other works.

Complete.

Same work as the above, but without Ṛṣi, Chandas and Dēvatā.

---

## No. 11314. सूर्यशतकम्.

## SŪRYAŚATAKAM.

Substance, palm-leaf. Size, 18 × 1⅜ inches. Pages, 19. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Sūryaśatakavyākhyā 10*b*.

Same poem as the one described under R.No. 139(*b*) of the Triennial Catalogue of MSS, Vol. I, Part I-A, but this is complete.

**End:**

देवः किं बान्धवः स्यात्प्रियसुहृदथवाचार्य आहोस्विदार्यो
रक्षाचक्षुर्नु दीपो गुरुरुत जनको जीवितं बीजमोजः ।
एवं निर्णीयते यः क इति न जगतां सर्वदा सर्वदोऽसौ
सर्वाकारोपकारी[स] दिशतु दशशताभीशुरभ्यर्थितं वः ॥ १०० ॥

## No. 11315. सूर्यशतकम्.
## SŪRYAŚATAKAM.

Substance, paper. Size, 11⅝ × 5¼ inches. Pages, 40. Lines, 7 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above, but with colophon as given below :—

इति सूर्यशतकं संपूर्णम् ॥

---

## No. 11316. सूर्यशतकम्.
## SŪRYAŚATAKAM.

Pages, 6. Lines, 19 on a page.

Begins on fol. 6*a* of the MS. described under No. 2886.

Complete.

Same work as the above, but with the addition of two stanzas at the end as given below : one of them gives the benefits arising from a repetition of the hymn and the other an index of the contents.

श्लोका लोकस्य भूत्यै शतमिति रचिताः श्रीमयूरेण भक्त्या
युक्तश्चेदं(श्चैतान्)पठेद्यः सकृदपि पुरुषः सर्वपापैर्विमुक्तः ।
आरोग्यं सत्कवित्वं मतिबलमतुलं कान्तिमायुःप्रकर्षं
भुक्तिं मुक्तिं च शक्तिं सुखमपि लभते सोऽत्र सूर्यप्रसादात् ॥
चत्वारिंशत्प्रभायास्त्रिभिरधिकमतो वाजिनां षट्कमुक्तं
पश्चान्नेतुर्द्विषट्कं पुनरपि च दश स्यन्दने चैवमुक्ताः ।
भूयोऽष्टौ मण्डलस्य स्तुतिरपि च रवेर्विंशतिः श्रीमयूरा-
दित्थं जातं पठेद्यः शतकमनुदिनं सूर्यसायुज्यमेति ॥

---

## No. 11317. सूर्यशतकम्—सव्याख्यानम्.
## SŪRYAŚATAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 15⅞ × 1⅝ inches. Pages, 56. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Almost complete.

Same work as that described under R.No. 139(*b*) of the Triennial Catalogue of MSS., Vol. I, Part I-A, but with the addition of five introductory stanzas in the beginning and with the end as given below.

**Beginning:**

वन्देऽरविन्ददलशीतलकोमलाक्षं वक्षःस्थलद्विमधृतशङ्खगदाब्जचक्रम् ।
श्रीवत्समुद्रितमधिष्ठितवैनतेयं ज्योतिः परं परमपूरुषनामधेयम् ॥

* * * *

सन्तः सन्तु महागुणा यदि गुणा दोषेषु भूतिष्वपि
ग्रन्थेऽस्मिन् कतिचित्पदैकमनसो नान्येषु विद्वेषिणः ।
आनायेन समं हृतेषु मणिभिः शम्बूकयूथेष्व . . . ।
. . . . . मणीन् मणिभृतो भिन्दन्ति नैवेतरान् ॥

**End:**

सर्वदा निरन्तरं सर्वाकारोपकारी सर्वाकारैर्देवतादिरूपैः उपकरोतीति तादृग्विधः सर्वमभीष्टं ददातु वदान्यचूडामणिः असौ दशशताभीशुः सहस्रकिरणः वो युष्मभ्यमभ्यर्थितं दिशतु सर्वमिष्टमर्थं ददातु ॥

प्राचीमुखैकतिलकं पूर्वाचलशेखरैकमाणिक्यम् ।
त्रिभुवनगृहैकदीपं वन्दे लोकैकलोचनं देवम् ॥

Then come the two stanzas which are given in the end under the last number.

---

No. **11318.** सूर्यशतकम्—सव्याख्यानम्.

SŪRYAŚATAKAM WITH COMMENTARY.

Substance, paper. Size, $11\frac{1}{8} \times 4\frac{3}{4}$ inches. Pages, 92. Lines, 14 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 9*a* The other work herein is Ghaṭakarpara with commentary 1*a*.

Complete

Same text as the above, but with the addition of a commentary called Haṁsī by Rāmachandrakavi, son of Lakṣmīnārāyaṇa of Bhārgavagōtra. In this commentary it is stated that Mayūrakavi composed this eulogy on the Sun-god to get himself cured of white leprosy with which he became afflicted in consequence of a curse pronounced on him by his daughter for having described her in an erotic stanza, the father and the daughter not having recognised each other at the time.

**Beginning:**

जम्भारातीभकुम्भोद्भव (. . . .) मानवो मानवीयाः ॥
श्रीसूर्यं देवसङ्घैः प्रतिदिनमृषिभिश्चार्चितं चर्चितं यै-
र्ब्रह्म ब्रह्माण्डदीपं शिरसि धृतशयैरास्तुतं वालखिल्यैः ।
सिद्धैः सिद्धान्तविद्भिः सततमभिनुतं प्राणदं प्राणिनां ता-
न्वन्दे तं देवदेवं जगदिदमखिलं यः पुनाति स्वपादैः ॥
काहं मन्दमतिर्वाणी मयूरस्य कवेः क च ।
तथापि कृपया शम्भोः सूनोस्तां विवृणोम्यहम् ॥
व्याख्या हंसीति नाम्नेयं रामचन्द्रेण निर्मिता ।
मानसं विदुषी शश्वन्निर्मलं संचरत्वसौ ॥

अत्र खलु देशान्तराच्चिरसमयागतेन स्वसुतामजानता तत्रभवता मयूरनाम्ना कविना स्नानार्थमागता सा

एणीदृशः पाणिपुटे निरुद्धा वेणिर्विरेजे शयनोत्थितायाः ।
सरोजकोशादिव निस्सरन्ती श्रेणी घनीभूय मधुव्रतानाम् ॥

इत्यनेन वर्णिता । ततः सापि रुषा पितरमजानती क्रुद्धा सती जन्मान्तराधिगतकर्मविपाकमेनं कुष्ठी भवेति शशाप। ततः श्वेतकुष्ठाङ्गः सोऽपि —

'हुताशनाद्धृतिमिच्छेज्ज्ञानमिच्छेन्महेश्वरात् ।
आरोग्यं भास्करादिच्छेन्मोक्षमिच्छेज्जनार्दनात् ॥

इति स्मृतेः सद्यः शिवेतरक्षतये तालवृक्षाग्रबद्धशतरज्जुमयशिक्योपरि स्थित्वा प्रतिश्लोकमेकैकरज्जुकृन्तनेन श्रीभगवन्तं सूर्यमेभिर्जम्भेत्यादिस्तवैः स्तुत्वा श्वेतकुष्ठाद्विमुक्त इति जनश्रुतिः। तानि यथामति व्याकुर्मः। प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्त्यर्थं शिष्टाचारपरिप्राप्तमिष्टदेवताजम्भारातिस्मरणलक्षणं मङ्गलाचरणं स्वेनानुष्ठितं शिष्यशिक्षार्थमादावुपनिबध्नाति जम्भारातीत्यादिना। प्रथमं तावदेकोनविंशतिश्लोकैः रश्मीन्वर्णयति। जम्भारातेरिन्द्रस्य 'जम्भभेदी हरिहयः' इत्यमरः, य इभः ऐरावतः तस्य कुम्भे उद्भवो यस्य तं सान्द्रसिन्दूररेणुं निबिडसिन्दूररजो दधतः धारयन्त इव रक्ताः लोहितवर्णाः हस्तिकुम्भे शोभायै सिन्दूरं समारोप्यते।

**End:**

श्लोका लोकस्य भूत्यै शतमिति रचिता श्रीमयूरेण भक्त्या
युक्तश्चैतान् पठेद्यः सकृदपि पुरुषः सर्वपापैर्विमुक्तः।
आरोग्यं सत्कवित्वं मतिमतुलबलं कान्तिमायुःप्रकर्षं
विद्यामैश्वर्यमर्थं सुखमपि लभते सोऽत्र सूर्यप्रसादात्॥

**Colophon:**

इति श्रीमहाकविमयूरभट्टकृतसूर्यशतकं समाप्तम्॥

श्लोका लोकस्येति फलस्तुतिः स्पष्टैव।
नन्दाब्जै(१९)र्वर्णितो रश्मिर्द्विसूर्यै(२४)र्वर्णितं महः।
रसै(६)रश्वः स्तुतः पद्यैः सूर्यै(१२)ररुण ईडितः॥
रुद्रै(११)रथ रथं स्तुत्वा मण्डलं वसुभिः(८)स्तुतम्।
खनेत्रै(२०)र्वर्णितः सूर्य(र्यः)स्तुत्वा मुक्तो महागदात्॥
वंशेऽभूद्भार्गवस्य द्रविडजनमहान्वेदवेदाङ्गवेत्ता
लक्ष्मीनारायणाख्यो रघुपतिचरणध्यानलब्धावबोधः।
तत्सूनू रामचन्द्रो जनकनृपसुताजानिपादानुरक्तो
व्याख्येयं तेन हंसी व्यरचि च विदुषां मानसैकालयासौ॥

**Colophon:**

इति श्रीसूर्यशतकव्याख्याने रामचन्द्रकृतौ हंसीनाम्नि सूर्यवर्णनं नाम सप्तमः पक्षः ॥

रक्ताक्षिवत्सरे भानुवासरे दशमीतिथौ ।
मार्गशीर्षे कृष्णपक्षे लिखितो द्युमणिस्तवः ॥

शङ्करेणेति शेषः ॥

---

No. 11319. सूर्यशतकम्—सव्याख्यानम्.

SŪRYAŚATAKAM WITH COMMENTARY.

Substance, paper. Size, 11⅝ × 7⅞ inches. Pages, 111. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Gītagōvinda with Telugu commentary 59*a*.

Complete.

This is a eulogy on the Sun-god in the Sragdharā metre. By Lingakavi, a priest of the Śaivas. It is apparently written in imitation of Mayūrakavi's work. The commentary seems to have been added by the author of the text.

This MS. is said to have been compared on the 6th July 1831 by Boynapalli Subbaya and Rāyasam Basavayya.

**Beginning:**

श्रीमद्धामप्रथाया निधित खरत(क)र आशमान प्रमाणा-
तर्क्यानन्तातताधिप्रमथन जनताहृद्य निर्बोधिताश ।
तेजस्कामावसक्तच्यानतजलजभव व्याधिवेधापहर्त्त
तत्त्वाधिष्ठानमोजः स्वमहिमगतये सन्ततं भावयाम ॥

अत्र कविर्भगवन्तं ब्रह्मण्यं परमपुरुषार्थसाधनं भास्करं प्रस्तोष्यमाण आदौ तत्प्रीतये तदीयानोजस्तुरङ्गसारथिबिम्बस्यन्दनान् क्रमेण प्रस्तौति—श्रीमद्धामेत्यादि । अस्यार्थः—खरास्तीक्ष्णाः कराः किरणा यस्य सः खरकरः तस्य संबोधने सम्बोधने चेति प्रथमैकवचनं सुः एङ्ह्रस्वात्सम्बुद्धे-

रिति लोपे खरकरेति रूपम् । हे खरकर भास्कर तत्त्वस्याधिष्ठानमाश्रयभूतं ते तव ओजस्तेजः स्वस्य महिमा तस्य गतये प्राप्तये; तादर्थ्ये चतुर्थी । सन्ततं सदा भावयाम चिन्तयाम ॥

**End:**

इति वैदिकेन शैवाचार्येणार्येण चातुरीधुर्यम् ।
लिङ्गाह्वयेन कविना रचितं सावित्रमुत्तमं स्तोत्रम् ॥

इति वैदिकेनेति । लिङ्गाह्वयेन कविना सावित्रं सवितृदेवताकम् उत्तमं स्तोत्रं रचितम् । शेषं स्पष्टम् ॥

मासामासन्नविंशाः क्रमश उपदशा अश्विकाष्षट् च सूते
ध्ये(ह्ये)कान्नाष्टौ च बिम्बं प्रति उपचतुराः स्यन्दनार्था रवीशाः ।
द्वापञ्चाशत्प्रणीता बुधहृदयहितं स्रग्धरा लिङ्गनाम्ना
शैवाचार्येण तासां शतमभिपठतां वाञ्छितं चर्करीतु ॥

दुष्टं शिष्टं घनेनाचं क्षारं स्वादु यथोदकम् ।
गृहीतं कुस्वभावेन तद्द्वयं विपरीयते ॥
काव्ये चिन्त्ये पदे कालीदासादिसदृशः कवीन्
अचिन्त्ये त्वात्मसदृशान्मन्यन्ते पण्डितोत्तमाः ॥
सुवर्णपदतां यातु मत्काव्यं बहुलोहकम् ।
भृशमत्र भवद्भिस्तु रसनास्पर्शवेदिभिः ॥

---

## No. 11320. सूर्यशतकव्याख्या.
## SŪRYAŚATAKAVYĀKHYĀ.

**Pages, 58. Lines, 6 on a page**

Begins on fol. 10*b* of the MS. described under No. 11314.

Complete.

A commentary on the Sūryaśataka of Mayūrakavi: by Gōpīnātha.

**Beginning :**

सीताकल्पलताशोभिरामचन्द्रसुरद्रुमः ।
सुमनोनिलयः श्रीमान् कल्याणं वितनोतु नः ॥
धीमता गोपिनाथेन श्रीसूर्यशतकस्य च ।
अन्वयेनैव सकलं व्याख्यानं क्रियते मया ॥

तत्रभवान्मयूरः सूर्यशतकाख्यं काव्यं चिकीर्षुराशीर्नमस्क्रियावस्तु-निर्देशो वापि तन्मुखमिति शास्त्रात्काव्यादावाशीर्वादं करोति—जम्भारा-तीति । जम्भो नाम कश्चिदसुरः तस्यारातिः शत्रुरिन्द्रः तस्य इभः ऐरावतः तस्य कुम्भौ तयोरुद्भव आविर्भावो यस्य सः तं जम्भारातीभकुम्भोद्भवम्; अनेन किमभिधीयते? सांनिध्यात् पूर्वदिगिभकुम्भोद्भव-मित्यभिधीयते । सिन्दूरो नाम कश्चिद्रक्तद्रव्यविशेषः ।

**End :**

असौ दशशतानि सहस्रमभीशवो यस्य सः सूर्यः वः युष्मभ्यम् अभ्यर्थितं वाञ्छितं दिशतु प्र(यच्छतु) ॥

**Colophon :**

इति श्रीगोपीनाथसुधीविरचिता प्रभाव . . . . . . श्रीसूर्य-शतकटीका समाप्ता ॥

---

No. **11321.** सूर्यशतकव्याख्या.
SŪRYAŚATAKAVYĀKHYĀ.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{5}{8}$ inches. Pages, 72. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Complete.

Similar to the above; the commentator's name is not given.

**Beginning :**

जम्भो नाम कश्चिदसुरः, तस्य अरातिरिन्द्रः तस्य इभः ऐरावतः, तस्य कुम्भः मस्तकः, तस्मिन्नुद्भवं सान्द्रं निबिडं सिन्दूररेणुं सिन्दूरं

नाम गजालङ्कारद्रव्यविशेषः, तद्रेणुं दधत इव धारयन्त इव रक्ताः लोहिताः ।

**End:**

सर्वोकारोपकारी दशशताभीशुः सहस्रकिरणः वः अभ्यर्थितं दिशतु ॥

---

No. **11322.** सूर्यसप्तार्यास्तोत्रम्.

SŪRYASAPTĀRYĀSTŌTRAM.

Page, 1. *Lines*, 23 *on a page.*

Begins on fol. 169*b* of the MS. described under No. 446, wherein this work has been mentioned as Saptāryāstōtra in the list of other works given therein.

Complete.

Seven stanzas in the Āryā metre in praise of the Sun-god, the due repetition of which is held to be efficacious in realising one's desires and in overcoming one's enemies.

**Beginning:**

उदयाचलतिलकाय प्रणतोऽस्मि विवस्वते ग्रहेशाय ।
अम्बरचूडामणये दिग्वनिताकनककर्णपूराय ॥
जयति जनानन्दकरः करनिकरनिरस्ततिमिरसंघातः ।
लोकालोकालोकः कमलारुणकान्तिमण्डलः सूर्यः ॥

**End:**

इति गीताः साम्बपुरः सप्तार्या गगनदेशतः पतिताः ।
विलुठन्ति यस्य कण्ठे तस्य रविस्सपदि सन्तुष्टः ॥
आर्याभिः सप्तभिः सप्त वारान् यो जपयिष्यति ।
त्रिकालमेककालं वा भानुवारे विशेषतः ॥
सर्वान् कामानवाप्नोति सर्वशत्रून् जयिष्यति ।
सर्वरोगविनिर्मुक्तः सूर्यलोके महीयते ॥

**Colophon:**

इति सप्तार्या सम्पूर्णा ॥

## No. 11323. सूर्यसप्तार्यास्तोत्रम्.*
## SŪRYASAPTĀRYĀSTŌTRAM.

Pages, 3. Lines, 4 on a page.

Begins on fol. 40*b* of the MS. described under No. 6414.

Complete.

Same work as the above.

---

## No. 11324. सूर्यसप्तार्यास्तोत्रम्.
## SŪRYASAPTĀRYĀSTŌTRAM.

Pages, 2. Lines, 17 on a page.

Begins on fol. 21*b* of the MS. described under No. 10855 and not on fol. 21*a* as stated therein.

Complete.

Same work as the above, but with a different end as given below :—

आर्याभिः सप्त सप्तम्यां सप्तधा यः पठेन्नरः ।
तस्य गेहं च देहं च लक्ष्मीर्नैव विमुञ्चति ॥

---

## No. 11325. सूर्यस्तवः.
## SŪRYASTAVAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 33*a* of the MS. described under No. 5937.

Complete.

Similar to the above.

**Beginning :**

आदिमध्यान्तरूपाय वेदवेदान्तरूपिणे ।
नादबिन्दुकलातत्त्वभास्कराय नमो नमः ॥
नित्यज्ञेयस(याय)सत्याय सत्यमन्त्रप्रकाशिने ।
सुन्दरज्ञानरूपाय भास्कराय नमो नमः ॥

**End:**

कुष्ठव्याधिविनाशाय दुष्टव्याधिहराय च ।
इष्टकाम्यार्थदात्रे च भास्कराय नमो नमः ॥

**Colophon:**

इति सूर्यस्तवः सम्पूर्णः ॥

---

No. 11326. सूर्यस्तवः.
SŪRYASTAVAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 21*a* of the MS. described under No. 6485, wherein this work has been mentioned as Sūryanārāyaṇastōtra in the list of other works.

Complete.

Same work as the above, but the stanzas here are arranged in a different order.

The following stanza is added in the end :—

जयतु जयतु सूर्यं सर्वलोकैकदीपं
किरणशमितपापं क्लेशदुःखस्य मोक्षम् ।
निगमगगनगम्यं आ(चा)दिमादित्यमूर्तिं
परमपुरुषरूपं भास्करं तं नमामि ॥

---

No. 11327. सूर्यस्तवः.
SŪRYASTAVAḤ.

Pages, 3. Lines, 10 on a page.

Begins on fol. 17*a* of the MS. described under No. 2371.

Complete; as found in the Viṣṇupurāṇa.

The book is wrongly bound.

Similar to the above. It is stated in the Viṣṇupurāṇa that once upon a time Vaiśampāyana, having committed a homicide, asked his disciples to make penance on his behalf with a view to expiate the sin. Yājñavalkya, one of his disciples, requested the

teacher to be exclusively commissioned for this work as he considered his fellow students to be of no good. Vaiśampāyana got angry and asked Yājñavalkya to return all the Yajur-Vēdas learnt from him. The disciple did so immediately and praised the Sun-god. The hymn here described was the one that was uttered by him. The Sun-god is said to have appeared in the form of a white horse and taught Yājñavalkya fifteen Śākhās of Yajur-Vēda not known to Vaiśampāyana.

**Beginning:**

नमः सवित्रे द्वाराय मुक्तेरमिततेजसे ।
ऋग्यजुस्सामरूपाय त्रयीधाम्ने च ते नमः ॥
नमोऽग्निष्टोमभूताय जगतः कारणात्मने ।
भास्कराय परं तेजः सौषुम्नमुरु बिभ्रते ॥

**End:**

हिरण्मयं रथं यस्य केतवोऽमृतवाजिनः ।
वहन्ति भुवनालोकचक्षुषं तं नमाम्यहम् ॥

पराशरः—

इत्येवमादिभिस्तेन स्तूयमानः स्तवै रविः ।
वाजिरूपधरः प्राह व्रियतामभिवाञ्छितम् ॥

* * * *

शाखाभेदास्तु तेषां वै दश पञ्च च वाजिनाम् ।
काण्वाद्याः सुमहाभागा याज्ञवल्क्यप्रकीर्तिताः ॥

**Colophon:**

इति श्रीविष्णुपुराणे तृतीयेंऽशे पञ्चमोऽध्यायः ॥

---

No. **11328.** सूर्यस्तवः.

SŪRYASTAVAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 52*a* of the MS. described under No. 2854, wherein this has been mentioned as Purāṇōktasūryanamaskāra in the list of other works.

Complete.

Similar to the above.

**Beginning:**

कालात्मसत्त्वभूतात्मवेदात्मा विश्वतोमुखः ।
जन्ममृत्युजराव्याधिसंसारभयनाशनः ॥
हंसाय भुवनध्वान्तध्वंसायामिततेजसे ।
हंसवाहनरूढाय भास्कराय नमो नमः ॥

**End:**

दारिद्र्यदोषनाशाय घोरपातकहारिणे ।
सर्वभूतप्रबोधाय भास्कराय नमो नमः ॥

---

## (31) GENERAL.

---

### No. **11329.** कुमारमङ्गलस्तोत्रम्.
### KUMĀRAMAṄGALASTŌTRAM.

**Pages**, 4. Lines, 5 on a page.

Begins on fol. 122*a* of the MS. described under No. 2421, wherein this has been included in Sīmantinīmaṅgalāṣṭakādi in the list of other works given therein.

Complete; in ten stanzas.

Stanzas of prayer entreating the gods and the goddesses to confer long life, prosperity and welfare upon a (newly born) son.

**Beginning:**

यज्ञोपवीतीकृतभोगिराजो गणाधिराजो गजराजवक्त्रः ।
सुराधिराजार्चितपादपद्मः सदा कुमाराय शुभं करोतु ॥
विधातृपद्माक्षमहोक्षमा(वा)हा(ः)सरस्वतीश्रीगिरिजासमेत(ताः) ।
आयुः श्रियं भूमिमनन्तरूपं भद्रं कुमाराय शुभं करोतु ॥

**End:**

श्रद्धां च मेधां च यशस्यविद्यां प्रज्ञां च बुद्धिं च बलं च संपत् ।
आयुष्यमारोग्यमतीव तेजः सदा कुमाराय शुभं करोतु ॥

## No. 11330. देवतास्तोत्रम्.
## DĒVATĀSTŌTRAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 151*b* of the MS. described under No. 2421, wherein this work has been mentioned as Vighnēśvarādistuti in the list of other works.

Complete.

Eulogistic stanzas addressed to various gods, such as Viṣṇu, Śiva, Brahman, etc.

**Beginning:**

विघ्नध्वान्तनिवारणैकतरणिर्विघ्नाटवीहव्यवाट्
विघ्नव्यालकुलोपमर्दगरुडो विघ्नेभपञ्चाननः ।
विघ्नोत्तुङ्गगिरिप्रभेदनपविर्विघ्नाब्धिकुम्भोद्भवो
विघ्नाघौघघनप्रचण्डपवनो विघ्नेश्वरः पातु नः ॥

* * * *

यच्चिन्तितं च मनसा वचसा यदुक्तं यद्वा कथाश्रवणपादविचेष्टितानि ।
तत्त्वं निशासु दिवसेषु च यन्मयेदं तद्वासुदेव भवदर्पणमेव भूयात् ॥

**End:**

शम्भो शंकर शान्त शाश्वत शिव स्थाणो भवोमापते
श्रीकण्ठ त्रिपुरान्तक त्रिणयन श्रीकण्ठ कालान्तक ।
शर्वोग्राभव भीम (सर्व)जगतां नाथाक्षर श्रीनिधे
रुद्रेशान महेश्वरेश्वर महादेवेश तुभ्यं नमः ॥

---

## No. 11331. मङ्गलाष्टकम्.
## MAṄGALĀṢṬAKAM.

Pages, 6. Lines, 4 on a page.

Begins on fol. 126*a* of the MS. described under No. 2421, wherein this work seems to have been included in Sīmantinīmaṅgalāṣṭakādi in the list of other works.

Incomplete.

Stanzas addressed to various gods and others with a view to confer blessings on the supplicant: by Śiśukālidāsa.

**Beginning:**

कालिन्दी कनकाम्बुजं कलशजं काश्मीरजं कौस्तुभं
कोशं कोकिलकूजितं कुवलयं कौमोदकी कुङ्कुमम् ।
कल्याणी कलहंसकूजितरवं कैलासशैलोद्भवं
. केयूरं कमलापतिः करिमुखः कुर्वन्तु ते मङ्गलम् ॥ १ ॥

See under the next number for the end.

---

## No. 11332. मङ्गलाष्टकम्.
## MAṄGALĀṢṬAKAM.

Pages, 8. Lines, 4 on a page.

Begins on fol. 10*a* of the MS. described under No. 10183 and not on fol 9*a* as stated therein.

Wants beginning; complete.

Same work as the above.

**End:**

एतश्श(च्छ्री)शिशुकालिदासकवितावैवाहसीमन्तके
मौञ्जीयानप्रतिष्ठदवैतनृपाः पट्टाभिषेकं तथा ।
ते शृण्वन्ति पठन्ति प्रत्यश(सम्प्रति)नरं(रा)स्ते संततं वैभवं
ते सर्वे शतवत्सरे विजयते लक्ष्मीं लभन्ते ध्रुवम् ॥

---

## No. 11333. वरमङ्गलाष्टकम्.
## VARAMAṄGALĀṢṬAKAM.

Pages, 6. Lines, 4 on a page.

Begins on fol. 123*b* of the MS. described under No. 2421, wherein this work is apparently included in Sīmantinīmaṅgalāṣṭakādi in the list of other works.

Complete.

Eight stanzas, said to have been composed by Kālidāsa, and pronouncing benediction on a person. The due repetition of this eulogy in the early morning with due devotion is considered to be as efficacious as bathing in the place where the Ganges falls into the sea.

**Beginning:**

श्रीमत्पङ्कजविष्टरो हरिहरौ वायुर्महेन्द्रोऽनलः
चन्द्रो भास्करवित्तपालवरुणा धर्माधिपालग्रहाः ।
प्रद्युम्नो नलकूबरः सुरगुरुश्चिन्तामणिः कौस्तुभः
स्वामी शक्तिधरश्च लाङ्गलधरः कुर्वन्तु ते मङ्गलम् ॥

**End:**

इत्येतद्वरमङ्गलाष्टकमिदं पापौघविध्वंसकृत्
पुण्यं संप्रति कालिदासकविनाप्येतैः प्रबन्धीकृतम् ।
यः प्रातः शृणुयात्पठेदनुदिनं विख्यातभक्त्यान्वितो
गङ्गासागरसंगमादवभृथं प्राप्नोति पुण्यं महत् ॥

---

No. **11334.** सीमन्तिनीस्तोत्रम्.
SĪMANTINĪSTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 121*a* of the MS. described under No. 2421, wherein this work has been mentioned as Sīmantinīmaṅgalāṣṭaka in the list of other works.

Complete.

Stanzas of prayer addressed to various gods and goddesses with a view to make a pregnant woman beget a male issue.

**Beginning:**

विघ्नेश्वरो विघ्नविदूरकारी निर्विघ्नकार्येषु फलं सुसिद्धम् ।
विघ्नेश्वरो नाम सुरेषु पूज्यः सीमन्तिनीं पुत्रवतीं करोतु ॥

सर्वेषु कार्येष्वखिलार्थसिद्धिर्वागीश्वरी सत्यवती च दुर्गा ।
सरस्वती नाम विधातृपत्नी सीमन्तिनीं पुत्रवतीं करोतु ॥

**End:**

सुवर्णरत्नाभरणार्चिताङ्गी सौन्दर्यरूपा नवचन्द्ररेखा ।
नलस्य पत्नी दमयन्तिनाम सीमन्तिनीं पुत्रवतीं करोतु ॥

---

## STŌTRAS—SUPPLEMENTAL.

### (a) ĀÑJANĒYA.

### No. 11335. आञ्जनेयपञ्चरत्नस्तोत्रम्.
### ĀÑJANĒYAPAÑCARATNASTŌTRAM.

Substance, palm-leaf. Size, 16 × 1⅝ inches. Page, 1. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 12*b*. The other works herein are Dēvīstōtra 1*a*, Viśēṣaṇatrayavaiyarthya 2*a*, Śrībhāṣyaguruparamparādhyāna 4*a*, Jyautiṣaviṣaya 6*a*, Pañcapakṣijyautiṣa 13*a*, Uttarapārāśarya 17*a*, Vīkṣāraṇyamāhātmya 23*a*, Paramatakhaṇḍana (Maṇipravāla) 31*a*.

Complete.

Five stanzas in praise of Āñjanēya or Hanumat, the repetition of which is held to enable one to ward off all fears and to become devoted to Rāma.

**Beginning:**

वीताखिलविषयेच्छं जातानन्दाश्रुपुलकमत्यच्छम् ।
सीतापतिदूताद्यं वातात्मजमद्य भावये हृद्यम् ॥

तरुणारुणमुखकमलं करुणारसपूरपूरितापाङ्गम् ।
संजीवनमाशास्ये ऽमृदुलमहिमानमञ्जनाभाग्यम् ॥

**End:**

एतत्पवनसुतस्य स्तोत्रं यः पठति पञ्चरत्नाख्यम् ।
सोऽसावखिलभयेभ्यो मुक्तः श्रीरामभक्तिभाग्भवति ॥

## (b) KṚṢṆARĀYA·

### No. 11336. कृष्णरायस्तोत्रम्.
### KṚṢṆARĀYASTŌTRAM.

Substance, palm-leaf. Size, 14¼ × 1⅞ inches. Pages, 2. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 14a. The other works herein are **Prapañcamithyātvānumānakhaṇḍana** 1a, Ānandatāratamyakhaṇḍana 5a, 50a, Tattvamasivākyārthavicāra 8a, Ācāryavimśati 11a, Śrīvibhutvapramāṇa 15a, Ānanda tāratamyanirūpaṇa 17a, 36a, Sattātraividhyanirūpaṇa 20a, Nārāyaṇajagatkāraṇatvavicāra 23a, Śivajagatkāraṇatvavicāra 25a, Advaitiśiṣyōpadēśāsaṅgativicāra 33a, Ōṅkārāvayavatvakhaṇḍana 37a, Upādānakāraṇatāvicāra 42a, Baddhamuktavyavasthāvicāra 48a, 52a, Saṃnyāsiśikhāyajñōpavītasamarthana 57a, Śrīstuti with commentary 65a, Ṛgarthavicāra 67a, Mahāvākyavivaraṇa 78a.

Incomplete.

A few stanzas in glorification of King Kṛṣṇarāya, probably of Vijayanagar.

**Beginning:**

क्षीराब्धेर्मकुटं हरेरपहृतं दैत्येन तार्क्ष्याहृतं
प्राक् कृष्णेन समर्पितं शिरसि तत्सम्पत्कुमारस्य हि ।
कृत्वा तत्सदृशं समर्प्य स हरिः श्रीकृष्णभूपात्मना
क्ष्मामागत्य नृभाग्यतो विजयते भूशूरपूर्भूषणम् ॥

**End:**

स्वामिन् कृष्णनृपेन्द्र मह्यमधुना वित्तं प्रदत्तं त्वया
यद्यचैव गमिष्यति व्ययमिदं दत्तं कलापादिकम् ।
तत् क्रय्यत्वमुपैति रत्नपटलं भूपाहृतत्वं पटो
जीर्णत्वं करुणा मय(तव) स्थिरतरास्थेयानपाया मयि ॥
श्रीकृष्णभूपालकदर्शनेन रात्रिः सुकाल्या मम सच्चरित्रम् ।
फलान्वितं नष्टममङ्गलं च.

## (c) GAṄGĀ.

### No. 11337. गङ्गाष्टकम्.
### GAṄGĀṢṬAKAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 2*a* of the MS. described under No. 9729.

Complete.

Same work as that described under No. 9370.

## (d) GARUḌA.

### No. 11338. गरुडदण्डकः.
### GARUḌADAṆḌAKAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 22*a* of the MS. described under No. 9729.

Complete.

Same work as the one described under R.No. 673(*j*) of the Triennial Catalogue of MSS., Vol. I, Part I–C.

### No. 11339. गरुडपञ्चाशत्.
### GARUḌAPAÑCĀŚAT.

Pages, 13. Lines, 7 on a page.

Begins on fol. 78*a* of the MS. described under No. 9706.

Complete.

Same work as that described under No. 9394.

## (e) JINA.

### No. 11340. अजितपञ्चकम्.
### AJITAPAÑCAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 68*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9425.

---

No. **11341.** अनन्तनाथपञ्चकम्.

ANANTANĀTHAPAÑCAKAM.

**Pages, 2.** Lines, 7 on a page.

Begins on fol. 71*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No 9427.

---

No. **11342.** अभिनन्दनपञ्चकम्.

ABHINANDANAPAÑCAKAM.

**Pages, 2.** Lines, 7 on a page.

Begins on fol. 69*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9428.

---

No. **11343.** अरनाथस्तोत्रम्.

ARANĀTHASTŌTRAM.

**Pages, 3.** Lines, 7 on a page.

Begins on fol. 72*b* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9429.

---

No. **11344.** अर्हत्स्तोत्रम्.

ARHATSTŌTRAM.

**Pages, 5.** Lines, 7 on a page.

Begins on fol. 28*a* of the MS. described under No. 8836.

Complete.

In praise of Arhat or Jina. It is stated herein that, for six months before the brith of this Jina, Kubera showered gold and precious stones in his mother's house, and that after his birth he was taken by Indrāṇī from his mother's arms while asleep and was anointed on the top of Mount Mēru, etc., and then restored to his mother.

**Beginning:**

यद्गर्भावतरे गृहे जनयितुः प्रागेव शक्राज्ञया
षण्मासान् नवचारुरत्नकनकं वित्तेश्वरो म(व)र्षति ।
मात्युर्वी मणिगर्भिणी सुरसरिन्नीरोक्षिता षोडश-
स्वप्रेक्षामुदितां भजन्ति जननीं श्रीदिक्कुमार्योऽस्ति सः ॥
प्रच्छन्नं जननीमु(म)पास्य शयनादानीय शच्यार्पितं
यं नत्वा सचतुर्निकायविबुधः श्रीमत्करीन्द्रश्रितः ।
सौधर्माङ्कनिवेशितं सुरगिरिं नीत्वाभिषिच्याम्बया
संयोज्योपचरत्यजस्रमा(म)समैर्भोगैः सभास्वेष नः ॥

**End:**

श्रेयोमार्गानभिज्ञानिह भवद(ग)हने जाज्वलद्दुःखदाव-
स्कन्धे चङ्क्रम्यमाणानतिचकितजनानुद्धरेयं वराकान् ।
इत्यारोहत्परानुग्रहरसविलसद्भावनोऽवाप्तपुण्य-
प्रक्रान्तैरेव वाक्यैः शिवपथमुचितं शास्ति योऽर्हन् स नोऽव्यात् ॥

---

## No. 11345. अहमादिभक्तिः.
## AHAMĀDIBHAKTIḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 65*a* of the MS. described under No. 8836, wherein this work has been omitted to be mentioned separately in the list of other works.

Complete.

Same work as that described under No. 9431, but with the addition of two stanzas in the beginning as given below.

सततं संविदानोऽहमहमित्यद् इत्यपि ।
असंवेदनमन्येन केनापि मलवर्षणः ॥
रागादेर्वा विशुद्ध्येकस(स्व)भावस्य मह(मा)ञ्जसा ।
ततस्तन्मोक्षयेवाहं यतिष्ये सात्मलब्धये (?)॥

No. **11346.** आचार्यभक्तिः.
ĀCĀRYABHAKTIḤ.

**Pages, 4. Lines, 7 on a page.**

Begins on fol. 51*b* of the MS. described under No. 8336.

Same work as that described under No. 9432, but this is complete.

**End:**

गुरवः पान्तु नो नित्यं ज्ञानदर्शननायकाः ।
